# Teach Yourself Samskrit

## संस्कृतस्वाध्यायः

### द्वितीया दीक्षा

# व्यवहारप्रदीपः

## द्वितीयः भागः

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

राष्ट्रिय संस्कृत संस्थानम्
मानितविश्वविद्यालयः
नव देहली

# Teach Yourself Samskrit

## संस्कृतस्वाध्यायः

### द्वितीया दीक्षा

# व्यवहारप्रदीपः

### द्वितीयः भागः

सम्पादकः
वेम्पटि कुटुम्बशास्त्री

सहसम्पादकाः
ललित कुमार त्रिपाठी
वाई. एस्. रमेशः
बनमाली बिश्वालः
सुकान्त कुमार सेनापतिः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

Publisher :
Prof. Vempaty Kutumba Sastry
Vice-Chancellor

RASHTRIYA SANSKRIT SANSTHAN
56-57, Institutional Area, Janakpuri,
New Delhi-110 058
EPABX : 25540993, 25540995
Gram : SAMSTHAN
E-mail : rsks@vsnl.net.in
Visit our website at : www.sanskrit.nic.in

Edition : First, 2004 (50,000 Copies)

Vol.II - ISBN : 81-86111-11-5

All rights reserved. No reproduction or translation of this book or part thereof in any form, should be made. Neither it may be stored in a retrieval system, nor transmitted, by any means, electronic, mechanical, photocopying, recording or otherwise, without the written permission of the publisher.

© Rashtriya Sanskrit Sansthan

Price : Rs. 200.00 (Per Set)

Printer :
M/s. Goyal Stationers
B-36/9, G.T. Karnal Road,
Industrial Area, Delhi-110033

# संस्कृतस्वाध्यायः

## द्वितीया दीक्षा

**सङ्कल्पना एवं दिग्दर्शन**

प्रो. वेम्पटि कुटुम्बशास्त्री

**परामर्श**

| | | | |
|---|---|---|---|
| प्रो. श्रीधर वसिष्ठ | प्रो. रामकृष्णमाचार्य | डॉ. हिन्द केसरी | श्री जि. महाबलेश्वर भट्ट |
| श्री चमूकृष्ण शास्त्री | श्री जनार्दन हेगड़े | डॉ. विश्वास | श्री चाँद किरण सलूजा |

**पुनरीक्षण**

| | | | |
|---|---|---|---|
| डॉ. हिन्द केसरी | डॉ. आजाद मिश्र | डॉ. आर. देवनाथन् | डॉ. विजयपाल शास्त्री |

**लेखकसमिति**

| | | | |
|---|---|---|---|
| श्री जनार्दन हेगड़े (अध्यक्ष) | डॉ. बनमाली विश्वाल | डॉ. विश्वास | डॉ. ललित कुमार त्रिपाठी (संयोजक) |
| श्रीमती शशिप्रभा गोयल | डॉ. वाई एस. रमेश | डॉ. श्रीधर मिश्र | डॉ. बोध कुमार झा |

**लेखन/समीक्षण/कार्यशाला में प्रतिभागी अन्य सदस्य**

| | | | |
|---|---|---|---|
| डॉ. मुरलीधर शर्मा | श्रीमती शान्तला | श्रीमती नागरत्ना | डॉ. सत्यनारायण आचार्य |
| डॉ. प्रकाश पाण्डेय | डॉ. रमाकान्त मिश्र | डॉ. सच्चिदानन्द मिश्र | श्रीमती विजयलक्ष्मी |
| डॉ. चन्द्रकान्त | डॉ. नरसिंह मूर्ति | श्रीमती पंकजा | श्रीमती सुचेता |
| डॉ. शुक्ला मुखर्जी | कु.धन्यता | डॉ. पी. वी. सुब्रह्मण्यम् | श्री नारायण भट्ट |
| डॉ. धर्मेन्द्र कुमार सिंहदेव | श्री वेङ्कटेश मूर्ति | डॉ. रत्नमोहन झा | डॉ. अजय मिश्र |

**परियोजनासंयोजक**

डॉ. ललित कुमार त्रिपाठी

**सहायक संयोजक एवं सहायक सम्पादक**

डॉ. धर्मेन्द्र कुमार सिंहदेव

**चित्रनिर्माण**

श्री कल्लोल मजूमदार

**प्रबन्धन/सहयोग**

श्री चन्दन सिंह कनियाल

श्री हरभजन सिंह सन्धू

**टाईप सेटिंग**

श्री राजीव कुमार सिंह

**चित्रसज्जा**

श्री मनोज गुप्ता एवं श्री प्रेम गोयल

**सहयोग**

श्री कृष्णकान्त पचौली

# विषयानुक्रमणी


| स्तबकः | पाठः | पाठ्यबिन्दुः | पृष्ठसंख्या |
|---|---|---|---|

## प्रथमः भागः

| | | | |
|---|---|---|---|
| 1. प्रथमः स्तबकः | | प्रथमा विभक्तिः | |
| 1.1 | प्रथमः पाठः | अजन्तपुंलिङ्गाः शब्दाः | 1-21 |
| 1.2 | द्वितीयः पाठः | अजन्तस्त्रीलिङ्गाः शब्दाः | 22-38 |
| 1.3 | तृतीयः पाठः | अजन्तनपुंसकलिङ्गाः शब्दाः | 39-48 |
| 1.4 | चतुर्थः पाठः | हलन्त-पुंलिङ्गाः शब्दाः | 49-61 |
| 1.5 | पञ्चमः पाठः | हलन्त-स्त्रीलिङ्गाः शब्दाः | 62-71 |
| 1.6 | षष्ठः पाठः | हलन्त-नपुंसकलिङ्गाः शब्दाः | 72-88 |
| 2. द्वितीयः स्तबकः | | | |
| 2.1 | प्रथमः पाठः | द्वितीया विभक्तिः | 89-119 |
| 2.2 | द्वितीयः पाठः | तृतीया विभक्तिः | 120-148 |
| 2.3 | तृतीयः पाठः | चतुर्थी विभक्तिः | 149-175 |
| 2.4 | चतुर्थः पाठः | पञ्चमी विभक्तिः | 176-201 |
| 2.5 | पञ्चमः पाठः | षष्ठी विभक्तिः | 202-230 |
| 2.6 | षष्ठः पाठः | सप्तमी विभक्तिः | 231-253 |
| 2.7 | सप्तमः पाठः | सम्बोधन-प्रथमा | 254-270 |
| 3. तृतीयः स्तबकः | | | |
| 3.1 | प्रथमः पाठः | सर्वनामशब्दाः | 271-314 |
| 3.2 | द्वितीयः पाठः | अव्ययानि | 315-331 |
| 3.3 | तृतीयः पाठः | सप्त विभक्तयः | 332-357 |

| स्तबकः | पाठः | | पाठ्यबिन्दुः | पृष्ठसंख्या |
|---|---|---|---|---|

## द्वितीयः भागः

| | | | | |
|---|---|---|---|---|
| 4. | चतुर्थः स्तबकः | | | |
| | 4.1 | प्रथमः पाठः | आत्मनेपदिनां धातूनां लट्-लकारे प्रयोगाः | 358-375 |
| | 4.2 | द्वितीयः पाठः | आत्मनेपदिनां धातूनां लोट्-लकारे प्रयोगाः | 376-381 |
| | 4.3 | तृतीयः पाठः | आत्मनेपदिनां धातूनां लृट्-लकारे प्रयोगाः | 382-388 |
| | 4.4 | चतुर्थः पाठः | आत्मनेपदिनां धातूनां लङ्-लकारे प्रयोगाः | 389-396 |
| | 4.5 | पञ्चमः पाठः | आत्मनेपदिनां धातूनां लट्-लोट्-लृट्-लङ्-लकारेषु प्रयोगाः | 397-411 |
| | 4.6 | षष्ठः पाठः | उपसर्ग-प्रयोगाः | 412-433 |
| | 4.7 | सप्तमः पाठः | कर्मणि-प्रयोगाः – कर्मणि वर्तमाने लट् | 434-464 |
| | | | कर्मणि भूते लङ् | 465-481 |
| | | | कर्मणि लोट् | 482-495 |
| 5. | पञ्चमः स्तबकः | | | |
| | 5.1 | प्रथमः पाठः | विशेष्य-विशेषणभावः | 496-517 |
| | 5.2 | द्वितीयः पाठः | चित्-चन-प्रयोगाः | 518-538 |
| | 5.3 | तृतीयः पाठः | सङ्ख्याः | 539-559 |
| | 5.4 | चतुर्थः पाठः | पूरणप्रत्ययान्तानि पदानि | 560-575 |
| 6. | षष्ठः स्तबकः | | | |
| | 6.1 | प्रथमः पाठः | शतृप्रत्ययान्तरूपाणां प्रथमा-प्रयोगाः | 576-603 |
| | 6.2 | द्वितीयः पाठः | शतृप्रत्ययान्तरूपाणां द्वितीया-प्रयोगाः | 604-612 |
| | 6.3 | तृतीयः पाठः | शतृप्रत्ययान्तरूपाणां तृतीया-प्रयोगाः | 613-619 |
| | 6.4 | चतुर्थः पाठः | शतृप्रत्ययान्तरूपाणां चतुर्थी-प्रयोगाः | 620-627 |
| | 6.5 | पञ्चमः पाठः | शतृप्रत्ययान्तरूपाणां पञ्चमी-प्रयोगाः | 628-638 |
| | 6.6 | षष्ठः पाठः | शतृप्रत्ययान्तरूपाणां षष्ठी-प्रयोगाः | 639-646 |
| | 6.7 | सप्तमः पाठः | शतृप्रत्ययान्तरूपाणां सप्तमी-प्रयोगाः | 647-663 |
| | 6.8 | अष्टमः पाठः | शानच्प्रत्ययान्तरूपाणां सर्वासु विभक्तिषु प्रयोगाः | 664-682 |


❖❖❖

# व्यवहारप्रदीपः

## द्वितीयः भागः

# चतुर्थः स्तबकः

## 4.1 प्रथमः पाठः

### [ आत्मनेपदिनः धातवः ]

**एतानि वाक्यानि पठत—**

[ इन वाक्यों को पढ़ें। Read these sentences. ]


**लट्-लकारे प्रयोगाः**



खगः आकाशे **डयते**।



एषः दूरवाण्या **भाषते**।



पुस्तकम् उत्पीठिकायां **विद्यते**।



गृहिणी वातायनात् **वीक्षते**।



आकाशे सूर्यः **प्रकाशते**।



शिशुः **एधते**।



भक्तः देवं **वन्दते।**




चोरः आरक्षकात् **पलायते।**



शिष्यः गुरुं **सेवते।**




याचकः **भुङ्क्ते।**




माता पाकशालायाम् **आस्ते।**



ब्रह्मचारी भिक्षां **याचते।**



वधूः श्वशुरात् **लज्जते।**



छात्राः देवं **प्रार्थयन्ते।**

## अधोलिखितानि वाक्यानि पठत–

[ इन वाक्यों को पढ़ें। Read these sentences. ]

एषः उद्याने **मोदते**।
नारिकेलवृक्षः **वर्धते**।
पुरुषः पर्यङ्के **शेते**।
कमलं जले **जायते**।
बालकः मिष्टान्नं **कामयते**।
वधूः **लज्जते**।
कण्ठे हारः **शोभते**।
भक्तः देवं **वन्दते**।
मेघे सौदामनी **विद्योतते**।
एषः बन्धोः वियोगेन **खिद्यते**।
बालिका कटे **आस्ते**।

शिष्यः गुरुं **सेवते**।
कृषिकः मेघावृतम् आकाशं दृष्ट्वा वृष्टिम् **ऊहते**।
छात्रः ज्ञानं **लभते**।
नेत्रं **स्पन्दते**।
शिक्षकः छात्रं पुत्रं **मन्यते**।
शिशुः **एधते**।
सः दुर्वार्तां श्रुत्वा **शङ्कते**।
क्षत्रियः वेदनां **सहते**।
सुरेशः ओदनं **भुङ्क्ते**।
वायुना लता **कम्पते**।
गोविन्दः **स्पर्धते**।

## एतानि रूपाणि परिशीलयत–

[ इन रूपों का परिशीलन करें। Observe these verbal forms. ]

**यथा**

| | **(क)** | **(ख)** | |
|---|---|---|---|
| | पठति | विद्यते | |
| | तिष्ठति | लभते | |
| एतानि परस्मैपदिरूपाणि → | लिखति | कम्पते | ← एतानि आत्मनेपदिरूपाणि |
| | हसति | एधते | |
| | वदति | वर्धते | |
| | नृत्यति | शोभते | |

### विवरणम्

☞ संस्कृते क्रियापदस्य द्विविधं रूपं भवति - एकं परस्मैपदिरूपम्। द्वितीयम् आत्मनेपदिरूपम्।

⇨ परस्मैपदिरूपं **यथा** पठति, लिखति, हसति।

⇨ आत्मनेपदिरूपं **यथा** एधते, लभते, सेवते।

☞ क्वचित् क्रियापदस्य उभयं रूपं भवति।

⇨ उभयपदिरूपं **यथा** पचति / पचते, याचति / याचते, राजति / राजते।

उभयपदिक्रियापदं वयम् अग्रे पठिष्यामः। इदानीम् आत्मनेपदिरूपाणाम् अभ्यासं कुर्मः।

**एतानि अधिकतया उपयुज्यमानानि आत्मनेपदिरूपाणि सन्ति, सावधानं पठत—**
[ ये अधिकतया उपयुज्यमान आत्मनेपद रूप हैं। These are mostly used *ātmanepada*-forms.]

| | | | |
|---|---|---|---|
| **यथा** | मोदते | (प्र)काशते | कामयते |
| | म्रियते | भासते | ईक्षते |
| | वर्धते | ऊहते | एधते |
| | ईहते | लज्जते | भाषते |
| | शोभते | कम्पते | सेवते |
| | शङ्कते | मन्यते | सहते |
| | खिद्यते | पलायते | रमते |
| | राजते | विद्यते | लभते |

**वन्द्-धातोः रूपाणि प्रयोगान् च पठत—**
[ 'वन्द्' धातु के रूप एवं प्रयोगों को पढ़ें। Read the forms and usages of the root '*vand*'.]

**'वन्द्' - धातुः (लट्-लकारे)**

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | वन्दते | वन्देते | वन्दन्ते |
| **म. पु.** | वन्दसे | वन्देथे | वन्दध्वे |
| **उ. पु.** | वन्दे | वन्दावहे | वन्दामहे |
| | शिशुः **वन्दते**। | शिशू **वन्देते**। | शिशवः **वन्दन्ते**। |
| | त्वम् **वन्दसे**। | युवाम् **वन्देथे**। | यूयम् **वन्दध्वे**। |
| | अहम् **वन्दे**। | आवाम् **वन्दावहे**। | वयम् **वन्दामहे**। |

**वर्ध्-धातोः आत्मनेपदिरूपाणि पठत—**
[ 'वर्ध्' धातु के आत्मनेपद रूपों को पढ़ें। Read the *ātmanepada*-forms of the root '*vardh*'. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | वर्धते | वर्धेते | वर्धन्ते |
| **म. पु.** | वर्धसे | वर्धेथे | वर्धध्वे |
| **उ. पु.** | वर्धे | वर्धावहे | वर्धामहे |

## अभ्यासः — 141

✍ **आत्मनेपदिरूपाणि पूरयत—**

[ आत्मनेपद रूपों को पूरा करें। Complete the *ātmanepada*-forms. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| 1. | | | |
| प्र. पु. | जायते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 2. | | | |
| प्र. पु. | मोदते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 3. | | | |
| प्र. पु. | भाषते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 4. | | | |
| प्र. पु. | मन्यते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 5. | | | |
| प्र. पु. | शोभते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 6. | | | |
| प्र. पु. | वन्दते | | |
| म. पु. | | | |
| उ. पु. | | | |

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| 7. | | | |
| प्र. पु. | ईक्षते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 8. | | | |
| प्र. पु. | रमते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 9. | | | |
| प्र. पु. | याचते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 10. | | | |
| प्र. पु. | शङ्कते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 11. | | | |
| प्र. पु. | लभते | | |
| म. पु. | | | |
| उ. पु. | | | |
| 12. | | | |
| प्र. पु. | सेवते | | |
| म. पु. | | | |
| उ. पु. | | | |

## अभ्यासः — 142

अवशिष्टवचनरूपाणि पूरयत–

[ अवशिष्ट वचन के रूपों को पूरा करें। Complete the forms of remaining numbers . ]

उदा. वन्दते ......**वन्देते**...... ......**वन्दन्ते**...... ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1. | | | स्पर्धन्ते । | 11. | वर्धसे | | । |
| 2. | | म्रियेथे | । | 12. | | | आलोकन्ते । |
| 3. | वन्दसे | | । | 13. | | स्पर्धेथे | । |
| 4. | | | वीक्षामहे । | 14. | वर्धे | | । |
| 5. | | सहावहे | । | 15. | लभते | | । |
| 6. | डयसे | | । | 16. | | | मन्यन्ते । |
| 7. | | प्रकाशेते | । | 17. | | वर्तेथे | । |
| 8. | | | लभध्वे । | 18. | मन्ये | | । |
| 9. | | जायेते | । | 19. | लज्जते | | । |
| 10. | स्पन्दे | | । | 20. | | | ईक्षध्वे । |

## अभ्यासः — 143

अधोलिखित-क्रियापदानां पुरुषं वचनं च लिखत–

[ अधोलिखित क्रियापदों के पुरुष एवं वचन लिखें। Write the person and number of the following verbal forms. ]

उदा. डयन्ते ......**प्रथमपुरुषः**...... ......**बहुवचनम्**......

| | | | |
|---|---|---|---|
| 1. | भासन्ते | 11. | शोभामहे |
| 2. | विद्येते | 12. | सेवसे |
| 3. | आलोकते | 13. | म्रियते |
| 4. | वन्दध्वे | 14. | कम्पावहे |
| 5. | सहेथे | 15. | खिद्ये |
| 6. | भाषे | 16. | पलायन्ते |
| 7. | मोदामहे | 17. | मन्ये |
| 8. | लज्जेते | 18. | वन्दामहे |
| 9. | ईक्षध्वे | 19. | प्रकाशेते |
| 10. | स्पन्दसे | 20. | सहे |

**एतानि रूपाणि सावधानं पठत—**

[ इन रूपों को ध्यान से पढ़ें। Read these verbal forms carefully. ]

**परस्मैपदिरूपाणि**
**पठ् (परस्मैपदी)**

**आत्मनेपदिरूपाणि**
**वन्द् (आत्मनेपदी)**

| | एक. | द्वि. | बहु. | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|---|
| **प्र. पु.** | पठति | पठतः | पठन्ति | वन्दते | वन्देते | वन्दन्ते |
| **म. पु.** | पठसि | पठथः | पठथ | वन्दसे | वन्देथे | वन्दध्वे |
| **उ. पु.** | पठामि | पठावः | पठामः | वन्दे | वन्दावहे | वन्दामहे |

## अभ्यासः — 144

**अधोलिखितानां धातूनां लट्-लकारे सर्वाणि रूपाणि लिखत—**

[ अधोलिखित धातुओं के लट् लकार में सभी रूपों को लिखें। Write all the forms of the following roots in *laṭ-lakāra.* ]

**1. लिख् (परस्मैपदी)**

**2. मुद् (आत्मनेपदी)**

| | एक. | द्वि. | बहु. | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|---|
| **प्र. पु.** | लिखति | | | मोदते | | |
| **म. पु.** | | | | | | |
| **उ. पु.** | | | | | | |

**3. क्रीड् (परस्मैपदी)**

**4. सह् (आत्मनेपदी)**

| | एक. | द्वि. | बहु. | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|---|
| **प्र. पु.** | क्रीडति | | | सहते | | |
| **म. पु.** | | | | | | |
| **उ. पु.** | | | | | | |

### 5. वृध् (आत्मनेपदी)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. पु. | वर्धते | | |
| म. पु. | | | |
| उ. पु. | | | |

### 6. खाद् (परस्मैपदी)

| एक. | द्वि. | बहु. |
|---|---|---|
| खादति | | |
| | | |
| | | |

### 7. जन् (आत्मनेपदी)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. पु. | जायते | | |
| म. पु. | | | |
| उ. पु. | | | |

### 8. मिल् (परस्मैपदी)

| एक. | द्वि. | बहु. |
|---|---|---|
| मिलति | | |
| | | |
| | | |

### 9. हस् (परस्मैपदी)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. पु. | हसति | | |
| म. पु. | | | |
| उ. पु. | | | |

### 10. लज्ज् (आत्मनेपदी)

| एक. | द्वि. | बहु. |
|---|---|---|
| लज्जते | | |
| | | |
| | | |

## अधोनिर्दिष्टानि वाक्यानि पठत—

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

रात्रौ चन्द्रः **राजते**।

दिने सूर्यः **प्रकाशते**।

पक्षिणौ आकाशे **डयेते**।

लतायां पुष्पे **जायेते**।

वृक्षाः वायुना **कम्पन्ते**।

वृक्षे पुष्पाणि **शोभन्ते**।

सत्कार्येण ते सुखं **लभन्ते**।

बालौ क्रीडया **मोदेते**।

सा सदा **लज्जते**।

सः अध्यक्षस्थाने **विराजते**।

## अभ्यासः — 145

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत–**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | |
|---|---|---|---|
| उदा. | क्रीडापटवः | **स्पर्धन्ते** । | (स्पर्ध्) |
| 1. | सज्जनाः लोकमङ्गलं | ........ । | (कामय्) |
| 2. | अध्यक्षः आसन्दे | ........ । | (विराज्) |
| 3. | सः क्रिकेटक्रीडाम् | ........ । | (आलोक्) |
| 4. | वृक्षौ | ........ । | (कम्प्) |
| 5. | दरिद्राः कष्टं | ........ । | (सह्) |
| 6. | खगः आकाशे | ........ । | (डय्) |
| 7. | सूर्यचन्द्रौ आकाशे | ........ । | (राज्) |
| 8. | ते सम्यक् | ........ । | (भाष्) |
| 9. | स्पर्धालवः | ........ । | (स्पर्ध्) |

📖 **आत्मनेपदि-क्रियापदस्य मध्यमपुरुषे प्रयुक्तानि अधोनिर्दिष्टानि वाक्यानि पठत–**

[ आत्मनेपद क्रियाओं के मध्यमपुरुष में प्रयुक्त अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences having *ātmanepadī* verbal forms in second person. ]

त्वं लज्जसे।

त्वं वर्धसे।

युवाम् आसन्दे शोभेथे।

युवां देवं वन्देथे।

यूयं कार्यक्रमं वीक्षध्वे।

यूयं वर्धध्वे।

युवां सहेथे।

युवां लज्जेथे।

त्वं भाषसे।

त्वं पलायसे।

## अभ्यासः – 146

✍ **अधस्तन-मञ्जूषातः उपयुक्तं क्रियापदं चित्वा रिक्तस्थानानि पूरयत–**

[ अधोलिखित मञ्जूषा से उपयुक्त क्रियापदों को चुनकर रिक्तस्थान भरें। Fill in the blanks with the appropriate verbal forms given in the box. ]

| अपेक्षेथे | कामयध्वे | सहध्वे | कम्पध्वे | लज्जेथे | पलायेथे | वन्दसे | **भाषसे** | वर्धसे | वीक्षध्वे |
|---|---|---|---|---|---|---|---|---|---|

| | | | |
|---|---|---|---|
| उदा. 1. | त्वं संस्कृतेन ........**भाषसे**........ । | 6. | त्वं शरीरेण । |
| 2. | युवां कुत्र ? | 7. | त्वं देवं । |
| 3. | यूयं कष्टं । | 8. | यूयं संस्कृतोन्नतिं । |
| 4. | यूयं चित्राणि । | 9. | युवां कम् अर्थम् । |
| 5. | युवां सेवां कर्तुम् । | 10. | यूयं शैत्येन । |

📖 **अधोनिर्दिष्टानि आत्मनेपदिनः क्रियापदस्य उत्तमपुरुषस्य वाक्यानि पठत–**

[ अधोनिर्दिष्ट आत्मनेपद-क्रियाओं के उत्तमपुरुष के वाक्यों को पढ़ें। Read the following sentences where the *ātmanepadī* verbal forms are used in the first person . ]

| | |
|---|---|
| अहं देवं **वन्दे**। | आवां संस्कृतेन **भाषावहे**। |
| अहं कष्टं **सहे**। | वयं संस्कृतोन्नतिम् **अपेक्षामहे**। |
| अहं सुखं **कामये**। | वयं कष्टं **सहामहे**। |
| आवां मिष्टान्नं **लभावहे**। | वयं सिंहं दृष्ट्वा **पलायामहे**। |
| आवां चित्रं दृष्ट्वा **मोदावहे**। | अहं तस्य आगमनं **शङ्के**। |

## अभ्यासः – 147

✍ **उदाहरणानुसारं रिक्तस्थानानि पूरयत–**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | | | |
|---|---|---|---|---|---|
| उदा. | आवां ......**शङ्कावहे**...... । | (शङ्क्) | 5. | वयं । | (लभ्) |
| 1. | वयं । | (लज्ज्) | 6. | अहं । | (वन्द्) |
| 2. | अहम् । | (ऊह्) | 7. | आवां । | (पलाय्) |
| 3. | आवां । | (कामय्) | 8. | वयं । | (मुद्) |
| 4. | अहम् । | (अपेक्ष्) | 9. | आवां । | (भाष्) |

## अभ्यासः — 148

✍ **अधस्तन-मञ्जूषातः क्रियापदं चित्वा रिक्तं स्थानं पूरयत—**

[ निम्नलिखित मञ्जूषा से क्रियापदों को चुनकर रिक्तस्थान की पूर्ति करें। Fill in the blanks with the verbal forms given in the following box. ]

I.

**यथा** 1. योद्धारः रणे ............**म्रियन्ते**...... ।
2. बालिके आवां .............................. ।
3. बीजाद् वृक्षः .............................. ।
4. उद्याने वृक्षौ .............................. ।
5. अलङ्कारेण त्वम् अतीव ।
6. आकाशे नक्षत्राणि ।
7. वयं संस्कृतपठनेन ।
8. विमानानि पक्षिणः इव ।
9. यूयं दूरदर्शनं ।
10. छात्रः परीक्षायाम् उत्तीर्णतां ।

II.

**यथा** 11. विष्णुः शेषनागे ............**शेते**....... ।
12. लुब्धः भूरि धनं ।
13. युवां मातरं देवं ।
14. मित्रस्य विदेशगमनात् अहं .......................... ।
15. अहं संस्कृतभाषया .............................. ।
16. लतासु पुष्पाणि ।
17. अपराधस्य दण्डम् अहं ।
18. वयं पीठेषु ।
19. रुग्णः कष्टं .............................. ।
20. आपणेषु विक्रयणार्थं बहूनि वस्तूनि .............................. ।

III.

**यथा** 21. न्यायालये आरक्षिणा निगृहीतः चोरः दण्डभीत्या ..........**पलायते**..... ।
22. शुभं सूचयत् नेत्रं ।
23. भक्ताः देवं ।
24. मरुभूमौ सस्यानि न ।
25. वयं सुकृतस्य फलानि ।
26. उत्सवे जनाः .............................. ।
27. पापकर्मणः अहं ।
28. ओलम्पिकक्रीडासु बहवः क्रीडापटवः ।
29. मेघध्वनिना महतीं वृष्टिम् अहं ।
30. प्रातः अहं देवं ।

| I. | | | II. | | | III. | | |
|---|---|---|---|---|---|---|---|---|
| विद्येते | जायते | डयन्ते | भाषे | वर्तामहे | मन्येथे | ऊहे | मोदन्ते | स्पर्धन्ते |
| लभते | शोभसे | वीक्षध्वे | प्रकाशन्ते | कामयते | सहे | वर्धन्ते | लज्जे | कम्पते |
| मोदामहे | लज्जावहे | विद्यन्ते | वर्तन्ते | खिद्ये | सहते | वन्दे | सेवन्ते | लभामहे |

**लट्-लकारे प्रयोगाः**

## सन्ततिः कस्मै न रोचते ?

कुटुम्बे यदा कश्चन शिशुः **जायते** तदा महोत्सवः भवति। यदा सः शनैः शनैः **वर्धते** तदा माता तं दृष्ट्वा भृशं **मोदते**। यदा शिशुः ताम् **ईक्षते**, निश्छलं हसति च तदा माता अतीव आनन्दम् अनुभवति। यदा बुभुक्षा **जायते** तदा शिशुः क्रन्दति, अस्पष्टभाषया किञ्चिद् **भाषते** वा। माता तं बुभक्षितं **मन्यते**। शिशुः तस्याः दुग्धं **याचते** इति मन्यमाना माता शिशवे दुग्धं **दत्ते**। सः तस्याः क्रोडे उपविश्य दुग्धं पिबति। तस्य मनः तत्र नितरां **रमते**। यावत् शिशुः चन्द्रकलेव अनुदिनं **परिवर्धते** तावत् माता तस्य स्वास्थ्य-विषये न **शङ्कते**। सा तस्य पालन-पोषणयोः कृते सततं **यतते**। स्वसन्ततेः कृते माता बहुविधं कष्टं **सहते**, तथापि तस्याः मनसि उद्वेगः स्थानं न **लभते**। सा सम्यक् जानाति यत् सन्तत्या परिवारः **शोभते**।



शिशुः यदा बाल्यावस्थां प्राप्नोति तदा विद्यालयं गच्छति। प्रातः उत्थाय सः मातरं पितरं च **वन्दते**। यदा सः यौवनं **लभते** तदा धनोपार्जनाय वृत्तिं **कुरुते**। उपार्जितेन धनेन मातरं पितरं कुटुम्बं च **सेवते**। एवमेव सन्ततिः समाजे प्रतिष्ठां **विन्दते**। आत्मानुरूपया कन्यया सह यूनः, आत्मानुरूपेण वरेण सह युवत्याः च विवाहः **जायते**। पुत्रवधूः अपि श्वशुरं श्वश्रूञ्च मातापितृवत् **सेवते**। सा श्वश्र्वा सह उन्मुक्तं **भाषते** किन्तु श्वशुरात् किञ्चित् **लज्जते**। अस्माकं देशे कुटुम्बस्य सुदृढा आदर्शपरम्परा **वर्तते**।

◆◆◆

## अभ्यासः — 149

**1. पाठाधारेण रिक्तस्थानानि पूरयत—**

[ पाठ के आधार पर रिक्तस्थान की पूर्ति करें। Fill in the blanks on the basis of the present lesson .]

उदा. (i) शिशुः कस्मै न ........**रोचते**........ ।

(ii) माता शिशवे दुग्धं ........................ ।

(iii) माता बहुविधं कष्टं ........................ ।

(iv) सः मातरं पितरं च ........................ ।

(v) किन्तु श्वशुरात् किञ्चित् ........................ ।

**2. अधोलिखितानाम् आत्मनेपदिक्रियापदानां बहुवचनरूपाणि लिखत—**

[ अधोलिखित आत्मनेपद क्रियापदों का बहुवचन रूप लिखें। Write the plural forms of the following *ātmenapadi*-verbal forms. ]

| | | **एक.** | **बहु.** | | **एक.** | **बहु.** |
|---|---|---|---|---|---|---|
| उदा. | (i) | जायते | ........**जायन्ते**........ । | (ii) | सहते | ........................ । |
| | (iii) | वर्धते | ........................ । | (iv) | शोभते | ........................ । |
| | (v) | रमते | ........................ । | (vi) | सेवते | ........................ । |
| | (vii) | यतते | ........................ । | (viii) | भाषते | ........................ । |
| | (ix) | लभते | ........................ । | (x) | वर्तते | ........................ । |


**3. लट्लकारे शेषरूपाणि लिखत—**

[ लट् लकार में अवशिष्ट रूपों को लिखे। Write the remaining forms of *laṭ-lakāra*. ]

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | लभते | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

**परस्मैपदिनः आत्मनेपदिनः**
**उभयपदिनः च धातवः**

**एतानि वाक्यानि पठत–**
[ इन वाक्यों को पढ़ें। **Read these sentences.** ]



बालः शालां **गच्छति।**



छात्रः पुस्तकं **पठति।**



शिष्यः गुरुं **वन्दते।**



पुत्रः मातरं **सेवते।**



पाचकः **पचति।**



रमेशः ओदनं **पचते।**

## विवरणम्

☞ एतेषु वाक्येषु स्थूलाक्षरैः दर्शितानां क्रियापदानां परिशीलनं कुरुत। तत्र 'गच्छति', 'पठति', 'वन्दते', 'सेवते', 'पचति', 'पचते' इत्यादिक्रियापदानि सन्ति। अत्र कः विशेषः ?

☞ 'गच्छति' 'पठति' इत्यत्र अन्ते '**ति**' अस्ति। 'वन्दते' 'सेवते' इत्यत्र अन्ते '**ते**' अस्ति। 'पचति' 'पचते' इत्यत्र अन्ते '**ति**', '**ते**' उभयम् अस्ति।

⇨ यदा धातूनां लट्-लकारस्य प्रथमपुरुषस्य एकवचनरूपस्य अन्ते 'ति' भवति तदा धातवः **परस्मैपदिनः** भवन्ति।

⇨ यदा च अन्ते 'ते' भवति तदा धातवः **आत्मनेपदिनः** भवन्ति।

⇨ यदा अन्ते 'ति'/'ते' उभयम् भवति तदा धातवः **उभयपदिनः** भवन्ति।

**यथा** (i) पश्यति, तिष्ठति, पिबति, जिघ्रति, वदति इत्यादयः **परस्मैपदिनः**।

(ii) वन्दते, सेवते, एधते, स्पर्धते, मोदते, शङ्कते इत्यादयः **आत्मनेपदिनः**।

(iii) खनति/खनते, गूहति/गूहते, श्रयति/श्रयते, हरति/हरते, इत्यादयः **उभयपदिनः**।

### लिख् धातुः (परस्मैपदी)

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | लिखति | लिखतः | लिखन्ति |
| **म. पु.** | लिखसि | लिखथः | लिखथ |
| **उ. पु.** | लिखामि | लिखावः | लिखामः |

### वन्द् धातुः (आत्मनेपदी)

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | वन्दते | वन्देते | वन्दन्ते |
| **म. पु.** | वन्दसे | वन्देथे | वन्दध्वे |
| **उ. पु.** | वन्दे | वन्दावहे | वन्दामहे |

## अभ्यासः — 150

✍ **अधः एकस्य परस्मैपदिनः एकस्य च आत्मनेपदिनः धातोः लट्लकारे रूपं दत्तम् अस्ति तदनुगुणम् अन्यानि रूपाणि लिखत—**

[ नीचे एक परस्मैपदी धातु का और एक आत्मनेपदी धातु का लट् लकार में रूप दिया गया है। उसके अनुसार अन्य रूप लिखें। The *laṭ-lakāra* forms of one *parasmaipadi* root and one *ātmanepadi* root are mentioned above. Complete the following on the basis of that. ]

**परस्मैपदिनः**

| 1. | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | वसति | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

| 3. | | | |
|---|---|---|---|
| **प्र. पु.** | कर्षति | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

| 5. | | | |
|---|---|---|---|
| **प्र. पु.** | शंसति | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

| 7. | | | |
|---|---|---|---|
| **प्र. पु.** | वर्षति | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

| 9. | | | |
|---|---|---|---|
| **प्र. पु.** | फलति | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

**आत्मनेपदिनः**

| 2. | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | रोचते | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

| 4. | | | |
|---|---|---|---|
| **प्र. पु.** | वर्तते | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

| 6. | | | |
|---|---|---|---|
| **प्र. पु.** | द्योतते | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

| 8. | | | |
|---|---|---|---|
| **प्र. पु.** | वीक्षते | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

| 10. | | | |
|---|---|---|---|
| **प्र. पु.** | एधते | | |
| **म. पु.** | | | |
| **उ. पु.** | | | |

## अभ्यासः — 151

✍ **अधोनिर्दिष्टानि रूपाणि परस्मैपदस्य आत्मनेपदस्य वा इति कोष्ठके लिखत—**

[ अधोनिर्दिष्ट रूप 'परस्मैपदी' है या 'आत्मनेपदी' कोष्ठक में लिखें। Write in the bracket whether the following verbal forms belong to the *parasmaipadi* group or the *ātmanepadī* group. ]

| | | |
|---|---|---|
| उदा. | पठति | ( **परस्मैपदरूपम्** ) |
| | पचे | ( **आत्मनेपदरूपम्** ) |
| 1. | रमसे | ( ) |
| 2. | मुञ्चसि | ( ) |
| 3. | मिलामि | ( ) |
| 4. | गूहते | ( ) |
| 5. | वर्ते | ( ) |
| 6. | रोचन्ते | ( ) |
| 7. | फलतः | ( ) |
| 8. | धावन्ति | ( ) |
| 9. | अवेक्षते | ( ) |
| 10. | पालयामि | ( ) |
| 11. | प्रार्थये | ( ) |
| 12. | गच्छथ | ( ) |
| 13. | लिखथः | ( ) |
| 14. | वन्दध्वे | ( ) |
| 15. | नमावः | ( ) |
| 16. | वर्तेते | ( ) |
| 17. | युध्यामहे | ( ) |
| 18. | नृत्यामः | ( ) |
| 19. | मुञ्चावः | ( ) |
| 20. | बोधध्वे | ( ) |

**आत्मनेपदिनां / परस्मैपदिनां धातूनां लट्-लकारे प्रयोगाः**

## निर्धनः सुमन्तकः



सुमन्तकनामा कश्चन निर्धनः अस्ति। एकदा सः कुतश्चित् भूरि धनं लभते। तेन सः सन्तुष्टः भवति। तथापि सः इतोऽपि अधिकं धनं कामयते। कथमपि दैवात् सः तदपि प्राप्नोति। तथापि सः न मोदते। तस्य आशा वर्धते। सः चिन्तयति– "यदि इतोऽपि अधिकं धनं लभे तर्हि एव अहं शोभे" इति। एवमेव चिन्तयन् सः रात्रौ शेते। परन्तु चिन्ताग्रस्तः सः बहुकालानन्तरं निद्रां लभते। निद्रायां स्थितः सः एकं स्वप्नम् ईक्षते। देवाः स्वप्ने प्रत्यक्षाः भूत्वा भाषन्ते- "हे सुमन्तक ! एवम् आचरितुं कुतो न लज्जसे ? यदि एवमेव कामयसे तर्हि त्वं दुराशाग्रस्तः अचिरं म्रियसे। अतः दुराशां मा कुरु। अल्पेन तृप्तः भव। तेन त्वं जीवनस्य सर्वेषु क्षेत्रेषु एधसे। सुखं च लभसे। अन्यथा असमये नश्यसि" इति। ततः सुमन्तकः निद्रातः जागरितः अभवत्। स्व-स्वभावस्य कृते तस्य लज्जा अजायत।

### अभ्यासः – 152

✍ **अस्यां कथायां प्रयुक्तानि क्रियापदानि गणद्वये विभज्य लिखत–**

[इस कथा में प्रयुक्त क्रियापदों को गणद्वय में विभाजित कर लिखें। Write the verbal forms used in the above story in two groups.]

**यथा**

| (क) परस्मैपदरूपाणि | (ख) आत्मनेपदरूपाणि |
| --- | --- |
| अस्ति | लभते |

# चतुर्थः स्तबकः


## 4.2 द्वितीयः पाठः

## [ आत्मनेपदिनः धातवः ]

**एतानि वाक्यानि पठत–**

[ इन वाक्यों को पढ़ें। Read these sentences. ]


**लोट्-लकारे प्रयोगाः**



तव यशः **वर्धताम्**।



तव पुत्राः **जायन्ताम्**।



हे अर्जुन ! **विजयस्व**।



हे लक्ष्मण ! माम् **अनुवर्तस्व**।



भोः मन्त्रिन् ! तथ्यं **भाषस्व**।



हे पथिक ! भवान् अत्र सुखेन **शेताम्**।

**रूपाणि सावधानं पठत–**

[ इन रूपों को ध्यान से पढ़ें। Read the following declension carefully. ]

**'वन्द्' धातुः (लोट्-लकारे)**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र. पु.** | वन्दताम् | वन्देताम् | वन्दन्ताम् |
| **म. पु.** | वन्दस्व | वन्देथाम् | वन्दध्वम् |
| **उ. पु.** | वन्दै | वन्दावहे | वन्दामहै |

**अभ्यासः – 153**

**अवशिष्ट-रूपाणि पूरयत–**

[ अवशिष्ट रूपों को पूरा करें। Complete rest of the forms. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| 1. | मोदताम् | | |
| 2. | वर्धताम् | | |
| 3. | खिद्यताम् | | |
| 4. | | | |
| | सेवस्व | | |
| 5. | | | |
| | मन्यै | | |

## अभ्यासः — 154

अन्यानि वचनानि पूरयत–

[ अन्य वचनों को पूरा करें। Complete the forms of other numbers. ]

| | | | |
|---|---|---|---|
| 1. | सहताम् | सहेताम् | सहन्ताम् |
| 2. | | | भाषध्वम् |
| 3. | | कम्पावहै | |
| 4. | एधस्व | | |
| 5. | | खिद्येथाम् | |

## अभ्यासः — 155

**कोष्ठके सूचितस्य धातोः उचितेन रूपेण रिक्तं स्थानं पूरयत–**

[ कोष्ठक में सूचित क्रिया के उचित रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the appropriate forms of the verbs given in the bracket. ]

| | | | |
|---|---|---|---|
| **यथा** | त्वम् उच्चैः मा | ........**भाषस्व**........ । | (भाष) |
| 1. | त्वं कतिचन दिनानि कष्टं | । | (सह) |
| 2. | एषः संस्कृतं ज्ञात्वा | । | (मोद) |
| 3. | यूयं परीक्षायां सफलतां | । | (लभ) |
| 4. | वयं सर्वस्य हितमेव | । | (काम) |
| 5. | भवन्तः एव अस्य कारणम् | । | (ऊह) |
| 6. | भवती भगवन्तं | । | (सेव) |
| 7. | वत्सौ ! युवां मा | । | (खिद्य) |
| 8. | अहं निरन्तरं | । | (वर्ध) |
| 9. | पुत्राः मातरं | । | (सेव) |
| 10. | वयम् अनुदिनम् | । | (एध) |

## अभ्यासः — 156

✍ **यथोदाहरणम् एतेषां क्रियापदानां लकार-परिवर्तनं कुरुत—**
[ उदाहरण के अनुसार इन क्रियापदों का लकार परिवर्तन करें। Change the *lakāras* of these verbal forms as shown in the example. ]

| | लट्-लकारे | लोट्-लकारे |
|---|---|---|
| यथा | नागराजः ऊहते। | नागराजः ऊहताम्.................. । |
| 1. | त्वं मोदसे। | त्वं । |
| 2. | बालिकाः लज्जन्ते। | । |
| 3. | त्वं शोभसे। | । |
| 4. | अहम् एधे। | । |
| 5. | वयं मोदामहे। | । |
| 6. | चन्द्रः शोभते। | । |
| 7. | जनाः सेवन्ते। | । |
| 8. | भीतः वैरी पलायते। | । |
| 9. | युवाम् ऊहेथे। | । |
| 10. | अहम् ईक्षे। | । |
| 11. | त्वं भाषसे। | । |
| 12. | वेदना जायते। | । |
| 13. | आवां कम्पावहे। | । |
| 14. | ताः आलोकन्ते। | । |
| 15. | ते सूयन्ते। | । |

## लोट्-लकारे प्रयोगाः

### ऋषयो मन्त्रद्रष्टारः



लोककल्याण-प्रसङ्गे ऋषीणां भूमिका उल्लेखयोग्या वर्तते। वैदिकमन्त्रेषु तेषाम् उपदेशाः लोककल्याणभावनाश्च सङ्कलिताः वर्तन्ते। ते च ऋषयः मन्त्रान् प्रणीतवन्तः इति न **मन्यन्ताम्**। वस्तुतः ते मन्त्रान् दृष्टवन्तः। अत एव ऋषयो मन्त्रद्रष्टारः इति काचित् सूक्तिः प्रसिद्ध्यति।

वेदेषु, उपनिषत्सु पुराणेषु च ऋषयः सर्वां मानवजातिम् उपदिशन्ति– "भो मानवाः! सम्पूर्णा धरा अस्माकं कुटुम्बः इति उदात्ता भावना युष्मासु **जायताम्**। सर्वे कल्याणं श्रेयः च **लभन्ताम्**। भवत्सु दैवगुणाः **वर्धन्ताम्**। सद्भावनाः **समेधन्ताम्**। दुर्भावनाः **क्षीयन्ताम्**। ईश्वरः एकः एव। अतः तस्य भिन्नं भिन्नं नाम स्वीकृत्य परस्परं कलहं विवादं वा मा **कुरुध्वम्**। धर्मः अर्थः कामः मोक्षः च इति चत्वारः पुरुषार्थाः मानवजीवनस्य लक्ष्याः सन्ति। अतः सर्वे चतुर्षु पुरुषार्थेषु **यतन्ताम्**। कुटुम्बं समाजं राष्ट्रं विश्वं च निःस्वार्थभावनया **सेवन्ताम्**।

ऋषयः लोककल्याणाय ईश्वरं प्रार्थयन्ते– "भो दयानिधे! सर्वे प्राणिनः आनन्दं **लभन्ताम्**। मानवानां सर्वविधानि दुःखानि **क्षीयन्ताम्**। सर्वेषां हृदि दिव्यं ज्ञानं **प्रकाशताम्**"।

◆◆◆

## अभ्यासः — 157

1. **पाठाधारेण रिक्तस्थानानि पूरयत–**

[ पाठ के आधार पर रिक्तस्थान की पूर्ति करें। Fill in the blanks on the basis of the present lesson. ]

(i) दिव्यं ज्ञानं ______ ।

(ii) सर्वविधानि दुःखानि ______ ।

(iii) प्राणिनः आनन्दं ______ ।

(iv) भवत्सु दैवगुणाः ______ ।

(v) चतुर्षु पुरुषार्थेषु ______ ।

2. **अधोलिखितानां धातूनां लोट्-लकारे प्रथमपुरुषे रूपाणि लिखत–**

[ अधोलिखित धातुओं के लोट्-लकार प्रथम पुरुष के रूप लिखें। Write the forms of the following roots in *loṭ-lakāra* third person. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| (i) | सेवताम् | | |
| (ii) | जायताम् | | |
| (iii) | वर्धताम् | | |
| (iv) | प्रकाशताम् | | |
| (v) | क्षीयताम् | | |

3. **अधोलिखितानां धातूनां लोट्-लकारे मध्यम-पुरुषे रूपाणि लिखत–**

[ अधोलिखित धातुओं के लोट्-लकार मध्यमपुरुष के रूप लिखें। Write the forms of the following roots in *loṭ-lakāra* second person. ]

| | | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| उदा. | (i) | सेव् | **सेवस्व** | | |
| | (ii) | लभ् | | | |
| | (iii) | वर्ध् | | | |
| | (iv) | जाय् | | | |
| | (v) | वन्द् | | | |

# चतुर्थः स्तबकः

## 4.3 तृतीयः पाठः

### [ आत्मनेपदिनः धातवः ]

लृट्-लकारे प्रयोगाः

**एतानि वाक्यानि पठत–**

[ इन वाक्यों को पढ़ें। Read these sentences. ]



हे राजन् ! पुत्रेष्टिं कारय, तव भार्याः पुत्रान् **प्रसविष्यन्ते।**



हे कुन्ति ! चिन्तां मा कुरु, तव पुत्राः राज्यं **लप्स्यन्ते**।



हे सीते ! धैर्यं धारय, जनाः त्वां **वन्दिष्यन्ते**।

## 📖 वन्द्-धातोः रूपाणि प्रयोगान् च पठत–

[ 'वन्द्' धातु के रूप एवं प्रयोगों को पढ़ें। Read the forms and the usages of the root '*vand*'.]

### 'वन्द्' - धातुः (लृट्-लकारे)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र. पु.** | वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| **म. पु.** | वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| **उ. पु.** | वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे |

| | | |
|---|---|---|
| राजीवः देवं **वन्दिष्यते**। | प्रदीपः नरेशः च देवं **वन्दिष्येते**। | सर्वे देवं **वन्दिष्यन्ते**। |
| त्वं देवं **वन्दिष्यसे**। | युवां देवं **वन्दिष्येथे**। | यूयं देवं **वन्दिष्यध्वे**। |
| अहं देवं **वन्दिष्ये**। | आवां देवं **वन्दिष्यावहे**। | वयं देवं **वन्दिष्यामहे**। |

## 📖 एतानि वाक्यानि परिशीलयत–

[ इन वाक्यों का परिशीलन करें। Observe these sentences. ]

1. सस्यं शीघ्रं वर्धिष्यते।
2. बालः क्रमशः एधिष्यते।
3. अहं परश्वः उद्घाटन-समारोहे भाषिष्ये।
4. जनाः भृशं मोदिष्यन्ते।
5. त्वम् अस्य परिणामम् ईक्षिष्यसे।
6. वृक्षस्य शाखाः कम्पिष्यन्ते।
7. सीता लज्जिष्यते।
8. बुभुक्षा जनिष्यते।
9. अधिवक्तारः अपराधिनं शङ्किष्यन्ते।
10. भारतस्य कीर्तिः राजिष्यते।

**एतानि रूपाणि पठत—**

[ इन रूपों को पढ़ें। Read the following forms. ]

### 'वृध्'-धातुः (लृट्-लकारे)

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र. पु.** | वर्धिष्यते | वर्धिष्येते | वर्धिष्यन्ते |
| **म. पु.** | वर्धिष्यसे | वर्धिष्येथे | वर्धिष्यध्वे |
| **उ. पु.** | वर्धिष्ये | वर्धिष्यावहे | वर्धिष्यामहे |

## अभ्यासः — 158

**लट्-लकाररूपाणां पुरतः लृट्लकार-रूपाणि लिखत—**

[ लट्-लकार रूपों के सामने लृट् लकार के रूप लिखें। Write the *lṛt*-forms in front of *laṭ*-forms. ]

| | | | | | |
|---|---|---|---|---|---|
| **यथा** | वन्दते | **वन्दिष्यते** । | | | |
| 1. | वर्तते | । | 6. | भाषावहे | । |
| 2. | स्पर्धते | । | 7. | मोदेथे | । |
| 3. | वन्दे | ........................। | 8. | शङ्कध्वे | । |
| 4. | शोभसे | । | 9. | भाषेथे | । |
| 5. | लज्जन्ते | । | 10. | सहे | । |

## अभ्यासः — 159

**वन्द्-धातोः रूपाणाम् आधारेण अन्यानि रूपाणि पूरयत—**

[ 'वन्द्' धातु के रूपों के आधार पर अन्य रूपों को पूरा करें। Complete the verbal forms on the basis of the root '*vand*'.]

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| 1. | **प्र. पु.** | वर्तिष्यते | | |
| | **म. पु.** | वर्तिष्यसे | | |
| | **उ. पु.** | वर्तिष्ये | | |

| | | | | |
|---|---|---|---|---|
| 2. | **प्र. पु.** | भाषिष्यते | | भाषिष्यन्ते |
| | **म. पु.** | | भाषिष्येथे | |
| | **उ. पु.** | | | भाषिष्यामहे |
| 3. | **प्र. पु.** | स्पर्धिष्यते | | |
| | **म. पु.** | | | |
| | **उ. पु.** | | | |
| 4. | **प्र. पु.** | मोदिष्यते | | |
| | **म. पु.** | | | |
| | **उ. पु.** | | | |
| 5. | **प्र. पु.** | बोधिष्यते | | |
| | **म. पु.** | | | |
| | **उ. पु.** | | | |

## अभ्यासः — 160

**वर्तमानकालिकानि एतानि वाक्यानि भविष्यत्काले परिवर्तयत—**

[ इन वर्तमानकालिक वाक्यों को भविष्यत् काल में बदलें। Change the sentences of present tense into future tense. ]

**यथा** आकाशे नक्षत्रं शोभते। **आकाशे नक्षत्रं शोभिष्यते।**

1. मम संशयः जायते। ............ ।
2. पक्षिणः वेगेन डयन्ते। ............ ।
3. त्वं कीर्तिं कामयसे। ............ ।

4. अहं भयेन कम्पे। ।

5. वनिताः त्रपन्ते। ।

6. वने वृक्षाः वर्धन्ते। ।

7. एते सम्यक् भाषन्ते। ।

8. शिशुः मधुरं प्राप्य मोदते। ।

9. युवां किमर्थं शङ्केथे ? ..................... ।

10. वयम् अपमानं न सहामहे। ।

11. दरिद्रः धनं कामयते। ।

12. आवां सर्वमपि ईक्षावहे। ।

13. मनसि उद्वेगः जायते। ।

14. रणे वैरिणः म्रियन्ते। ।

15. त्वं कुतः खिद्यसे। ।

16. न वयं पलायामहे। ।

17. यूयं भाषध्वे। ।

18. रात्रौ चन्द्रः प्रकाशते। ।

19. सः कष्टात् उद्विजते। ।

20. वयं सुखेन वर्तामहे। ।

21. सज्जनः पापात् जुगुप्सते। ।

**लृट्-लकारे प्रयोगाः**

## स्वातन्त्र्यसेनान्याम् आशाः

अस्माकं देशः यदा आंग्लशासनाधीनः आसीत् तदानीम् अस्माकं देशस्य स्वातन्त्र्यसेनान्यः आत्माहुतिं दत्त्वा देशस्य स्वतन्त्रताप्राप्तये प्रायतन्त। तेषाम् एताः आशाः अवर्तन्त– यदा भारतं स्वातन्त्र्यं **लप्स्यते** तदा भारतीयाः स्वातन्त्र्यगौरवं **धरिष्यन्ते**। राष्ट्रे नवा चेतना नवा स्फूर्तिः च **प्रकाशिष्येते**। वैदेशिकाः राष्ट्रस्य



सम्पत्तिं नैव **हरिष्यन्ते**। राजनेतारः प्रजानां कल्याणं **कामयिष्यन्ते**। प्रजाः राष्ट्रस्य उन्नतये **प्रयतिष्यन्ते**। कृषकाः व्यापारिणः सेवारताः च देशं **सेविष्यन्ते**। सर्वे **समेधिष्यन्ते**। परस्परं न कोऽपि **शङ्किष्यते**। वयं भारतीयाः वयं स्वतन्त्राः इति सर्वेषां मनसि आत्मसम्माननं **जनिष्यते**। धर्मभेदः भाषाभेदः स्थानभेदः च राष्ट्रस्य ऐक्यभावनां न **बाधिष्यन्ते** इति। एवम् एताः आशाः हृदि निधाय स्वातन्त्र्यसेनान्यः आत्मनः सर्वम् उत्सृज्य अस्मभ्यं स्वातन्त्र्यम् अदापयन्। वयं सर्वे भारतीयाः तेषां भावनानाम् आशानां च अनुरूपं **प्रयतिष्यामहे**।

यदि वयम् एवं **सङ्कल्पिष्यामहे** तदनुगुणं **वर्तिष्यामहे** च तदा एव स्वातन्त्र्यसेनान्यः प्रति समुचितः श्रद्धाञ्जलिः **वर्तिष्यते**।

◆◆◆

## अभ्यासः — 161

1. **पाठानुसारेण रिक्तस्थानानि पूरयत—**

[ पाठ के आधार पर रिक्त स्थान की पूर्ति करें। Fill in the blanks on the basis of the lesson. ]

(i) भारतीयाः स्वातन्त्र्यगौरवं ।

(ii) राष्ट्रस्य सम्पत्तिं नैव ।

(iii) प्रजानां कल्याणं ।

(iv) सेवारताः देशं ।

(v) समुचितः श्रद्धाञ्जलिः ।

2. **यथोदाहरणं वाक्यानि पूरयत—**

[ उदाहरण के अनुसार वाक्यों की पूर्ति करें। Complete the sentences as shown in the example. ]

उदा. (i) सः लप्स्यते। अहं **लप्स्ये**............ ।

(ii) सः धरिष्यते। अहं ।

(iii) सः सेविष्यते। अहं ।

(iv) सः हरिष्यते। अहं ।

(v) सः प्रयतिष्यते। अहं ।

3. **अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत—**

[ अधोलिखित वाक्यों को बहुवचन में बदलें। Change the following sentences into plural ones. ]

उदा. (i) सः सेविष्यते। **ते सेविष्यन्ते** ।

(ii) बालकः धरिष्यते। ।

(iii) सा जनिष्यते। ।

(iv) देवः वर्तिष्यते। ।

(v) सर्वः समेधिष्यते। ।

# चतुर्थः स्तबकः

## 4.4 चतुर्थः पाठः

### [ आत्मनेपदिनः धातवः ]

**एतानि वाक्यानि पठत—**

[ इन वाक्यों को पढ़ें। Read these sentences. ]

**लङ्-लकारे प्रयोगाः**



कैकेयी दशरथं वरम् **अयाचत**।



शबरी रामचन्द्रम् **अवन्दत**।



रावणः अङ्गदं दृष्ट्वा **अकम्पत**।



विभीषणः संस्कृतेन **अभाषत**।



राधिका कृष्णं प्राप्य **अमोदत**।



भगवान् वराहः पृथिवीम् **अधरत**।

**वन्द्-धातोः रूपाणि पठत–**

[ 'वन्द्' धातु के रूपों को पढ़ें। Read the forms of the root '*vand*'. ]

**'वन्द्' - धातुः (लङ्-लकारे)**

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | अवन्दत | अवन्देताम् | अवन्दन्त |
| **म. पु.** | अवन्दथाः | अवन्देथाम् | अवन्दध्वम् |
| **उ. पु.** | अवन्दे | अवन्दावहि | अवन्दामहि |

**एतानि वाक्यानि सावधानं पठत–**

[ इन वाक्यों को ध्यान से पढ़ें। Read these sentences carefully. ]

सः भीत्या **अकम्पत** ।

इयम् **अलज्जत** ।

देवाः राक्षसान् **अशङ्कन्त** ।

श्रीरामं दृष्ट्वा राक्षसाः **पलायन्त** ।

भिक्षुकः भिक्षां प्राप्य **अमोदत** ।

भक्ताः देवम् **अवन्दन्त** ।

त्वं संस्कृतेन **अभाषथाः** ।

छात्राः उत्साहेन **अस्पर्धन्त** ।

यूयं देशहितम् **अकामयध्वम्** ।

रात्रौ दीपाः **प्राकाशन्त** ।

वयं सर्वं वृत्तान्तम् **अमन्यामहि** ।

अहम् ईश्वरम् **अवन्दे** ।

आवाम् **अखिद्यावहि** ।

मम नेत्रे **अस्पन्देताम्** ।

युवां गुरुम् **असेवेथाम्** ।

## अभ्यासः — 162

**अवशिष्टरूपाणि पूरयत—**

[ अवशिष्ट रूपों को पूरा करें। Complete rest of the verbal forms. ]

1. अलभत

2. अम्रियन्त

3. पलायेताम्

4. 

अकामये

5. 

अमोदध्वम्

6. अजायत

## अभ्यासः — 163

**वर्तमानकालिकानि एतानि वाक्यानि भूतकाले परिवर्तयत–**

[ वर्तमानकालिक इन वाक्यों को भूतकाल में बदलें। Change these sentences of present tense into that of past tense. ]

| | | | | |
|---|---|---|---|---|
| यथा | शिष्यः गुरुं वन्दते। | शिष्यः | गुरुम् | अवन्दत। |
| 1. | अहं यशः लभे। | | | । |
| 2. | त्वम् अकारणं लज्जसे। | | | । |
| 3. | ताः स्वकार्यं मन्यन्ते। | | | । |
| 4. | वयम् खिद्यामहे। | | | । |
| 5. | यूयं दुःखं सहध्वे। | | | । |
| 6. | शिशवः मधुरं भाषन्ते। | | | । |
| 7. | धीरौ देशरक्षार्थं म्रियेते। | | | । |
| 8. | वयं वेदनां सहामहे। | | | । |
| 9. | युवां किमर्थं पलायेथे। | | | । |
| 10. | आवाम् एतेन मोदावहे। | | | । |

**एतम् अनुच्छेदं सावधानं पठत–**

[ इस अनुच्छेद को ध्यान से पढ़ें। Read this paragraph carefully. ]

दशरथः पुत्रं **कामयते**। अतः सः कुलगुरुणा वसिष्ठेन सह **मन्त्रयते**। ततः पुत्रकामेष्टिम् **आरभते**। यज्ञसमाप्तौ अग्निः विशेषेण **शोभते**। तत्र कश्चन दिव्यपुरुषः **राजते**। सः दशरथाय पायसपूर्णं पात्रं **दत्ते**। दशरथः तत् प्राप्य **मोदते**। सः आत्मानं धन्यं **मन्यते**। तस्य पत्न्यः अपि सन्तुष्टाः **जायन्ते**। दशरथः ताभ्यः पायसं **दत्ते**। ताः पायसं **स्वदन्ते**।

कालक्रमेण राज्ञ्यः गर्भवत्यः **जायन्ते**। दशरथः ताः **वीक्षते**। तस्य आनन्दः **वर्धते**। नवमासानन्तरं राम-लक्ष्मण-भरत-शत्रुघ्नाः **उत्पद्यन्ते**।

## अभ्यासः – 164

✍ **उपरितने अनुच्छेदे स्थूलाक्षरैः लिखितानि सर्वाणि क्रियापदानि आत्मनेपदे लट्-लकारे सन्ति। तेषां स्थाने आत्मनेपदे लङ्लकारस्य रूपाणि उपयुज्य तानि वाक्यानि पुनः लिखत—**

[ उपर्युक्त अनुच्छेद में स्थूलाक्षर में लिखित क्रियापद आत्मनेपद लट्-लकार में हैं। उनके स्थान पर आत्मनेपद लङ्लकार का प्रयोग कर वाक्यों को पुनः लिखें। The verbal forms written bold in the above paragraph are in *ātmanepada-laṭ-lakāra.* Rewrite those sentences by converting them into *ātmanepada laṅ-lakāra* forms . ]

यथा 1. दशरथः ........ पुत्रम् ........ अकामयत ।

2. ........ अमन्त्रयत ।

3. ।

4. ।

5. ।

6. ।

7. ।

8. ।

9. ।

10. ।

11. ।

12. ।


13. ।

14. ।

## लङ्-लकारे प्रयोगाः

### लालबहादुरः

श्रीलालबहादुरशास्त्री स्वतन्त्र-भारतस्य द्वितीयः प्रधानमन्त्री आसीत्। सः वाराणस्याः समीपे मुगलसराय-जनपदे 1904 तमे ईस्वीये वर्षे अक्टूबरमासस्य द्वितीये दिनाङ्के जनिम् **अलभत**। तस्य पिता निर्धनः **अवर्तत**। अतः यथाकथञ्चित् परिवारस्य भरणपोषणम् **अकुरुत**। यदा लालबहादुरः सार्धैकवर्षीयः अभवत् तदा तस्य पिता अपि दिवंगतः। एवं तस्य बालकस्य बाल्यावस्था बहुकष्टेन अतिवाहिता अभवत्।



लालबहादुराय अध्ययनम् अतीव **अरोचत**। परन्तु पुस्तकानि लेखनसामग्रीं च क्रेतुं तस्य पार्श्वे आवश्यकं धनं न **अविद्यत**। सः कश्चिद् विद्याव्यसनी पुस्तकप्रियः च **अवर्तत**। अतः पुस्तकानि पठित्वा तस्य चेतः भृशम् **अमोदत**। परन्तु धनाभावात् पुस्तकानि क्रेतुम् असमर्थः अपि स्वाभिमानी सः न कदापि स्वसहपाठिभ्यः पुस्तकं धनं वा **अयाचत**।

जनमुखात् एवं काचन कथा श्रूयते यत् एकदा लालबहादुरः स्वमित्रैः सह मेलां द्रष्टुं गङ्गायाः पारं गतवान् आसीत्। मातुः सकाशाद् गृहीतं धनं सः मेलायाम् एव व्ययीकृतवान्। प्रत्यावर्तनकाले तस्य पार्श्वे एकः अपि कपर्दकः न **अविद्यत**। मित्रेभ्यः ऋणग्रहणं सः उचितं न **अमन्यत**। अतः सायंकाले संजाते सः नावः प्रतीक्षाम् अकृत्वा गङ्गानद्यां सन्तर्तुम् **आरभत**। तदानीं गङ्गानद्यां तीव्रः जलप्रवाहः आसीत्।

अतः तस्य मित्राणि तं तथा आचरितुं न्यवारयन् । परन्तु सः तदानीं न कस्यापि अशृणोत् । पूर्णगर्भां गङ्गानदीं तीर्त्वा एव सः गृहं प्रत्यागतवान् । एतेन तस्य दृढसंकल्पः सूचितः भवति ।

वस्तुतः लालबहादुरस्य जीवनं दुःखादेव **प्रारभत** । एवं हि श्रूयते यत् यदा सः केवलम् मासत्रयस्य शिशुः आसीत् तदानीम् एव काचित् दुर्घटना **अजायत** । लालबहादुरस्य माता रामदुलारी माघमेलावसरे गङ्गास्नानार्थं प्रयागं गतवती आसीत् । गङ्गास्नानानन्तरं नौकया गृह-प्रत्यागमनसमये लालबहादुरः मातुः हस्तात् नद्याम् एव अपतत् । माता रामदुलारी चिन्तितवती यत् तस्य पुत्रः गङ्गायां न्यमज्जत् इति । परन्तु यम् ईश्वरः रक्षति तं कः अन्यः मारयितुं शक्नोति? अन्यस्मिन् नावि उपविष्टः कश्चन कृषकः तं मज्जनात् अरक्षत् । अनपत्यः सः बालकं लालबहादुरं स्वगृहं नीतवान् । परन्तु सर्वं तथ्यं विज्ञाय सः दिनचतुष्टयानन्तरं रामदुलार्यै लालबहादुरं प्रत्यर्पितवान् ।



भारतमातुः पराधीनतां दृष्ट्वा लालबहादुरः व्यथितः आसीत् । अतः विद्याप्रियः अपि सः षोडशवर्षदेशीयः विद्यालयीयं नियमितम् अध्ययनं परित्यज्य महात्मागान्धिनः आह्वानेन असहयोगान्दोलने भागम् **अकामयत** । तस्मिन् आन्दोलनक्रमे सः कारावासम् अपि प्राप्तवान् । ततः प्रभृति सः अन्यैः देशभक्तैः सह देशस्य स्वतन्त्रतायै निरन्तरम् आङ्ग्ल-शासकैः **अयुध्यत** ।

लालबहादुरः अतीव विनम्रः, सत्यवादी, कर्मठः समाजसेवकः आसीत् । स्वतन्त्रतासमनन्तरं सः भारतीय-रेलमन्त्रिमण्डलस्य कार्यभारं गृहीतवान् । 1957 तमे च वर्षे सः गृहमन्त्री **अविद्यत** । 1964 तमे वर्षे भारतस्य प्रथमप्रधानमन्त्रिणः श्रीजवाहरलालनेहरोः मृत्योः समनन्तरं सः अस्माकं देशस्य प्रधानमन्त्री अभवत् । 1965 तमे वर्षे यदा पाकिस्तानदेशः भारतं विरुध्य **अयुध्यत** तदा पाकिस्तानस्य पराजयः अभवत् । पाकिस्तानस्य पराजयानन्तरं यदा सः सन्धिवार्तायै रूसदेशस्थे ताशकन्द-नगरे **अवर्तत** तदा हृदयगत्यवरोधात् तस्य मृत्युः **अजायत** । एतेन भारतस्य राजनीतेः आधारस्तम्भः **अकम्पत** ।

◆◆◆

## अभ्यासः — 165

1. **पाठाधारेण रिक्तस्थानानि पूरयत—**

[ पाठ के आधार पर रिक्त स्थान की पूर्ति करें। Fill in the blanks on the basis of the present lesson. ]

(i) लालबहादुरः मुगलसराय-जनपदे जनिम् ।

(ii) तस्य पिता निर्धनः ।

(iii) लालबहादुराय अध्ययनम् अतीव ।

(iv) तस्य पार्श्वे आवश्यकं धनं न ।

(v) तस्य चेतः भृशम् ।

2. **रिक्तस्थानानि पूरयत—**

[ रिक्त स्थानों की पूर्ति करें। Fill in the blanks. ]

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| (i) | **प्र. पु.** | अलभत | | |
| | **म. पु.** | | | |
| | **उ. पु.** | | | |
| (ii) | **प्र. पु.** | अजायत | | |
| | **म. पु.** | | | |
| | **उ. पु.** | | | |

3. **अधोलिखितानां धातूनां लट्-लकारे मध्यम-पुरुषे रूपाणि लिखत—**

[ अधोलिखित धातुओं के लट् लकार मध्यम पुरुष के रूप लिखें। Write the forms of the following roots in *laṭ-lakāra* second person. ]

| | लङि प्र.पु.एक. | लटि म.पु.एक. | | लङि प्र.पु.एक. | लटि म.पु.एक. |
|---|---|---|---|---|---|
| (i) | अवर्तत | वर्तसे | (ii) | अलभत | |
| (iii) | अयाचत | | (iv) | अरोचत | |
| (v) | अविद्यत | | (vi) | अजायत | |
| (vii) | अभाषत | | (viii) | अवर्धत | |
| (ix) | अमन्यत | | (x) | असेवत | |

# चतुर्थः स्तबकः

## 4.5 पञ्चमः पाठः

**[ आत्मनेपदिनः धातवः ]**

**लट्-लोट्-लृट्-लङ्-लकारेषु प्रयोगाः**

### अभयारण्यम्

अस्माकं कक्षायाः छात्राः प्रतिवर्षं कुत्रचित् पर्यटनार्थं गच्छन्ति। विगते वर्षे वयं सर्वे पर्यटनार्थं कञ्चन वनप्रदेशं गतवन्तः आस्म। तत्र अस्माकं रात्रिनिवासस्य योजना परिकल्पिता आसीत्। अस्माकं लोक-यानं यदा तत्रत्यं पथिकनिवासं प्राप्तवत् तदा अपराह्णः आसीत्। शिक्षकः अस्मान् निरदिशत्– "अद्य वयम् अस्मिन्नेव पथिकनिवासे वासं **करिष्यामहे**। इदानीम् पर्याप्तः समयः **वर्तते**। भवन्तः परितः **अवलोकन्ताम्**। परिवेशः अतीव रमणीयः **वर्तते**। सर्वत्र बहुविधाः तरवः **शोभन्ते**। पवनेन लताः **कम्पन्ते**। पक्षिणः इतस्ततः **डयन्ते**। कपयः एकस्मात् वृक्षात् वृक्षान्तरं प्रति **कूर्दन्ते**।



वस्तुतः एतस्य अरण्यस्य परिवेशः न केवलं पशूनां पक्षिणां च कृते किन्तु वृक्षाणां, लतानां, सस्यानां च कृते अपि स्वास्थ्यकरः **वर्तते**। अत्रत्यां शान्तिं भङ्क्तुम् अस्माकम् अधिकारः न **विद्यते**। अतः यूयम् अत्र कोलाहलं मा **कुरुध्वम्**। एतस्मिन् अरण्ये पशवः पक्षिणश्च स्वेच्छया **विहरन्ते**। स्वच्छन्दविहारेण तेषां मनांसि **रमन्ते**। बहुविधाः वृक्षाः लताः च अत्र स्वयम् **उत्पद्यन्ते**, **वर्धन्ते** तथा च यथासमयं **विशीर्यन्ते** अपि।



अनेकविधानि अमूल्यानि सस्यानि अत्र **वर्तन्ते**। अरण्यवासिनः एतानि सस्यानि सङ्गृह्य स्वजीविकां निर्वहन्ति। यूयं सर्वं सावधानम् **ईक्षध्वं** शान्तिं च रक्षितुं **प्रयतध्वम्**।

इतः अनतिदूरे एव अभयारण्यम् **आस्ते**। शासनं वनानि वन्यपशून् च संरक्षितुं विशेषतः **प्रयतते**। श्वः वयं तत् अभयारण्यम् **ईक्षिष्यामहे**। तत्र व्याघ्राः, सिंहाः, हरिणाः, भल्लुकादयश्च निवसन्ति। हंसादयः सरांसि **गाहन्ते**। वयं तान् सर्वान् **अवलोकिष्यामहे**, आनन्दं च **लप्स्यामहे**"।

किञ्चित्कालानन्तरं रात्रिः **अजायत**। पाचकः पाकं समाप्य भोजनाय अस्मान् आहूतवान्। भोजनं कृत्वा अस्मासु केचन अचिरादेव **अशेरत**। वयं च केचन बहिः उपविश्य आकाशम् **ऐक्षामहि**। नभसि नक्षत्राणि **व्यराजन्त**। खद्योताः **अद्योतन्त**। रात्रेः रमणीयं दृश्यं दृष्ट्वा अस्माकं मनस्सु आनन्दतरङ्गाः **उदपद्यन्त**। दिनद्वयानन्तरं वयं ततः **न्यवर्तामहि**। अयं वनप्रवासः सर्वेभ्यः भृशम् **अरोचत**।

◆◆◆

## अभ्यासः – 166

1. **पाठाधारेण उत्तराणि लिखत–**
   [ पाठ के आधार पर उत्तर लिखें। Answer on the basis of the present lesson. ]

(i) अरण्यं के सेवन्ते ? ।
(ii) शासनं किं कर्तुं प्रयतते ? ।
(iii) नभसि कानि व्यराजन्त ? ।
(iv) वने के कूर्दन्ते, के च डयन्ते ? ।
(v) किं कर्तुम् अस्माकम् अधिकारः न विद्यते ? ।

2. **अधोभागे दत्तानां क्रियापदानाम् एकवचनरूपं लिखत–**
   [ नीचे दिये गये क्रियापदों के एकवचन रूप लिखें। Write the singular forms of the verbal words given below.]

(i) शोभन्ते – । (ii) वर्तन्ते – ।
(iii) कम्पन्ते – । (iv) प्रयतन्ते – ।
(v) सेवन्ते – । (vi) विराजन्ते – ।
(vii) कूर्दन्ते – । (viii) द्योतन्ते – ।
(ix) डयन्ते – । (x) रमन्ते – ।

3. **समानार्थानाम् अन्येषां क्रियापदानां वर्तमाने प्रथम-पुरुष-एकवचन-रूपाणि लिखत–**
   [ समानार्थक अन्य क्रियापदों के वर्तमान काल में प्रथम पुरुष एकवचन रूप लिखें। Write the present tense third person singular forms of other verbs denoting similar sense. ]

(i) शोभते – । (राज्)
(ii) वर्तते – । (विद्य)
(iii) अवलोकते – । (ईक्ष्)
(iv) जायते – । (उत्-पद्-य)
(v) एधते – । (वर्ध्)

**4. अधोनिर्दिष्टक्रियापदानां लोट्लकाररूपं भविष्यत्कालरूपं च उदाहरणे दर्शितेन क्रमेण लिखत–**

[ अधोनिर्दिष्ट क्रियापदों का प्रार्थनारूप और भविष्यकाल रूप उदाहरण के अनुसार लिखें। Write the *prārthanā* as well as future forms of the following verbal forms. ]

| | | | प्रार्थनायाम् | भविष्यति |
|---|---|---|---|---|
| उदा. | शोभते | – | **शोभताम्** | **शोभिष्यते** |
| (i) | कम्पते | – | | |
| (ii) | वर्धते | – | | |
| (iii) | राजते | – | | |
| (iv) | कुरुते | – | | |
| (v) | निवर्तते | – | | |
| (vi) | चिन्तयते | – | | |
| (vii) | धरते | – | | |
| (viii) | कूर्दते | – | | |
| (ix) | सेवते | – | | |
| (x) | प्रयतते | – | | |

**5. अधोलिखितानां पदानां सामञ्जस्यं रेखया निर्दिशत–**

[ अधोलिखित पदों का सामञ्जस्य रेखा के द्वारा निर्देश करें। Point out the word relating the other through a line. ]

| | | | |
|---|---|---|---|
| उदा. (i) | पक्षिणः | | वर्धन्ते |
| (ii) | नक्षत्राणि | | डयन्ते |
| (iii) | कपयः | | द्योतन्ते |
| (iv) | सस्यानि | | कूर्दन्ते |
| (v) | विद्युतः | | विराजन्ते |

**6. यदि यूयं वनं गमिष्यथ तर्हि किं करिष्यध्वे–**

[ यदि आप वन जायेंगे तो क्या करेंगे। What you will do if you will go to the forest. ]

उदा. वयं पशुपक्षिणः (अवलोक) **अवलोकिष्यामहे** ।

| | | | |
|---|---|---|---|
| (i) | वयम् आनन्दम् | (लभ्) | । |
| (ii) | वयम् अरण्ये | (कूर्द्) | । |
| (iii) | वयं वृक्षस्य अधः वारं | (कृ) | । |
| (iv) | वयं शान्तिं रक्षितुं | (प्र + यत्) | । |
| (v) | वयम् एकदिनस्य अनन्तरं | (नि + वृत्) | । |

## 7. आदेशवाक्यानि लिखत–

[ आदेश वाक्य लिखें। Write the sentences denoting command. ]

| | | | |
|---|---|---|---|
| उदा. | यूयं वस्त्राणि | (धृ) | **धरध्वम्** । |
| (i) | यूयं मा | (कूर्द्) | । |
| (ii) | यूयम् उत्तमवायुं | (सेव्) | । |
| (iii) | यूयम् अरण्ये | (रम्) | । |
| (iv) | यूयम् अभयारण्यम् | (ईक्ष्) | । |
| (v) | यूयं जलं | (गाह्) | । |
| (vi) | यूयं भीत्या मा | (कम्प्) | । |
| (vii) | यूयं सर्वत्र | (वि + हृ) | । |
| (viii) | यूयं शीघ्रं | (नि + वृत्) | । |
| (ix) | यूयं शान्तिं रक्षितुं | (प्र + यत्) | । |
| (x) | यूयं सिंहम् | (अव + लोक्) | । |

## 8. उदाहरणानुसारम् अखण्डं क्रियापदं लिखत–

[ उदाहरण के अनुसार अखण्ड क्रियापद लिखें। Write impartible verbal forms as shown in the example. ]

उदा. प्रयत्नं करोति = **प्रयतते** ।

| | | | | | |
|---|---|---|---|---|---|
| (i) | कूर्दनं करोति = | । | (ii) | सेवनं करोति = | । |
| (iii) | शयनं करोति = | । | (iv) | चिन्तनं करोति = | । |
| (v) | ईक्षणं करोति = | । | (vi) | विहारं करोति = | । |
| (vii) | डयनं करोति = | । | (viii) | अवलोकनं करोति = | । |
| (ix) | आस्वादनं करोति = | । | (x) | गाहनं करोति = | । |

**9. अधोनिर्दिष्टक्रियापदानां भूतकाले प्रथमपुरुषस्य एकवचनान्तरूपं बहुवचनान्तरूपं च लिखत—**

[ अधोनिर्दिष्ट क्रियापदों के भूतकाल में प्रथम पुरुष के एकवचनान्त तथा बहुवचनान्त रूप लिखें। Write the first person singular and plural forms in the past tense of the following verbal forms. ]

| | | | अयतत | अयतन्त |
|---|---|---|---|---|
| उदा. | यतते | – | | |
| (i) | सेवते | – | | |
| (ii) | धरते | – | | |
| (iii) | राजते | – | | |
| (iv) | कम्पते | – | | |
| (v) | विद्यते | – | | |
| (vi) | कूर्दते | – | | |
| (vii) | गाहते | – | | |
| (viii) | द्योतते | – | | |
| (ix) | रोचते | – | | |
| (x) | वर्धते | – | | |

**10. अधोलिखितानां क्रियापदानां लोट्-लृट्-लङ्-लकारेषु प्रथमपुरुषस्य एकवचनरूपाणि लिखत—**

[ अधोलिखित क्रियापदों के लोट्, लृट् एवं लङ् लकारों के प्रथमपुरुष एकवचन रूपों को लिखें । Write the first person singular forms in *Loṭ, Lṛṭ* and *Laṅ* of the following. ]

| | | लोटि | लृटि | लङि |
|---|---|---|---|---|
| (i) | लभते | | | |
| (ii) | सेवते | | | |
| (iii) | जायते | | | |
| (iv) | वर्तते | | | |
| (v) | कुरुते | | | |

## आत्मनेपदिनः विशेषधातवः (लट्)

**अस्मिन् पाठे प्रयुक्तानां केषाञ्चन धातूनां रूपाणि सम्यक् अवधातव्यानि–**
[ इस पाठ में आये हुए कुछ धातुओं के रूप अवधान करने योग्य हैं। The verbal forms of some of the roots used in this lesson are to be observed specifically. ]

**'शीङ्'-धातुः**

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | शेते | शयाते | शेरते |
| **म. पु.** | शेषे | शयाथे | शेध्वे |
| **उ. पु.** | शये | शेवहे | शेमहे |

**'कृ'-धातुः**

| | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **प्र. पु.** | कुरुते | कुर्वाते | कुर्वते |
| **म. पु.** | कुरुषे | कुर्वाथे | कुरुध्वे |
| **उ. पु.** | कुर्वे | कुर्वहे | कुर्महे |

**एतानि वाक्यानि सावधानं पठत–**
[ इन वाक्यों को ध्यान से पढ़ें। Read these sentences carefully. ]

रमेशः ओदनं भुङ्क्ते।

आपणिकः वस्तूनि विक्रीणीते।

आवां साधनानि उपयुञ्ज्वहे।

शैवाः शिवम् उपासते।

अहं तव शुभम् आशासे।

श्रान्ताः जनाः शीघ्रं शेरते।

छात्राः संस्कृतम् अधीयते।

वयं संस्कृतं सरलं मन्महे।

यूयम् अधुना किमर्थं शेध्वे।

वयं सात्त्विकम् अन्नं भुञ्ज्महे।

**उपर्युक्तेषु वाक्येषु प्रयुक्तानां क्रियारूपाणां प्राक्तनेषु पाठेषु प्रयुक्तानाम् आत्मनेपदिक्रियारूपाणां च कश्चन भेदः अस्ति। अनया दृष्ट्या एतानि क्रियापदरूपाणि सम्यक् स्मरत–**

[ उपर्युक्त वाक्यों में प्रयुक्त क्रियापदों का पूर्व पाठ में प्रयुक्त आत्मनेपदी क्रियापदों से कुछ भेद है। उस दृष्टि से इन क्रियापदों का स्मरण करें। The verbal forms used in the above sentences differ from the *ātmanepadi* verbal forms used in the previous lesson. Remember the verbal paradigm from this point of view. ]

**लभ्-धातुः**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र. पु.** | लभते | लभेते | लभन्ते |
| **म. पु.** | लभसे | लभेथे | लभध्वे |
| **उ. पु.** | लभे | लभावहे | लभामहे |

**आस्-धातुः**

| | | | |
|---|---|---|---|
| **प्र. पु.** | आस्ते | आसाते | आसते |
| **म. पु.** | आस्से | आसाथे | आध्वे |
| **उ. पु.** | आसे | आस्वहे | आस्महे |

**तन्-धातुः**

| | | | |
|---|---|---|---|
| **प्र. पु.** | तनुते | तन्वाते | तन्वते |
| **म. पु.** | तनुषे | तन्वाथे | तनुध्वे |
| **उ. पु.** | तन्वे | तन्वहे | तन्महे |

**इङ्-धातुः**

| | | | |
|---|---|---|---|
| **प्र. पु.** | अधीते | अधीयाते | अधीयते |
| **म. पु.** | अधीषे | अधीयाथे | अधीध्वे |
| **उ. पु.** | अधीये | अधीवहे | अधीमहे |

**युज्-धातुः**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र. पु.** | युङ्क्ते | युञ्जाते | युञ्जते |
| **म. पु.** | युङ्क्षे | युञ्जाथे | युङ्ग्ध्वे |
| **उ. पु.** | युञ्जे | युञ्ज्वहे | युञ्ज्महे |

**मन्-धातुः**

| | | | |
|---|---|---|---|
| **प्र. पु.** | मनुते | मन्वाते | मन्वते |
| **म. पु.** | मनुषे | मन्वाथे | मनुध्वे |
| **उ. पु.** | मन्वे | मन्वहे | मन्महे |

**(वि)क्री-धातुः**

| | | | |
|---|---|---|---|
| **प्र. पु.** | विक्रीणीते | विक्रीणाते | विक्रीणते |
| **म. पु.** | विक्रीणीषे | विक्रीणाथे | विक्रीणीध्वे |
| **उ. पु.** | विक्रीणे | विक्रीणीवहे | विक्रीणीमहे |

**भुज्-धातुः**

| | | | |
|---|---|---|---|
| **प्र. पु.** | भुङ्क्ते | भुञ्जाते | भुञ्जते |
| **म. पु.** | भुङ्क्षे | भुञ्जाथे | भुङ्ग्ध्वे |
| **उ. पु.** | भुञ्जे | भुञ्ज्वहे | भुञ्ज्महे |

## अभ्यासः — 167

**कोष्ठके प्रदत्तस्य धातोः उचितेन रूपेण रिक्तस्थानानि पूरयत—**

[ कोष्ठक में प्रदत्त धातु के उचित रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the appropriate form of the following roots given in the bracket. ]

**उदा.** बालः सुखेन ......**शेते**...... । (शीङ्)

1. त्वं कुत्र ____ । (आस्)
2. अहं स्ववाहनं ____ । (वि + क्री)
3. जनाः संस्कृतं सरलम् इति ____ । (मन्)
4. एतद्विषये त्वं किं ____ । (मन्)
5. युवां प्रतिदिनं प्रातः किं ____ । (भुज्)
6. आवां भोजने शाकानि उप ____ । (उप + युज्)
7. वयम् आनन्देन संस्कृतम् ____ । (अधि + इङ्)
8. भवन्तः किम् एतत् ____ । (मनु)
9. अहम् इदानीं ____ । (शीङ्)

## लकाराः

☞ **प्रथमदीक्षायां वयं वर्तमानकालं, भूतकालं, भविष्यकालं च ज्ञातवन्तः। संस्कृतभाषायां–**
वर्तमानकालं सूचयितुं '**लट्**' इति लकारस्य
भूतकालं सूचयितुं '**लङ्**' इति लकारस्य
भविष्यत्कालं सूचयितुं '**लृट्**' इति लकारस्य तथा
प्रार्थनाद्यर्थं सूचयितुं '**लोट्**' इति लकारस्य च प्रयोगः भवति।

☞ **स्थूलाक्षरैः मुद्रितान् एतान् उपर्युक्तान् शब्दान् पश्यत। तेषां सर्वेषाम् आदौ सामान्यरूपेण 'ल्' अस्ति। अतः एते 'लकाराः' इति व्यवहरामः। यथा– लट्-लकारः, लिट्-लकारः, लिङ्-लकारः इति।**

☞ लकाराः दश सन्ति–
**लट्, लिट्, लुट्, लृट्, लोट्, लङ्, विधिलिङ्, आशीर्लिङ्, लुङ्, लृङ्** इति।
[ एकैकस्य अपि क्रियापदस्य एते दश लकाराः भवन्ति। लकारानुगुणं रूपभेदः भवति। ]

वयं प्राक्तन(प्रथम)दीक्षायां परस्मैपदि-धातूनां लट्, लृट्, लोट्, लङ् इत्येतेषां चतुर्णां लकाराणां परिचयं प्राप्तवन्तः।

**तद्यथा**

### 'पठ्'-धातोः रूपाणि

| | | | | |
|---|---|---|---|---|
| **लटि** (वर्तमाने) | – | पठति | पठतः | पठन्ति |
| **लृटि** (भविष्यत्काले) | – | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| **लोटि** (प्रार्थनादिषु) | – | पठतु | पठताम् | पठन्तु |
| **लङि** (भूतकाले) | – | अपठत् | अपठताम् | अपठन् |

☞ अवशिष्टानां लकाराणां रूपाणि अग्रिमदीक्षासु ज्ञास्यामः। आत्मनेपदिनां धातूनां लट्लकाररूपम् अपि वयं ज्ञातवन्तः। **तद्यथा** मोदते, मोदेते, मोदन्ते। आत्मनेपदिनां लोट्, लङ्, लृट् इत्येतान् लकारान् अपि ज्ञातवन्तः। आत्मनेपदिनाम् अन्यलकाराणां रूपाणि अग्रिमदीक्षासु ज्ञास्यामः।

## अभ्यासः — 168

✍ **अधोनिर्दिष्टानां क्रियारूपाणां लकारं निर्दिशत—**

[ अधोनिर्दिष्ट क्रिया रूपों के लकारों का निर्देश करें। Point out the *moods* of the following verbal forms. ]

उदा. अपठत् ( **लङ्लकारः** )

1. पठिष्यति ( )
2. ज्ञास्यति ( )
3. उपविशतु ( ............ )
4. मोदते ( )
5. अवदत् ( )
6. याचन्ते ( )
7. प्रार्थये ( )
8. अभवन् ( )
9. गमिष्यामि ( ............ )
10. नयन्तु ( )
11. अक्रीडम् ( )
12. धावतः ( )
13. पूजयन्ति ( )
14. वन्दे ( )
15. नमामः ( )
16. युध्यन्ते ( )

**सुभाषितेषु आत्मनेपदिनां धातूनां प्रयोगाः**

## सुभाषितानि

अपारे काव्य-संसारे कविरेकः प्रजापतिः ।
यथाऽस्मै **रोचते** विश्वं तथेदं **परिवर्त्तते** ॥

रूपयौवन-सम्पन्ना विशाल-कुल-सम्भवाः ।
विद्या-हीना न **शोभन्ते** निर्गन्धा इव किंशुकाः ॥

मृत्युकाले यथा मर्त्यो विपरीतानि **सेवते** ।
मुमूर्षूणां हि सर्वेषां यत्पथ्यं तन्न **शोभते** ॥

नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् ।
शाखिनोऽन्ये **विराजन्ते खण्ड्यन्ते** चन्दनद्रुमाः ॥

यत् करोषि यदश्नासि यज्जुहोसि ददासि यत् ।
यत् तपस्यसि कौन्तेय तत् **कुरुष्व** मदर्पणम् ॥

माता निन्दति नाभिनन्दति पिता भ्राता न **सम्भाषते**
भृत्यः कुप्यति नानुगच्छति सुतः कान्ता च **नालिङ्गते** ।
अर्थप्रार्थनशङ्कया न **कुरुते** सम्भाषणं वै सुहृत्
तस्माद् द्रव्यमुपार्जयस्व सुमते ! द्रव्येण सर्वे वशाः ॥

एक एव खगो मानी वने वसति चातकः ।
पिपासितो **म्रियते** वा **याचते** वा पुरन्दरम् ॥

आहारं न करोति नाम्बु पिबति स्त्रैणं न **संसेवते**
**शेते** यत् सिकतासु मुक्तविषयश्चण्डातपं **सेवते**।
त्वत्पादाब्जरजःप्रसादकणिकालाभोन्मुखस्तन्मरौ
**मन्ये** मालवसिंहगूर्जरपतिस्तीव्रं **तपस्तप्यते**॥

मनोरथानामगतिर्न **विद्यते**।

न कामवृत्तिर्वचनीय**मीक्षते**।

◆◆◆

## कथायां आत्मनेपदिनां धातूनां प्रयोगाः

### गुरुभक्तः उपमन्युः

उपमन्युः ऋषेः धौम्यस्य अन्यतमः शिष्यः अवर्तत। तम् आहूय एकदा गुरुः धौम्यः आदिशत्– 'गाः सेवस्व'। गुरोः आज्ञया उपमन्युः गोसेवायां प्रावर्तत। सः अहनि गाः सेवित्वा सायं गुरुगृहम् आगत्य उपाध्यायस्य अग्रतः स्थित्वा तम् अवन्दत। तं पीनं दृष्ट्वा उपाध्यायः अभाषत– 'वत्स ! केन वृत्तिं कल्पयसि? दृढः, पीनः च असि ? सः उपाध्यायं प्रत्यभाषत– भोः आचार्य ! भिक्षया वृत्तिं कल्पयामि' इति। तम् उपाध्यायः पुनः अभाषत– 'मयि अनिवेद्य भैक्ष्यम् उपयुङ्क्षे, तथा मा कुरुष्व ! 'यथा आज्ञापयति गुरुः' इति उक्त्वा सः भिक्षां



चरित्वा उपाध्यायाय न्यवेदयत। उपाध्यायः तस्मात् सर्वं भैक्षम् अगृह्णात्। उपमन्युः 'तथा' इति उक्त्वा पुनः गाः असेवत। अहनि गाः रक्षित्वा निशामुखे गुरुकुलम् आगम्य गुरोः अग्रतः स्थित्वा पुनः तम् अवन्दत। उपाध्यायः धौम्यः तं पुनरपि पीवानम् एव दृष्ट्वा अपृच्छत्– 'वत्स ! उपमन्यो ! सम्पूर्णां भिक्षाम् अहं गृह्णामि। केन इदानीं वृत्तिं कल्पयसि ?' सः प्रत्यवदत्– 'भवते प्रथमां भिक्षां समर्प्य पुनः अपरां भिक्षां चरामि। तया वृत्तिं कल्पयामि' इति। एवं श्रुत्वा उपाध्यायः प्रत्यकथयत्– 'एषा वृत्तिः तु उचिता नास्ति। एवं कृत्वा त्वं भिक्षाम् आश्रितानाम् अन्येषां वृत्तिं बाधसे। पुनः एवं न आचर'। उपमन्युः 'तथा' इति उक्त्वा पुनः गाः असेवत। सायं पुनः उपाध्यायस्य गृहम् आगच्छत्। तस्य अग्रतः प्रणतिम् अकुरुत।

कतिपयेभ्यः दिवसेभ्यः परम् उपाध्यायः तं पुनरपि तथा एव पीनम् आलोक्य अपृच्छत्– 'वत्स ! उपमन्यो! अहं तव सर्वं भैक्ष्यं गृह्णामि, अन्यत् अपि भैक्ष्यं न चरसि, कथं पीवरः असि ? केन वृत्तिं कल्पयसि'। उपमन्युः उपाध्यायं प्रत्यवदत्– 'भोः ! एतासां गवां पयसा वृत्तिं कल्पयामि'। उपाध्यायः अकथयत्– 'न एतत् न्याय्यम्। एतासां गवां पयः उपयोक्तुं त्वाम् अहं न आदिशम्। एतासां पयः मा उपयुङ्क्ष्व' इति। सः 'तथा' इति प्रतिज्ञाय गाः रक्षन् आस्त। दिवसे सः गाः चारयित्वा सायं उपाध्यायगृहम् आगत्य अग्रतः स्थित्वा वन्दते। पुनः उपाध्यायः तं स्थूलम् एव दृष्ट्वा अवदत्– 'वत्स ! उपमन्यो ! भैक्ष्यं न भुङ्क्षे, न च अन्यत् चरसि, पयः अपि न पिबसि, तथापि पीवरः विद्यसे। केन इदानीं वृत्तिं कल्पयसि'। सः प्रत्यवदत्– 'भो ! गोदुग्धस्य फेनम् उपयुञ्जे, यं फेनम् इमे वत्साः मातृणां स्तनान् पिबन्तः उद्गिरन्ति'। तत् श्रुत्वा उपाध्यायः प्रत्यभाषत– 'एते गुणवन्तः वत्साः त्वदर्थं प्रभूततरं फेनम् उद्गिरन्ति। एवम् एतेषां वत्सानां वृत्तिं बाधसे। अतः भवान् फेनम् अपि पातुं न अर्हति'। उपमन्युः 'तथा' इति प्रतिश्रुत्य पुनः गोसेवायां प्रावर्तत। एवं प्रकारेण प्रतिषिद्धः उपमन्युः भैक्ष्यं न भुङ्क्ते, अन्यत् भैक्ष्यम् अपि न चरति, पयः अपि न पिबति, फेनम् अपि न उपयुङ्क्ते। सः कदाचित् क्षुधार्तः अरण्ये अर्कपत्राणि अभक्षयत्। अर्कपत्राणां भक्षणेन उपमन्योः चक्षुषोः ज्योतिः नष्टम्। सः अन्धः अजायत। ततः सः वने परिभ्रमन् कूपे पतितः।



अथ सायंकाले उपमन्युम् अप्राप्य उपाध्यायः शिष्यान् अपृच्छत्– 'उपमन्युः कुत्र अस्ति ?'। शिष्याः अवदन्– 'गाः चारयितुं वनं गतः। इदानीं न प्रत्यागतवान्'। सर्वतः आहारात् प्रतिषिद्धः उपमन्युः कदाचित् कुपितः। अतः आश्रमं न आगच्छति इति विचार्य उपाध्यायः शिष्यैः सह अरण्यम् अगच्छत्। तत्र गत्वा 'भोः उपमन्यो ! क्व असि वत्स !' इति शब्दम् अकरोत्। उपमन्युः उपाध्यायस्य वचनं श्रुत्वा उच्चैः अभाषत– 'अयम् अहम् अस्मिन् कूपे अपतम्'। उपाध्यायः अपृच्छत्– 'कथं त्वम् अस्मिन् कूपे पतितवान्' ? सः उपाध्यायं प्रत्यवदत्– 'अर्कपत्राणि भक्षयित्वा अन्धीभूतः कूपे पतितवान् अस्मि'। ततः उपमन्युः उपाध्यायस्य निर्देशेन नैकाभिः स्तुतिभिः अश्विनीकुमारौ अवन्दत। उपमन्योः गुरुभक्त्या प्रसन्नौ अश्विनीकुमारौ तत्र आगतौ। प्रीतौ च अश्विनीकुमारौ तस्मै एकम् अपूपम् दत्त्वा अवदतम्– 'एषः अपूपः तुभ्यम् अस्ति, एनं भुङ्क्ष्व' इति। उपमन्युः प्रत्यवदत्– 'गुरवे अनिवेद्य एतम् अपूपम् अहम् उपयोक्तुं न उत्सहे'। तस्य गुरुभक्त्या अतीव प्रसन्नौ अश्विनीकुमारौ तस्मै आशीः दत्तवन्तौ– 'त्वं चक्षुषी लभस्व, श्रेयः च लभस्व' इति। सः तयोः आशिषा चक्षुषी अलभत सर्ववेदेषु सर्वविद्यासु च नैपुण्यम् अलभत। सत्यम् एव उच्यते - 'गुरुशुश्रूषया विद्या' इति।

◆◆◆

# चतुर्थः स्तबकः

## 4.6 षष्ठः पाठः

[ उपसर्गाः ]

**एतानि वाक्यानि पठत–**

[ इन वाक्यों को पढ़ें। Read these sentences. ]


**उपसर्ग-प्रयोगाः**



भक्तः देवं **नमति।**




भक्तः देवं **प्रणमति।**




बालः अजां **कर्षति।**



बालः अजाम् **आकर्षति।**



छात्रः गुरुं **पृच्छति।**



छात्रः गुरुं **परिपृच्छति।**



कृष्णः वस्त्रं **हरति।**



राजा शत्रून् **संहरति।**



बालिका जलं **नयति**।



बालिका जलम् **आनयति**।



बालकः विद्यालयं **गच्छति**।



बालकः गृहं **प्रत्यागच्छति।**



प्रावृट्सु वृष्टिः **भवति**।



हिमालयात् गङ्गा **प्रभवति**।

## अधोनिर्दिष्टानि वाक्यानि पठत–

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences . ]

सुधीरः देवं **प्रणमति** ।
दुर्योधनः गदायुद्धेन शत्रुं **पराभवति** ।
दुर्जनः सदा **अपकरोति** ।
राधा तारया **सम्मिलति** ।
राघवः पितरम् **अनुगच्छति** ।
सेवकः **अवनमति** ।
रुग्णः कष्टेन **निःश्वसिति** ।
वृद्धः ग्रामात् **निर्गच्छति** ।
दुर्जनः सज्जनैः सह **दुर्व्यवहरति** ।
जनः नदीं **सन्तरति** ।
कविः काव्यं **विलिखति** ।
पण्डितः शिष्यम् **आह्वयति** ।
मन्दिरे घण्टा **निनदति** ।

वैरी राज्यम् **अतिक्रामति** ।
शिवः कैलासम् **अधिवसति** ।
रमाकान्तः द्वारम् **(अ)पिदधाति** ।
कविः कवितां **सुलिखति** ।
सा प्रातः शीघ्रम् **उत्तिष्ठति** ।
कृष्णः केशवम् **अभिजानाति** ।
राकेशः मित्रं **प्रतिवदति** ।
छात्रः गुरुम् **अभिवन्दते** ।
देवः ग्रामात् **निवर्तते** ।
पिता ग्रामात् **प्रत्यावर्तते** ।
आपणिकः वस्तूनि **विक्रीणीते** ।
दुष्टः नियमम् **उल्लङ्घते** ।
रामः रावणं **परिभवति** ।

☞ उपर्युक्तानि वाक्यानि परिशीलयत। तत्र यानि क्रियापदानि प्रयुक्तानि तानि उपसर्गयुक्तानि सन्ति।

☞ प्र इत्यादयः अधोलिखिताः द्वाविंशतिः(22) शब्दाः (प्रादयः) क्रियायोगे उपसर्ग-पदेन व्यवहृताः भवन्ति–

⇨ प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अति, अपि, सु, उत्, अभि, प्रति, परि, उप।

☞ **उपसर्गसम्बद्धाः नियमाः–**

⇨ **उपसर्गाः धातोः पूर्वं भवन्ति–**

| | | | | | |
|---|---|---|---|---|---|
| **उदा.** | आ | + | गम् | = | आगच्छति । |
| | परि | + | हृ | = | परिहरति । |
| | अनु | + | वद् | = | अनुवदति । |
| | अधि | + | स्था | = | अधितिष्ठति । |

⇨ **उपसर्गयोगेन क्वचित् धात्वर्थः परिवर्तितः भवति–**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **उदा.** | उप | + | कृ | = | उपकरोति। | = | उपकारं करोति। |
| | अनु | + | कृ | = | अनुकरोति। | = | अनुकरणं करोति। |
| | अप | + | कृ | = | अपकरोति | = | अपकारं करोति। |
| | आ | + | गम् | = | आगच्छति | = | आगमनं करोति। |

⇨ **क्वचित् धात्वर्थस्य परिवर्तनं नैव भवति–**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **उदा.** | नमति | = | प्र | + | नम् | = | प्रणमति |
| | याति | = | प्र | + | या | = | प्रयाति |

⇨ **क्वचित् द्वित्राः उपसर्गाः अपि धातुना सह युक्ताः भवन्ति–**

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| **उदा.** | निर् | + | आ | + | | | | | कृ | = | निराकरोति |
| | प्रति | + | आ | + | | | | | गम् | = | प्रत्यागच्छति |
| | सम् | + | उत् | + | आ | + | | | हृ | = | समुदाहरति |
| | प्रति | + | उत् | + | आ | + | | | हृ | = | प्रत्युदाहरति |
| | सम् | + | अभि | + | वि | + | आ | + | हृ | = | समभिव्याहरति |

## अभ्यासः – 169

✍ **सोपसर्ग-धातूनां लट्लकाररूपाणि लिखत–**

[ उपसर्ग सहित धातुओं के लट्-लकार रूप लिखें। Write the present tense forms of the roots preceded by *upasarga*. ]

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| **यथा** | वि + लिख् = | **विलिखति** | | 8. | नि | + | विद (णिच्) | = | |
| 1. | प्रति + गम् = | | | 9. | आ | + | नी | = | |
| 2. | परि + पृच्छ् = | | | 10. | निर् | + | गम् | = | |
| 3. | अनु + गृह् = | | | 11. | अव | + | गम् | = | |
| 4. | अधि + स्था = | | | 12. | परि | + | पाल् | = | |
| 5. | सम् + सूच् = | | | 13. | अप | + | सृ | = | |
| 6. | उप + विश् = | | | 14. | उत् | + | नी | = | |
| 7. | आ + (ह्वे) ह्वय् = | | | 15. | अनु | + | वद् | = | |

## अभ्यासः — 170

**उपसर्गयोगे लटः रूपाणि**

✍ **उदाहरणानुगुणं वाक्यानि पूरयत—**

[ उदाहरणानुसार वाक्य पूरा करें। Complete the sentences as shown in the example.]

| | | | |
|---|---|---|---|
| **यथा** | बालकः शिक्षकं | ....**परिपृच्छति**.... । | (परि + पृच्छ्) |
| 1. | सज्जनः जनान् | । | (उप + कृ) |
| 2. | जनकः पुत्रम् | । | (आ + ह्वय्) |
| 3. | कृपणः धनं | । | (सम् + गृह्) |
| 4. | कुमारः विदेशात् | । | (निर् + गम्) |
| 5. | बालाः उद्याने | । | (वि + हृ) |
| 6. | छात्रः परीक्षायाम् अधिकान् अङ्कान् | । | (प्र + आप्) |
| 7. | सर्पः वल्मीकात् | । | (निस् + सृ) |
| 8. | शरीरात् स्वेदः | । | (प्र + भू) |
| 9. | गङ्गा हिमालयात् | । | (प्र + वह्) |
| 10. | भक्तः देवं भक्त्या | । | (प्र + नम्) |
| 11. | बालः पुस्तकं स्यूते | । | (नि + क्षिप्) |
| 12. | रजकी वस्त्रं | । | (प्र + क्षाल्) |
| 13. | सेवकः भारम् | । | (उत् + नी) |
| 14. | देवः भक्तम् | । | (अनु + गृह्) |
| 15. | छात्रः शिक्षकं | । | (परि + पृच्छ्) |
| 16. | शिष्यः पाठम् | । | (अनु + वद्) |
| 17. | विष्णुः क्षीरसागरम् | । | (अधि + वस्) |
| 18. | वरुणः पर्वतम् | । | (आ + रुह्) |
| 19. | सेवकः द्वारं | । | (अपि + धा) |
| 20. | व्याधः धान्यं | । | (वि + कृ) |

## अभ्यासः — 171

✍ **उदाहरणानुगुणम् उपसर्गं क्रियया योजयत—**

[ उदाहरण के अनुसार उपसर्गों को क्रिया से जोड़े। Add the preposition with the verbal form as shown in the example. ]

| | | | | | |
|---|---|---|---|---|---|
| **यथा** | आ | + | अगच्छत् | = | **आगच्छत्** । |
| 1. | आ | + | अनयत् | = | । |
| 2. | आ | + | अहरत् | = | । |
| 3. | आ | + | अरोहत् | = | । |
| 4. | उत् | + | अपतत् | = | **उदपतत्** । |
| 5. | उत् | + | अगच्छत् | = | । |
| 6. | उत् | + | अतिष्ठत् | = | । |
| 7. | अनु | + | अगच्छत् | = | **अन्वगच्छत्** । |
| 8. | अनु | + | असरत् | = | । |
| 9. | अनु | + | अकरोत् | = | । |
| 10. | अनु | + | अधावत् | = | । |
| 11. | प्र | + | अविशत् | = | **प्राविशत्** । |
| 12. | प्र | + | अहरत् | = | । |
| 13. | प्र | + | अक्षालयत् | = | । |
| 14. | वि | + | अलिखत् | = | **व्यलिखत्** । |
| 15. | वि | + | अहरत् | = | । |
| 16. | वि | + | अस्मरत् | = | । |
| 17. | परि | + | अहरत् | = | **पर्यहरत्** । |
| 18. | परि | + | अत्यजत् | = | । |
| 19. | परि | + | अनयत् | = | । |
| 20. | परि | + | अपीडयत् | = | । |
| 21. | नि | + | अपतत् | = | **न्यपतत्** । |
| 22. | नि | + | अक्षिपत् | = | । |
| 23. | अव | + | अनमत् | = | **अवानमत्** । |
| 24. | अव | + | अकरोत् | = | । |
| 25. | अव | + | अगच्छत् | = | । |

**उपसर्गयोगे लङ्-लकारे रूपाणि**

## अधोनिर्दिष्टानि वाक्यानि पठत–

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

महाराजः सैनिकं **प्रत्यवदत्**।

योगी सचिवस्य वचनं **निराकरोत्**।

वृद्धः द्वारम् **उदघाटयत्**।

शृगालः सिंहाय **न्यवेदयत्**।

शिष्यः गुरोः आदेशं **पर्यपालयत्**।

☞ उपरि कानिचन उपसर्गयुक्तानि क्रियापदानि लङ्लकारे निर्दिष्टानि।

☞ लङ्-लकारे यदा धातवः उपसर्गयुक्ताः भवन्ति, तदा सन्धिदृष्ट्या किञ्चित् परिवर्तनं भवति।

**यथा**

| लट्-लकारे | | | | | लङ्-लकारे | | | | |
|---|---|---|---|---|---|---|---|---|---|
| प्रति | + | वदति | = | प्रतिवदति | प्रति | + | अवदत् | = | प्रत्यवदत् |
| | | | | | (इ | + | अ | = | य) |
| उत् | + | घाटयति | = | उद्घाटयति | उत् | + | अघाटयत | = | उदघाटयत् |
| | | | | | (त् → द् | + | अ | = | द) |

## अभ्यासः — 17.2

✍ **यथोदाहरणम् अधोनिर्दिष्टानां क्रियारूपाणां लङ्-लकार-रूपं लिखत—**

[ उदाहरण के अनुसार अधोनिर्दिष्ट क्रियारूपों के लङ् लकार रूप लिखें। Write the *laṅ-lakāra*-forms of the verbal forms given below as shown in the example. ]

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा. | निवेदयति | – | (i) | **नि + वेदयति** | (ii) | **नि + अवदेयत्** |
| | | | (iii) | **इ + अ = य** | (iv) | **न्यवेदयत्** |
| 1. | परिपालयति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 2. | परिशीलयति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 3. | अधिगच्छति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 4. | प्रविशति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 5. | प्रकाशयति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 6. | अङ्गीकरोति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 7. | अपहरति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 8. | अनुकरोति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 9. | उपकरोति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 10. | उत्तिष्ठति | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |

**स्मरत**

⇨ भूतकाले क्रियापदरूपस्य आदौ अकारः योज्यते खलु ? सः धातोः पूर्वम् उपसर्गात् अनन्तरं च योजनीयः। सः 'अकारः' उपसर्गात् पूर्वं कदापि न योजनीयः।

**उदा.** प्रतिवदति – अप्रतिवदत् ☒
प्रत्यवदत् ☑

⇨ उपसर्गप्रयोग-स्थले लङ्-रूपलेखनावसरे सन्धिनियमाः अनुसरणीयाः भवन्ति।

## अभ्यासः — 173

✍ **लङि प्रथमपुरुष-एकवचने भूतकालरूपाणि लिखत—**

[ लङ्-लकार के प्रथमपुरुष एकवचन में भूतकाल रूप लिखें। Write the third person singular forms of the past tense in *laṇlakāra.* ]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **यथा** | निर् | + | आ | + | कृ | = | **निराकरोत्** |
| 1. | प्रति | + | वद् | | | = | |
| 2. | परि | + | पाल् | | | = | |
| 3. | प्र | + | व्रज् | | | = | |
| 4. | उत् | + | स्था | | | = | |
| 5. | प्रति | + | आ | + | गम् | = | |
| 6. | परि | + | भूष् | | | = | |
| 7. | प्र | + | नम् | | | = | |
| 8. | उप | + | विश् | | | = | |
| 9. | निर् | + | दिश् | | | = | |
| 10. | प्र | + | हस् | | | = | |
| 11. | अप | + | सृ | | | = | |
| 12. | अनु | + | धाव् | | | = | |
| 13. | अनु | + | गम् | | | = | |

## अभ्यासः — 174

✍ **लङि भूतकालरूपैः रिक्तस्थानानि पूरयत—**

[ लङ्-लकार में भूतकाल रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the past tense forms in *laṅ-lakāra.* ]

| | | | |
|---|---|---|---|
| **यथा** | गुरुः शिष्यम् | <u>अन्वगच्छत्</u> | (अनु + गम्) |
| 1. | प्रकाशः कृष्णम् | | (प्रति + वद्) |
| 2. | रामः सीतया सह वनम् | | (प्र + व्रज्) |
| 3. | शिक्षकः कक्ष्याम् | | (प्र + आ + विश्) |
| 4. | बालकः आसने | | (उत् + स्था) |
| 5. | भीमः वनात् नगरम् | | (प्रति + आ + गम्) |
| 6. | महिला देवतां | | (प्र + नम्) |
| 7. | बालकः कन्दुकं पादेन | | (प्र + हृ) |
| 8. | पण्डितः संस्कृतेन शुद्धं | | (वि + आ + हृ) |
| 9. | बालः वृक्षतः फलानि | | (अव + चि) |
| 10. | सैनिकः पर्वतम् | | (आ + रुह्) |
| 11. | बीजाद् अङ्कुरः | | (उत् + भू) |
| 12. | मूषिकः बिलं | | (प्र + विश्) |
| 13. | सः विषयं ज्ञात्वा उच्चैः | | (प्र + हस्) |
| 14. | श्रीरामः बहूनि वर्षाणि अयोध्यां | | (परि + पाल्) |
| 15. | भक्तः परमेश्वरं | | (सम् + आ + राध्) |

## उपसर्गयोगे ल्यप्-प्रत्ययस्य प्रयोगाः

☞ गत्वा, पठित्वा, लिखित्वा इत्यादीनि रूपाणि वयं जानीमः एव। अत्र उच्चारणसमये अन्ते 'त्वा' इति श्रूयते। अतः एतानि त्वान्त-रूपाणि। धातोः पूर्वं यदि उपसर्गः योज्यते तदा तु अस्य स्थाने 'ल्यप्'-प्रत्ययः भवति। ल्यप्-प्रत्ययस्य य-कारः अवशिष्टः भवति।

**उदा.** निस् + श्वसित्वा = निःश्वस्य। परि + हृत्वा = परिहृत्य।

## अभ्यासः — 175

✍ **ल्यबन्तानि रूपाणि लिखत–**

[ ल्यबन्त रूप लिखें। Write the forms ending with *lyap.* ]

**यथा** अनु + धावित्वा = ......**अनुधाव्य**......

| | | | |
|---|---|---|---|
| 1. | प्रति + आ + गत्वा = | 6. | अभि + वन्दित्वा = |
| 2. | परि + पालयित्वा = | 7. | उत् + घाटयित्वा = |
| 3. | प्र + हृत्वा = | 8. | प्र + क्षालयित्वा = |
| 4. | परि + त्यक्त्वा = | 9. | सम् + सूचयित्वा = |
| 5. | सम् + शोधयित्वा = | 10. | अनु + सृत्वा = |

## अभ्यासः — 176

✍ **अधः काचित् घटना निरूपिता। तत्र कोष्ठकस्थानां पदानां ल्यबन्तरूपाणि रिक्तस्थानेषु लिखत–**

[ नीचे कोई घटना निरूपित है। उसमें दिये गये कोष्ठकस्थ पदों के ल्यबन्त रूप रिक्तस्थान में लिखें। An incident is described in the following paragraph. Write the forms ending in *lyap* in the place of the words mentioned in the bracket. ]

राजीवः प्रातः शीघ्रम् (उत्थितवान्) मुखं (प्रक्षालितवान्) आसन्दे (उपविष्टवान्) चायं पीतवान्। स्नानादिकं (समापितवान्) स्यूतं (स्वीकृतवान्) यानम् (आरूढवान्) कार्यालयं प्राप्तवान्। कार्यालये कर्मकरान् (आहूतवान्) कार्याणि (संसूचितवान्) स्वकर्मणि प्रवृत्तवान्। सायं कार्यालयीयं कार्यं (समापितवान्) विपणीतः द्रव्याणि (सङ्गृहीतवान्) गृहम् (आगतवान्) विश्रामं कृतवान्।

## अभ्यासः — 177

**स्थूलाक्षरैः लिखितम् अशुद्धं पदं संशोध्य शुद्धं रूपं रिक्तस्थाने लिखत—**

[ स्थूलाक्षर में लिखित अशुद्ध पदों का शुद्ध रूप रिक्तस्थान में लिखें। Replace the bold incorrect forms by the correct forms . ]

1. राजीवः गृहपाठं **समापयित्वा** क्रीडाङ्गणं गच्छति।
2. पुनः गृहम् **आगत्वा** हस्तपादं प्रक्षालयति।
3. गृहपाठं **विलिखित्वा** पाठान् पठति।
4. भोजनशालां **प्रविष्ट्वा** फलानि खादति।
5. आसन्दे **उपविष्ट्वा** पत्रिकां पठति।
6. विषयं **सङ्गृहीत्वा** पुस्तके लिखति।
7. अनुजाम् **आह्वयित्वा** चाकलेहं ददाति।
8. गृहात् बहिः **निर्गत्वा** वृक्षान् जलेन सिञ्चति।
9. ततः पुष्पाणि **आनयित्वा** मात्रे ददाति।
10. कार्याणि **समापयित्वा** भोजनं करोति।
11. दूरदर्शनं **सन्दृष्ट्वा** निद्राम् अनुभवति।

**उपसर्गयोगे लङ्रूपाणि (आत्मनेपदिषु)**

**अधोनिर्दिष्टानि वाक्यानि पठत–**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

पिता ग्रामात् **न्यवर्तत**।

भ्राता सायङ्काले **प्रातिष्ठत**।

जनाः भारतमातरं **पर्यसेवन्त**।

दुष्टः नियमं **उदलङ्घत**।

आपणिकः वस्तूनि **व्यक्रीणीत**।

**उपरि स्थूलाक्षर-लिखितानि कानिचन उपसर्गयुक्तानि क्रियापदानि निर्दिष्टानि।**

⇨ लङ्-लकारे यदा धातवः उपसर्गयुक्ताः भवन्ति, तदा अत्रापि परस्मैपदिवत् परिवर्तनं भवति।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| **यथा** | **लट् लकारे** | | | | | **लङ् लकारे** | | | | |
| | नि | + | वर्तते | = | निवर्तते | नि | + | अवर्तत | = | न्यवर्तत |
| | | | | | | (इ | + | अ | = | य) |

## अभ्यासः — 178

**यथोदाहरणम् अधोनिर्दिष्टानां धातुरूपाणां लङ्-लकार-रूपं लिखत–**

[ उदाहरण के अनुसार अधोलिखित धातुरूपों का लङ्-लकार रूप लिखें। Write the *lan-lakāra* form of the following verbal forms as shown in the example. ]

| | | | | | | |
|---|---|---|---|---|---|---|
| **उदा.** | अभिवन्दते | – | (i) | **अभि + वन्दते** | (ii) | **अभि + अवन्दत** |
| | | | (iii) | **इ + अ = य** | (iv) | **अभ्यवन्दत** |
| 1. | परिपालयते | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |
| 2. | नियुध्यते | – | (i) | | (ii) | |
| | | | (iii) | | (iv) | |

| | | | | |
|---|---|---|---|---|
| 3. | सुशोभते | – | (i) | (ii) |
| | | | (iii) | (iv) |
| 4. | परित्रायते | – | (i) | (ii) |
| | | | (iii) | (iv) |
| 5. | प्रभाषते | – | (i) | (ii) |
| | | | (iii) | (iv) |
| 6. | परिक्षमते | – | (i) | (ii) |
| | | | (iii) | (iv) |
| 7. | प्रतिष्ठते | – | (i) | (ii) |
| | | | (iii) | (iv) |
| 8. | उत्प्लवते | – | (i) | (ii) |
| | | | (iii) | (iv) |
| 9. | आरभते | – | (i) | (ii) |
| | | | (iii) | (iv) |
| 10. | प्रतिनिवर्तते | – | (i) | (ii) |
| | | | (iii) | (iv) |

## अभ्यासः — 179

**उदाहरणानुसारं रिक्तस्थानानि पूरयत—**

[उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example.]

**यथा** प्र + अभाषत = **प्राभाषत**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 1. | प्र | + | अयतत = | | 6. | नि | + | अवर्तत = | |
| 2. | परि | + | असेवत = | | 7. | अनु | + | अवर्तत = | |
| 3. | परि | + | अपालयत= | | 8. | अनु | + | अकम्पत = | |
| 4. | परि | + | अक्षमत = | | 9. | अनु | + | अयाचत = | |
| 5. | परि | + | अत्रायत = | | 10. | उत् | + | अलङ्कत = | |

**अधोलिखितम् अनुच्छेदं पठत–**
[ अधोलिखित अनुच्छेद को पढ़ें। Read the following paragraph. ]

रावणः सीताम् **अपहृतवान्**। सः ताम् अशोकवनिकायां **संस्थापितवान्**। 'एतां परिरक्षन्तु' इति सः तत्रत्याः राक्षसीः **प्रभाषितवान्**।

अनन्तरं रावणः सीतायाः समीपं गत्वा तां **प्रलोभितवान्**। 'मां परिणयतु' इति सः ताम् अनुनीतवान्। सीता क्रोधेन रावणं ततः **निवारितवती**। रावणः तां पुनः सन्तर्जितवान्, परन्तु सा निराकृतवती। मनसा वचनेन च सा श्रीरामम् एव **सम्पूजितवती**।

श्रीरामः हनुमन्तं **निवेदितवान्**। हनुमान् सीताम् अन्वेष्टुं **प्रस्थितवान्**। सागरम् **उत्प्लुतवान्**। लङ्काम् **आसादितवान्**। तत्र सर्वत्र **सञ्चरितवान्**। कपिचेष्टाम् **आचरितवान्**। सीतायाः अन्वेषणम् **आरब्धवान्**। सीताम् **अन्विष्य** तया सह **प्रभाषितवान्**।

हनुमन्तं दृष्ट्वा सीता सन्तुष्टा अभवत्। सा श्रीरामं **ध्यातवती**। रावणस्य क्रूरदृष्टिं **निवेदितवती**। हनुमान् लङ्कातः निवर्तितवान्। श्रीरामाय **निवेदितवान्**। श्रीरामः सैन्येन सह लङ्कां गत्वा रावणेन सह युद्धम् **प्रारब्धवान्**। सीतां **परिरक्षितवान्**। तां पुनः परिलब्धवान् अयोध्यां च **प्रतिनिवर्तितवान्**।

## अभ्यासः – 180

**उदाहरणानुसारं रिक्तस्थानानि पूरयत–**
[ उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example.]

| | **क्तवतु** | **लट्** | | | | **लङ्** |
|---|---|---|---|---|---|---|
| **यथा** | अपहृतवान् | अपहरति | अप + | अहरत् | = | अपाहरत् |
| 1. | संस्थापितवान् | संस्थापयति | सम् + | | = | |
| 2. | प्रलोभितवान् | प्रलोभयति | प्र + | | = | |
| 3. | अनुनीतवान् | अनुनयति | अनु + | | = | |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 4. | निराकृतवती | निराकरोति | निर् | + | | | = |
| 5. | परिपीडितवान् | परिपीडयति | परि | + | | | = |
| 6. | प्रभाषितवान् | प्रभाषते | प्र | + | | | = |
| 7. | निवारितवती | निवारयति | नि | + | | | = |
| 8. | सम्पूजिवती | सम्पूजयति | सम् | + | | | = |
| 9. | निवेदितवान् | निवेदयते | नि | + | | | = |
| 10. | प्रस्थितवान् | प्रतिष्ठते | प्र | + | | | = |
| 11. | उत्प्लुतवान् | उत्प्लवते | उत् | + | | | = |
| 12. | आसादितवान् | आसादयति | आ | + | | | = |
| 13. | सञ्चरितवान् | सञ्चरति | सम् | + | | | = |
| 14. | आचरितवान् | आचरति | आ | + | | | = |
| 15. | आरब्धवान् | आरभते | आ | + | | | = |
| 16. | सन्तुष्टवती | सन्तुष्यति | सम् | + | | | = |
| 17. | प्रारब्धवान् | प्रारभते | प्रा | + | आ | + | = |
| 18. | परिरक्षितवान् | परिरक्षति | परि | + | | | = |
| 19. | परिलब्धवान् | परिलभते | परि | + | | | = |
| 20. | प्रतिनिवर्तितवान् | प्रतिनिवर्तते | प्रति | + | नि | + | = |

**उपसर्ग-प्रयोगाः**

## कर्णस्य उदारता


महाभारतं भारतीयसंस्कृतेः अमूल्यं ग्रन्थरत्नम् अस्ति। तत्र कर्णस्य विषये एका कथा **प्रसिद्धा** अस्ति। एकदा भगवान् श्रीकृष्णः पाण्डवान् **प्रत्यागच्छत्**। कथोपकथने श्रीकृष्णः कर्णस्य उदारतां **प्राशंसत्**। कर्णस्य **प्रशंसा** अर्जुनाय न अरोचत। अतः अर्जुनः कृष्णं **प्रत्यभाषत**– 'हे सखे ! अस्मिन् महीतले मम भ्रातुः धर्मराजस्य युधिष्ठिरस्य समः नास्ति कोऽपि उदारः। तथापि भवान् भ्रातुः समक्षं कर्णं बहु **प्रशंसति**'। भगवान् **प्रत्यवदत्**– 'अद्य अवसरः नास्ति। कदाचित् अन्यस्मिन् दिने त्वाम् एतत् **प्रतिबोधयिष्यामि**'।



ततः एकदा कृष्णः अर्जुनं **समाहूतवान्**। तौ उभौ अपि ब्राह्मणवेशं **परिधाय** युधिष्ठिरस्य राजभवनं **सम्प्राप्तवन्तौ**। महाराजः युधिष्ठिरः तयोः ब्राह्मणयोः सेवां **विधाय** आगमनस्य कारणम् अपृच्छत्। ब्राह्मणः कृष्णः धर्मराजं **प्रत्यभाषत**– "हे राजन् ! शुष्कचन्दनदारूणाम् अंसभारं कामये" इति।

तदा वर्षाकालः **प्रावर्तत**। अतः कुतश्चित् केनचित् प्रकारेण वा दारु आनीयते चेत् आर्द्रं भविष्यति। तथापि युधिष्ठिरः सेवकान् नगरं **प्रेषितवान्**। ते सेवकाः सर्वत्र **परिभ्रम्य** न कुत्रापि शुष्कं चन्दनकाष्ठं **प्राप्तवन्तः**। ततः धर्मराजः **न्यवेदयत्**– 'इदानीं शुष्कं चन्दनकाष्ठं कुत्रापि नैव मिलति। अन्यत् किमपि इच्छतः चेत् वदतां सहसा दास्यामि' इति। कृष्णः **प्रत्यवदत्**– 'माऽस्तु, शुष्कं चन्दनकाष्ठं नास्ति चेत् अन्यत् किमपि न अभिलषामि। ततः अर्जुनेन सह भगवान् श्रीकृष्णः तेनैव ब्राह्मणवेशेन कर्णस्य द्वारं **प्राप्तवान्**।

कर्णः श्रद्धया तौ **समसेवत**। सः तौ आसन्दयोः **उपावेश्य** आगमनस्य अभिप्रायं **पर्यपृच्छत्**। कृष्णः तदेव वाक्यं 'शुष्कचन्दनदारूणाम् अंसभारं कामये' इति **आवर्तयत्**। तत् श्रुत्वा कर्णः सहसा धनुः **समुत्थापितवान्**। त्वरितमेव बाणैः द्वाराणि, आसन्दान्, कपाटान्, पर्यङ्कान् बहूनि चन्दनदारुनिर्मितानि वस्तूनि **विखण्डितवान्**। एवं तयोः पुरतः चन्दनकाष्ठानां राशिं कृतवान्। तद् **विलोक्य** कृष्णः कर्णम् अपृच्छत्– 'भो राजन्! भवान् किमर्थम् एतानि बहुमूल्यानि द्रव्याणि **विनाशयति**'।



कर्णः **प्रत्यवदत्**– 'हे विप्रवर! सम्प्रति वर्षाकालः **प्रचलति**। कुत्रापि शुष्कं काष्ठं न **समुपलभ्यते**। यत्र कुत्रापि मिलिष्यति चेत्, तदानयने पुनः आर्द्रं भविष्यति। भवान् केवलं शुष्कं काष्ठम् **अभिलषति**। अतः उपायान्तराभावात् एतानि वस्तूनि **विखण्डितवान्**। किञ्च एतानि द्रव्याणि कालान्तरे पुनः निर्मितानि भविष्यन्ति। एतेषां **विनाशेन** मयि खेदः नास्ति। परन्तु इतः अतिथिः रिक्तहस्तः **निवर्तिष्यते** चेत् एतस्य कष्टं मम हृदं भृशं **परिपीडयिष्यति**'। एवम् उक्त्वा कर्णः सेवकान् **आहूय** ब्राह्मणेन सह काष्ठभारं **प्रेषितवान्**। ब्राह्मणरूपः भगवान् अपि 'यशस्वी भव' इति कर्णाय आशिषं **प्रदाय** अर्जुनेन सह **निरगच्छत्**।

प्रत्यागमनानन्तरं कृष्णः अर्जुनं **प्रबोधितवान्**– 'सखे अर्जुन! धर्मराजस्य युधिष्ठिरस्य भवने अपि द्वाराणि, आसन्दाः, अन्यानि च द्रव्याणि चन्दनदारुभिः निर्मितानि सन्ति। परन्तु तानि वस्तूनि **प्रदातुं** युधिष्ठिरस्य स्मरणं न अभवत्। किञ्च शुष्कचन्दनकाष्ठस्य याचने प्रत्युत्पन्नमतिः उदारमनाश्च कर्णः तानि सर्वाणि महार्घवस्तूनि **विनाश्य** आवाभ्यां **समर्पितवान्**। वस्तुतः युधिष्ठिरः तु **विचार्य** धर्मे **प्रवर्तते**। किन्तु कर्णः स्वभावतः **उदारः**। अतः कर्णस्य **उदारता** महीतले महीयते'।

◆◆◆

## सुभाषितम्

त्याग एको गुणः श्लाघ्यः किमन्यैर्गुणराशिभिः।

## अभ्यासः – 181

1. **पाठाधारेण रिक्तस्थानानि पूरयत–**

[ पाठ के आधार पर रिक्तस्थान की पूर्ति करें। Fill in the blanks on the basis of the present lesson .]

(i) एकदा भगवान् श्रीकृष्णः पाण्डवान् ____ ।

(ii) भवान् भ्रातुः समक्षं कर्णं बहु ____ ।

(iii) ततः एकदा कृष्णः अर्जुनं ____ ।

(iv) युधिष्ठिरः सेवकान् नगरं ____ ।

(v) कर्णः सहसा धनुः ____ ।

2. **अधोलिखितानि पदानि यथोचितं विभज्य लिखत–**

[ अधोलिखित पदों को यथोचित विभाग कर लिखें। Rewrite the words by splitting them correctly. ]

| | | | |
|---|---|---|---|
| (i) प्रत्यभाषत | **प्रति + अभाषत** । | (ii) प्रत्यवदत् | । |
| (iii) प्रशंसति | । | (iv) समाहूतवान् | । |
| (v) विनाशयति | । | (vi) पर्यपृच्छत् | । |
| (vii) न्यवेदयत् | । | (viii) समुपलभ्यते | । |
| (ix) अभिलषति | । | (x) परिपीडयिष्यति | । |

3. **यथोचितं रिक्तस्थानं पूरयत–**

[ यथोचित रिक्तस्थान की पूर्ति करें। Fill in the blanks appropriately. ]

(i) प्रति + अगच्छत् = ____ ।

(ii) निर् + अगच्छत् = ____ ।

(iii) सम् + असेवत = ____ ।

(iv) परि + अपृच्छत् = ____ ।

**सुभाषितेषु उपसर्ग-प्रयोगाः**

# सुभाषितानि

विक्लवो वीर्यहीनो यः स दैवमनुवर्तते ।
वीरास्सम्भावितात्मानो न दैवं पर्युपासते ॥

राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
लोकास्तमनुवर्तन्ते यथा राजा तथा प्रजाः ॥

पिपीलिकार्जितं धान्यं मक्षिकासञ्चितं मधु ।
लुब्धेन सञ्चितं द्रव्यं समूलं च विनश्यति ॥

कुलीनैः सह सम्पर्कं पण्डितैः सह मित्रताम् ।
ज्ञातिभिश्च समं मेलं कुर्वाणो न विनश्यति ॥


◆◆◆

## कथायाम् उपसर्गप्रयोगाः

### अपरीक्षितकारकम्


कस्मिंश्चित् नगरे देवशर्मा नाम ब्राह्मणः आसीत्। तस्य भार्या यस्मिन् दिने एकं सुतम् अजनयत् तस्मिन् एव दिने काचित् नकुली तत्रैव एकं नकुलं प्रसूय अम्रियत। सुतवत्सला सा ब्राह्मणी तं नकुलम् अपि पुत्रवत् पर्यपालयत्। किन्तु सा तस्मिन् नकुले कदापि न व्यश्वसत्। सततं तस्मिन् आशङ्कत यत्– 'कदाचित् स्वजातिदोषवशात् एषः नकुलः मम प्रियस्य पुत्रस्य विरुद्धम् आचरिष्यति' इति।

अथ सा एकदा शय्यायां पुत्रं शाययित्वा जलकुम्भम् आदाय पतिम् अभाषत– 'आर्य ! जलार्थम् अहं तडागे यामि, भवान् पुत्रं संरक्षतु' इति। यावत् सा तडागं गतवती तदानीम् एव कर्णपरम्परया ब्राह्मणः अशृणोत्



यत् कश्चन महात्मा दरिद्रेभ्यः प्रभूतं धनं दत्ते। "तत्र अहम् अपि किञ्चित् प्राप्स्यामि" इति ब्राह्मणः व्यचिन्तयत्। किन्तु गृहे एकाकिनं पुत्रं परित्यज्य कथं गच्छामि इति तस्य मनसि चिन्ता अवर्तत। किञ्च क्षणानन्तरम् एव ब्राह्मणस्य मनसि एका युक्तिः प्राकाशत। तदनुसारं सः बालकस्य रक्षणार्थं पुत्रवत् पालितं नकुलं नियोज्य स्वयं निरगच्छत्।

अत्रान्तरे एकः भयङ्करः कृष्णसर्पः बिलात् निष्क्रम्य तत्र समागच्छत्। नकुलः तं दृष्ट्वा व्यचिन्तयत् यत् अयं दुष्टः अवश्यं मे भ्रातुः दशनं करिष्यति। सर्पनकुलयोः स्वाभाविकं वैरं भवति एव। अतः भ्रातुः जीवनं रक्षितुं सः सर्पेण सह युद्धं प्रारभत। किञ्चित्क्षणानन्तरं च तं खण्डशः अकुरुत। तस्मात् नकुलस्य मुखं रक्तलिप्तं समजायत।



अनन्तरं स्वीयं पराक्रमं प्रदर्शयितुं तथैव रक्तरञ्जितमुखः सः गृहात् बहिः आगत्य द्वारे एव उपाविशत्। जलकुम्भम् आनयन्ती माता द्वारे एव तस्य रुधिरप्लावितं मुखं निरैक्षत। एषः दुरात्मा मम पुत्रम् अभक्षयत्' इति शङ्कया कोपात् तस्य उपरि जलकुम्भं निक्षिप्य तम् अमारयत्।



अत्रान्तरे ब्राह्मणः अपि उपागच्छत्। तौ उभौ अपि गृहाभ्यन्तरम् आगत्य सुखेन सुप्तं पुत्रम् अवालोकेताम्। पार्श्वे च खण्डशः कृतं कृष्णसर्पम् अवलोक्य नकुलाय अतीव सन्तापं प्राप्नुताम्। वस्तुतः अविचार्य कृतस्य कर्मणः ईदृशम् एव सन्तापकरं फलं भवति। अतः कदाचिद् अपि अविचार्य किमपि न करणीयम्। तस्मात् सुष्ठु खलु उच्यते–

अपरीक्ष्य न कर्तव्यं कर्तव्यं सुपरीक्षितम्।
पश्चाद् भवति सन्तापो ब्राह्मण्या नकुलार्थतः॥

◆◆◆

# चतुर्थः स्तबकः

## 4.7 सप्तमः पाठः

## [ कर्मणि प्रयोगः ]

**वर्तमाने लट्, कर्मणि**

**एतानि वाक्यानि पठत–**

[ इन वाक्यों को पढ़ें। Read these sentences. ]



**बालकः** पाठं **पठति**।



बालकेन **पाठः पठ्यते**।



**बालिका** रोटिकां **खादति**।



बालिकया **रोटिका खाद्यते**।



**युवा** दूरदर्शनं **पश्यति**।



यूना **दूरदर्शनं दृश्यते**।

## अधोनिर्दिष्टानि वाक्यानि पठत—

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| क. कर्तरि प्रयोगः | ख. कर्मणि प्रयोगः |
|---|---|
| **बालः** पाठं **पठति**। | बालेन **पाठः पठ्यते**। |
| **सा** श्लोकं **लिखति**। | तया **श्लोकः लिख्यते**। |
| **रामः** फलं **खादति**। | रामेण **फलं खाद्यते**। |
| **वयं** दुर्जनं **निन्दामः**। | अस्माभिः **दुर्जनः निन्द्यते**। |
| **ते** दुर्गुणान् **त्यजन्ति**। | तैः **दुर्गुणाः त्यज्यन्ते**। |
| **भक्ताः** देवं **नमन्ति**। | भक्तैः **देवः नम्यते**। |
| **राजा** प्रजाः **रक्षति**। | राज्ञा **प्रजाः रक्ष्यन्ते**। |
| **सुधा** पाठौ **पठति**। | सुधया **पाठौ पठ्येते**। |
| **अर्चकः** देवान् **अर्चति**। | अर्चकेन **देवाः अर्च्यन्ते**। |
| **त्वं** कथाः **लिखसि**। | त्वया **कथाः लिख्यन्ते**। |

☞ अत्र 'क'-भागे स्थितानि वाक्यानि कर्तरि प्रयोगे तथा च 'ख'-भागे स्थितानि वाक्यानि कर्मणि प्रयोगे सन्ति।

☞ कर्तरि प्रयोगे क्रिया कर्तुः अनुरूपम् एव भवति, न तु कर्मणः अनुरूपम्।

### कर्तरि प्रयोगे नियमाः

- ⇨ कर्तरि प्रयोगे कर्तृपदं **प्रथमाविभक्तौ** भवति।
- ⇨ कर्तरि प्रयोगे कर्मपदं यदि भवति तर्हि तत् **द्वितीयाविभक्तौ** भवति।
- ⇨ कर्तृपदस्य वचनपरिवर्तनेन पुरुषपरिवर्तनेन च क्रियापदे परिवर्तनं भवति।

### कर्मणि प्रयोगे नियमाः

- ⇨ कर्तृपदं **तृतीयाविभक्तौ** भवति।
- ⇨ कर्मपदं **प्रथमाविभक्तौ** भवति।
- ⇨ कर्मणि प्रयोगे कर्मपदानुसारं क्रियापदस्य पुरुषः वचनं च भवति।

☞ कर्मणि प्रयोगे वर्तमानकाले क्रियापदस्य अन्तिमः ध्वनिः एवं भवति –

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **प्र. पु.** | यते | येते | यन्ते |
| **म. पु.** | यसे | येथे | यध्वे |
| **उ. पु.** | ये | यावहे | यामहे |

## अभ्यासः – 182

✍ **अधोनिर्दिष्टानां धातूनां यथानिर्देशं कर्मणि रूपं लिखत–**

[ अधोनिर्दिष्ट धातुओं का यथानिर्देश कर्म वाच्य का रूप लिखें। Write the passive forms of the following roots as pointed out. ]

| | | |
|---|---|---|
| उदा. पठ् | पठ् + य + ते | पठ्यते |
| 1. रक्ष् | | |
| 2. मिल् | | |
| 3. गम् | | |
| 4. सह् | | |
| 5. पूज् | | |
| 6. ध्यै (ध्या) | | |
| 7. खाद् | | |
| 8. त्यज् | | |
| 9. ज्ञा | | |
| 10. पत् | | |
| 11. दह् | | |
| 12. जप् | | |
| 13. चर्व् | | |
| 14. गण् | | |
| 15. कुप् | | |
| 16. कथ् | | |
| 17. घ्रा | | |
| 18. जीव् | | |
| 19. पाल् | | |
| 20. गर्ज् | | |

**अधोनिर्दिष्टानि वाक्यानि पठत—**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|
| सर्वे नियमान् पालयन्ति। | सर्वैः नियमाः पाल्यन्ते। |
| तौ कार्याणि चिन्तयतः। | ताभ्यां कार्याणि चिन्त्यन्ते। |
| भरतः लेखनीः स्थापयति। | भरतेन लेखन्यः स्थाप्यन्ते। |
| चोराः आभरणानि चोरयन्ति। | चोरैः आभरणानि चोर्यन्ते। |
| सीता सख्यौ सूचयति। | सीतया सख्यौ सूच्येते। |
| मालाकारः माले रचयति। | मालाकारेण माले रच्येते। |
| रजकः वस्त्राणि क्षालयति। | रजकेन वस्त्राणि क्षाल्यन्ते। |
| ताः दीपान् निर्वापयन्ति। | ताभिः दीपाः निर्वाप्यन्ते। |
| रक्षकः चोरं ताडयति। | रक्षकेण चोरः ताड्यते। |
| यूयं कार्यक्रमम् अवलोकयथ। | युष्माभिः कार्यक्रमः अवलोक्यते। |

## अभ्यासः — 183

**अधोनिर्दिष्टानां धातूनां यथानिर्देशं कर्तरि कर्मणि च रूपं लिखत—**

[ अधोनिर्दिष्ट धातुओं का यथानिर्देश कर्तृवाच्य एवं कर्मवाच्य में रूप लिखें। Write the active and passive forms of the following roots as directed. ]

| धातुः | कर्तरि लट् | कर्मणि लटः रूप-विभागः | कर्मणि लटः रूपम् |
|---|---|---|---|
| उदा. कथ् | कथयति | कथ् + य + ते | कथ्यते |
| 1. रच् | | | |
| 2. भक्ष् | | | |
| 3. गण् | | | |
| 4. घट् | | | |
| 5. चिन्त् | | | |
| 6. अङ्क् | | | |

| धातुः | कर्तरि लट् | कर्मणि लटः रूप-विभागः | कर्मणि लटः रूपम् |
|---|---|---|---|
| 7. खण्ड् | | | |
| 8. दण्ड् | | | |
| 9. स्वाद् | | | |
| 10. पाल् | | | |
| 11. पाठ् | | | |
| 12. छाद् | | | |
| 13. पीड् | | | |
| 14. सूच् | | | |
| 15. पूज् | | | |
| 16. भूष् | | | |
| 17. चुर् | | | |
| 18. बुध | | | |
| 19. रुध्(रोध्) | | | |

## अभ्यासः — 184

**कर्तरि प्रयोगानुसारं कर्मणि प्रथमपुरुषे वाक्यानि पूरयत—**

[ कर्तृवाच्य के अनुसार कर्मवाच्य के प्रथमपुरुष में वाक्य पूरा करें। Complete the sentences in the first person of passive voice on the basis of the active usages. ]

| धातुः | कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|---|
| उदा. कथ् | सः कथां कथयति । | तेन कथा कथ्यते । |
| 1. रच् | कविः कवितां रचयति । | रच्यते । |
| 2. भक्ष् | रामः फलं भक्षयति । | भक्ष्यते । |
| 3. गण् | धनिकः रूप्यकाणि गणयति । | गण्यन्ते । |
| 4. चिन्त् | गुरुः रहस्यं चिन्तयति । | चिन्त्यते । |
| 5. अङ्क् | सीता चित्रम् अङ्कयति । | अङ्क्यते । |

| धातुः | कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|---|
| 6. खण्ड् | सा दण्डं खण्डयति । | ...... खण्ड्यते । |
| 7. दण्ड् | आरक्षकः चौरं दण्डयति । | ...... दण्ड्यते । |
| 8. पाल् | यशोदा कृष्णं पालयति । | ...... पाल्यते । |
| 9. पीड् | राक्षसः देवं पीडयति । | ...... पीड्यते । |
| 10. पाठ् | गुरुः छात्रं पाठयति । | ...... पाठ्यते । |
| 11. छाद् | श्रमिकः भवनं छादयति । | ...... छाद्यते । |
| 12. सूच् | राजा मन्त्रिणं सूचयति । | ...... सूच्यते । |
| 13. पूज् | भक्तः हरिं पूजयति । | ...... पूज्यते । |
| 14. भूष् | नारी अङ्गं भूषयति । | ...... भूष्यते । |
| 15. चुर् | चौरः मुद्रां चोरयति । | ...... चोर्यते । |
| 16. बुध् (बोध्) | पिता पुत्रं बोधयति । | ...... बोध्यते । |
| 17. शुध् (शोध्) | स्वर्णकारः सुवर्णं शोधयति । | ...... शोध्यते । |
| 18. रुध् (रोध्) | कृषकः वारि रोधयति । | ...... रोध्यते । |
| 19. वर्ण | लेखकः प्रकृतिं वर्णयति । | ...... वर्ण्यते । |
| 20. मृज् | गृहिणी गृहं मार्जयति । | ...... मार्ज्यते । |

📖 **अधोनिर्दिष्टान् प्रयोगान् सावधानं पठत–**

[ अधोनिर्दिष्ट प्रयोगों को ध्यान से पढ़ें। Read the following usages carefully. ]

| धातुः | कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|---|
| सम् + पाद् | सम्पादयति | सम्पाद्यते |
| उत् + चार् | उच्चारयति | उच्चार्यते |
| अधि + इङ् | अध्यापयति | अध्याप्यते |
| परि + विष् (परिवेष्) | परिवेषयति | परिवेष्यते |
| नि + विद् (निवेद्) | निवेदयति | निवेद्यते |

## कर्तरि कर्मणि च प्रथमपुरुषे प्रयोगान् पठत–

[ कर्तृवाच्य एवं कर्मवाच्य के प्रथमपुरुष प्रयोगों को पढ़ें। Read the usages of active and passive voice in the first person. ]

| कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|
| माता भिक्षुकाय अन्नं ददाति। | मात्रा भिक्षुकाय अन्नं दीयते। |
| बालः दुग्धं पिबति। | बालेन दुग्धं पीयते। |
| कुम्भकारः घटं निर्माति। | कुम्भकारेण घटः निर्मीयते। |
| सन्यासी गृहं त्यजति। | सन्यासिना गृहं त्यज्यते। |
| गायकः गीतं गायति। | गायकेन गीतं गीयते। |

## अभ्यासः – 185

### यथोदाहरणं कर्मणि प्रथमपुरुषे रूपाणि पूरयत–

[ उदाहरण के अनुसार कर्मवाच्य के प्रथमपुरुष में रूप पूरा करें। Complete the verbal forms of passive voice in the first person as shown in the example. ]

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | दा | दीयते | दीयेते | दीयन्ते |
| 1. | धा | धीयते | | |
| 2. | पा | पीयते | | |
| 3. | हा | हीयते | | |
| 4. | निर्मा | निर्मीयते | | |
| 5. | गा | गीयते | | |

**अवधेयम्**

उपर्युक्तधातूनां कर्मणि प्रयोगे 'आ' इत्यस्य परिवर्तनम् 'ई' इति भवति।

**यथा** दा = दी, धा = धी।

## अभ्यासः — 186

✍ **यथोदाहरणं कोष्ठके निर्दिष्टस्य धातोः रूपेण वाक्यानि पूरयत—**

[ उदाहरण के अनुसार कोष्ठक में निर्दिष्ट धातुओं के क्रियापदों से वाक्यों को पूरा करें। Complete the sentences with the verbal forms of the roots given in the bracket as shown in the example. ]

| | | | | | |
|---|---|---|---|---|---|
| **यथा** | | यजमानेन | गौः | (दा) | ......**दीयते**...... |
| | 1. | मया | द्राक्षारसः | (पा) | |
| | 2. | तेन | ग्रन्थाः | (निर्मा) | |
| | 3. | त्वया | कुत्र | (स्था) | |
| | 4. | सर्वैः | गीतं | (गा) | |

📖 **कर्तरि कर्मणि च प्रथमपुरुषे प्रयोगान् पठत—**

[ कर्तृवाच्य एवं कर्मवाच्य में प्रथमपुरुष के प्रयोगों को पढ़ें। Read the usages of active and passive voices in the first person. ]

| **कर्तरि प्रयोगः** ↓ | **कर्मणि प्रयोगः** ↓ |
|---|---|
| कुम्भकारः घटं करोति। | कुम्भकारेण घटः क्रियते। |
| गुरुः अज्ञानं हरति। | गुरुणा अज्ञानं ह्रियते। |
| भृत्यः जलं भरति। | भृत्येन जलं भ्रियते। |
| सेवकः स्वामिनम् आद्रियते। | सेवकेन स्वामी आद्रियते। |
| धीवरः मत्स्यान् धरति। | धीवरेण मत्स्याः ध्रियन्ते। |
| यात्री नदीं तरति। | यात्रिणा नदी तीर्यते। |
| स्त्रियः तण्डुलान् विकिरन्ति। | स्त्रीभिः तण्डुलाः विकीर्यन्ते। |
| सर्पः कीटान् निगिरति। | सर्पेण कीटाः निगीर्यन्ते। |

## कर्तरि कर्मणि च प्रथमपुरुषस्य एकवचन-रूपाणि पठत—

[ कर्तृवाच्य एवं कर्मवाच्य में प्रथमपुरुष एकवचन रूपों को पढ़ें। Read the paradigm of active and passive voice in the first person singular. ]

| धातुः | कर्तरि | कर्मणि |
|---|---|---|
| कृ | करोति | क्रियते |
| मृ | म्रियते | म्रियते |
| धृ | धरति | ध्रियते |
| भृ | भरति | भ्रियते |
| आ-दृ | आद्रियते | आद्रियते |
| जागृ | जागर्ति | जागर्यते |

| धातुः | कर्तरि | कर्मणि |
|---|---|---|
| कॄ | किरति | कीर्यते |
| तॄ | तरति | तीर्यते |
| गॄ | गिरति | गीर्यते |
| जॄ | जरति | जीर्यते |
| पॄ | पृणाति | पूर्यते |
| वॄ | वृणाति | वूर्यते |

**अवधातव्यम्**

ऋकारान्तधातूनां कर्मणि 'ऋ' इत्यस्य 'रि' तथा च ॠकारान्तधातूनां 'ॠ' इत्यस्य 'ईर्' रूपेण प्रायशः परिवर्तनं भवति। परम् ॠकारात् पूर्वं पवर्गः वकारः वा भवति चेत् तदा 'ऊर्' रूपेण परिवर्तनं भवति। 'यते', 'येते', 'यन्ते' इत्यादीनां योजनं तु पूर्ववत् भवति।

**यथा** कृ = क्रि + यते (क् + ऋ → रि = क्रि + यते)

कॄ = कीर् + यते (क् + ॠ → ईर् = कीर् + यते)

पॄ = पूर् + यते (प् + ॠ → पूर् + यते)

## अभ्यासः — 187

### अधोनिर्दिष्टानां धातूनां यथोदाहरणं कर्मणि रूपं लिखत—

[ अधोलिखित धातुओं के उदाहरण के अनुसार कर्म-वाच्य में रूप लिखें। Write the forms of passive voice of the following roots as shown in the example. ]

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | **कृ** | **क्रियते** | **क्रियेते** | **क्रियन्ते** |
| 1. | मृ | म्रियते | | |
| 2. | भृ | भ्रियते | | |
| 3. | आ-दृ | आद्रियते | | |
| 4. | जागृ | जागर्यते | | |

## अभ्यासः — 188

✍ **अधस्तात् कर्मणि प्रयोगे अपूर्णानि वाक्यानि सन्ति। मञ्जूषागत-धातूनां रूपैः तानि पूरयत–**

[ नीचे कर्मवाच्य के अपूर्ण वाक्य हैं, इन्हें मञ्जूषागत धातुओं के उचित रूप से पूरा करें। Complete the sentences with the appropriate passive forms of the roots given in the box. ]

**हृ, मृ, आ+दृ, जागृ**

1. जलेन विना प्राणिभिः ।
2. चोरेण धनं ।
3. राज्ञा पण्डिताः ।
4. वृद्धेन प्रातः ।

## अभ्यासः — 189

✍ **अधोलिखितानां धातूनां यथोदाहरणं कर्मणि रूपाणि लिखत–**

[ उदाहरण के अनुसार अधोलिखित धातुओं के कर्मवाच्य में रूप लिखें। Write the passive forms of the following roots as shown in the example. ]

| | धातुः | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | कॄ | कीर्यते | कीर्येते | कीर्यन्ते |
| 1. | तॄ | | | |
| 2. | गॄ | | | |
| 3. | जॄ | | | |
| 4. | पॄ | पूर्यते | पूर्येते | पूर्यन्ते |
| 5. | वॄ | | | |

**कर्तरि कर्मणि च प्रथमपुरुषे प्रयोगान् पठत—**

[ कर्तृवाच्य एवं कर्मवाच्य के प्रथमपुरुष प्रयोगों को पढ़ें। Read the usages of active and passive voice in first person. ]

| कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|
| शकुन्तला उद्यानं गच्छति। | शकुन्तलया उद्यानं गम्यते। |
| कामान्धः दोषं न पश्यति। | कामान्धेन दोषः न दृश्यते। |
| कुक्कुरः मार्गं जिघ्रति। | कुक्कुरेण मार्गः घ्रायते। |
| बालः मधुरम् इच्छति। | बालेन मधुरम् इष्यते। |
| दाता धनं यच्छति। | दात्रा धनं दीयते। |
| वृद्धाः संस्कृतं जानन्ति। | वृद्धैः संस्कृतं ज्ञायते। |
| परमात्मा सर्वं जानाति। | परमात्मना सर्वं ज्ञायते। |
| कृषकः क्षेत्रं कर्षति। | कृषकेण क्षेत्रं कृष्यते। |

## अभ्यासः — 190

**यथोदाहरणं कर्मणि द्विवचने बहुवचने च रूपं लिखत—**

[ उदाहरण के अनुसार कर्मवाच्य में द्विवचन एवं बहुवचन रूप लिखें। Write the dual and plural forms in passive voice as shown in the example.]

| | | धातुः | कर्मणि प्रयोगः | द्वि. | बहु. |
|---|---|---|---|---|---|
| उदा. | 1. | **गम्** | **गम्यते** | **गम्येते** | **गम्यन्ते** |
| | 2. | दृश् | दृश्यते | | |
| | 3. | घ्रा | घ्रायते | | |
| | 4. | ज्ञा | ज्ञायते | | |
| | 5. | जन् | जन्यते | | |
| | 6. | तन् | तन्यते | | |
| | 7. | दाण् | दीयते | | |
| | 8. | इष् | इष्यते | | |
| | 9. | कृष् . | कृष्यते | | |
| | 10. | वृत् | वृत्यते | | |

## कर्तरि कर्मणि च प्रथमपुरुषस्य एकवचनरूपाणि पठत–

[ कर्तृवाच्य एवं कर्मवाच्य के प्रथमपुरुष एकवचन रूपों को पढ़ें। Read the forms of active and passive voice in the first person singular. ]

| | | धातुः | कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|---|---|---|
| उदा. | 1. | गम् | गच्छति | गम्यते |
| | 2. | दृश् | पश्यति | दृश्यते |
| | 3. | घ्रा | जिघ्रति | घ्रायते |
| | 4. | दाण् | यच्छति | दीयते |
| | 5. | ज्ञा | जानाति | ज्ञायते |
| | 6. | जन् | जायते | जन्यते |
| | 7. | इष् | इच्छति | इष्यते |

## कर्तरि कर्मणि च प्रथमपुरुष-प्रयोगान् पठत–

[ कर्तृवाच्य एवं कर्मवाच्य के प्रथम-पुरुष के प्रयोगों को पढ़ें। Read the usages of active and passive voice in the first person. ]

| कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|
| कन्याः पुष्पाणि चिन्वन्ति। | कन्याभिः पुष्पाणि चीयन्ते। |
| पिता पुत्रं नयति। | पित्रा पुत्रः नीयते। |
| रक्षकः शत्रून् जयति। | रक्षकेण शत्रवः जीयन्ते। |
| पतितः पापं क्षयति। | पतितेन पापं क्षीयते। |
| महिला आभूषणानि क्रीणाति। | महिलया आभूषणानि क्रीयन्ते। |
| रमेशः मित्रं प्रीणाति। | रमेशेन मित्रं प्रीयते। |
| श्रोतारः कथां शृण्वन्ति। | श्रोतृभिः कथा श्रूयते। |
| मुनिः मायां मुञ्चति। | मुनिना माया मुच्यते। |
| शकुन्तला पादपान् सिञ्चति। | शकुन्तलया पादपाः सिच्यन्ते। |
| वञ्चकः मार्गं रुणद्धि ? | वञ्चकेन मार्गः रुध्यते। |
| धर्मः पापं छिनत्ति। | धर्मेण पापं छिद्यते। |
| अधिकारी कर्मकरान् नियुनक्ति। | अधिकारिणा कर्मकराः नियुज्यन्ते। |
| राजा महीं भुनक्ति। | राज्ञा मही भुज्यते। |
| कृषकः वृष्टिम् आशास्ते। | कृषकेण वृष्टिः आशास्यते। |
| पण्डितः नीतिम् आचष्टे। | पण्डितेन नीतिः आख्यायते। |

**कर्तरि कर्मणि च प्रथम-पुरुषस्य एकवचनरूपाणि पठत—**

[ कर्तृवाच्य एवं कर्मवाच्य के प्रथमपुरुष एकवचन रूपों को पढ़ें। Read the verbal forms of active as well as passive voice in the first person singular. ]

| | धातुः | कर्तरि प्रयोगः | कर्मणि प्रयोगः |
|---|---|---|---|
| 1. | चि | चिनोति | चीयते |
| 2. | जि | जयति | जीयते |
| 3. | क्षि | क्षयति | क्षीयते |
| 4. | नी | नयति | नीयते |
| 5. | क्री | क्रीणाति | क्रीयते |
| 6. | प्री | प्रीणाति | प्रीयते |
| 7. | भी | बिभेति | भीयते |
| 8. | श्रृ | शृणोति | श्रूयते |

## अभ्यासः — 191

**यथोदाहरणं कर्मणि प्रयोगस्य द्विवचनं बहुवचनं च पूरयत—**

[ कर्मवाच्य के द्विवचन एवं बहुवचन रूप लिखें। Write the dual and plural forms of passive voice as shown in the example. ]

| | | धातुः | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| उदा. | 1. | चि | चीयते | चीयेते | चीयन्ते |
| | 2. | जि | जीयते | | |
| | 3. | क्षि | क्षीयते | | |
| | 4. | नी | नीयते | | |
| | 5. | क्री | क्रीयते | | |
| | 6. | प्री | प्रीयते | | |
| | 7. | श्रृ | श्रूयते | | |
| | 8. | बध् | बध्यते | | |
| | 9. | रुध् | रुध्यते | | |
| | 10. | छिद् | छिद्यते | | |
| | 11. | भिद् | भिद्यते | | |
| | 12. | युज् | युज्यते | | |
| | 13. | सिच् | सिच्यते | | |
| | 14. | मुच् | मुच्यते | | |
| | 15. | आशास् | आशास्यते | | |
| | 16. | आचक्ष् | आख्यायते | | |

## अभ्यासः – 192

**अधोनिर्दिष्टेषु वाक्येषु कर्तरि कर्मणि च प्रयोगाः सन्ति। कर्तरि कर्मणि च का विभक्तिः इति निर्दिष्टे कोष्ठके लिखत। अपि च, निर्दिष्टे स्थाने कर्तृकर्मणोः कतरस्मिन् प्रयोगः इति निर्दिशत—**

[ अधोनिर्दिष्ट वाक्यों में कर्तृवाच्य एवं कर्मवाच्य के प्रयोग हैं। कर्तृपद एवं कर्मपद की विभक्तियों को लिखें। निर्दिष्ट स्थान में प्रयोग कर्त्ता में है या कर्म में है- यह भी लिखें। The following sentences have the usages of either active or passive voice. Point out the case-endings of the subject and object. Also point out whether the particular form is in active voice or passive voice. ]

| | वाक्यम् | कर्तृपदस्य विभक्तिः | कर्मपदस्य विभक्तिः | कर्तरि / कर्मणि प्रयोगः |
|---|---|---|---|---|
| उदा. | **बालः पाठं पठति।** | **प्रथमा** | **द्वितीया** | **कर्तरि प्रयोगः** |
| | **रामेण पाठः पठ्यते।** | **तृतीया** | **प्रथमा** | **कर्मणि प्रयोगः** |
| 1. | तया पत्रं लिख्यते। | | | |
| 2. | ते पुष्पं पश्यन्ति। | | | |
| 3. | वयं देवं नमामः। | | | |
| 4. | यूयं कार्यं कुरुथ। | | | |
| 5. | मया देवाः नम्यन्ते। | | | |
| 6. | जनाः श्लोकान् पठन्ति। | | | |
| 7. | तेन लेखन्यः स्थाप्यन्ते। | | | |
| 8. | त्वं फलानि खादसि। | | | |
| 9. | छात्राः प्रश्नान् पृच्छन्ति। | | | |
| 10. | त्वया ग्रन्थाः अवलोक्यन्ते। | | | |
| 11. | यजमानेन सेवकाः सूच्यन्ते। | | | |
| 12. | भक्तैः देवः पूज्यते। | | | |
| 13. | अर्चकाः पुष्पाणि नयन्ति। | | | |
| 14. | वयं चित्राणि पश्यामः। | | | |
| 15. | मया गुरुः वन्द्यते। | | | |
| 16. | त्वया भगिनी सूच्यते। | | | |
| 17. | धेनुभिः तृणं चर्व्यते। | | | |
| 18. | देवः भक्तं रक्षति। | | | |

## अभ्यासः – 193

✍ **अधोनिर्दिष्टानां वाक्यानां कर्मणि प्रयोगान् लिखत–**

[ अधोनिर्दिष्ट वाक्यों का कर्मवाच्य में प्रयोग लिखें। Write the passive usages of following sentences. ]

**कर्मपदस्य पुंलिङ्गप्रयोगाः**

उदा. **बालः पाठं पठति।** ........ **बालेन पाठः पठ्यते** ........ ।

1. छात्रः श्लोकं वदति। ........ ।
2. गुरुः पाठम् अध्यापयति। (अध्याप्) ........ ।
3. आरक्षकः चोरं गृह्णाति। (ग्रह्-गृह्) ........ ।
4. अधिकारी सेवकं कथयति। (कथ्) ........ ।
5. भगिनी ग्रन्थम् उद्घाटयति। (उद्घाट्) ........ ।
6. बालकः देवं नमति। ........ ।
7. ऋषिः ईश्वरं भजति। ........ ।
8. रमेशः सुरेशं ताडयति। (ताड्) ........ ।
9. अहं शिलाखण्डं स्पृशामि। ........ ।
10. सः विद्यालयं गच्छति। ........ ।

**कर्मपदस्य स्त्रीलिङ्गप्रयोगाः**

उदा. **स्वामिनी सेविकाम् आदिशति।** ........ **स्वामिन्या सेविका आदिश्यते** ........ ।

11. अध्यापकः विद्यार्थिनीं बोधयति। (बोध्) ........ ।
12. सा लेखनीं रक्षति। ........ ।
13. एषा मालां जपति। ........ ।
14. धीरः समस्यां विचारयति। (विचार्) ........ ।
15. बालः शिलां क्षिपति। ........ ।
16. अनुजः वृत्तान्तं निवेदयति। (निवेद्) ........ ।
17. माता पुत्रीं प्रवर्तयति। (प्रवर्त्) ........ ।
18. पितामही कथां कथयति। (कथ्) ........ ।
19. कपिः शाखां स्पृशति। ........ ।
20. अहिः नदीं तरति। ........ ।

**कर्मणः नपुंसकप्रयोगाः**

| | | | |
|---|---|---|---|
| उदा. | **सः पदम् उच्चारयति।** | (उच्चार्) | **तेन पदम् उच्चार्यते** ........ । |
| 21. | सा पुस्तकं परिशीलयति। | (परिशील्) | । |
| 22. | सेवकः जलम् आनयति। | (आनी) | । |
| 23. | चित्रकारः चित्रं रचयति। | (रच्) | । |
| 24. | कृषकः सस्यं पोषयति। | (पोष्) | । |
| 25. | आरक्षकः यानं रोधयति। | (रोध्) | । |
| 26. | यान्त्रिकः यन्त्रं परिशोधयति। | (परिशोध्) | । |
| 27. | मुनिः अरण्यं गच्छति। | (गम्) | । |
| 28. | सा वस्त्रं क्षालयति। | (क्षाल्) | । |
| 29. | अहं कार्यं सम्पादयामि। | (सम्पाद्) | । |
| 30. | त्वं पत्रं प्रेषयसि। | (प्रेष्) | । |

## अभ्यासः — 194

✍ **यथोदाहरणं वाक्यानि कर्मणि परिवर्तयत–**

[उदाहरण के अनुसार वाक्यों को कर्मवाच्य में बदलें। Convert the active voice sentences into passive ones as shown in the example.]

| | | | |
|---|---|---|---|
| उदा. | **बालकः कवितां लिखति।** | | **बालकेन कविता लिख्यते** ........ । |
| 1. | छात्रः प्रश्नं चिन्तयति। | (चिन्त्) | । |
| 2. | अध्यापकः शिष्यं सूचयति। | (सूच्) | । |
| 3. | बालः हस्तं प्रक्षालयति। | (प्रक्षाल्) | । |
| 4. | शिष्यः गुरुं पूजयति। | (पूज्) | । |
| 5. | अर्चकः देवं समाराधयति। | (समाराध्) | । |
| 6. | अहं मालां धारयामि। | (धार्) | । |
| 7. | सीता रोटिकां खादति। | (खाद्) | । |
| 8. | बालिका सखीं निन्दति। | (निन्द्) | । |
| 9. | बालकाः दुर्गुणं त्यजन्ति। | (त्यज्) | । |
| 10. | वयं कारयानानि चालयामः। | (चाल्) | । |

11. त्वं पत्रं प्रेषयसि। (प्रेष्) ।
12. यूयं रूप्यकाणि गणयथ। (गण्) ।
13. नटः जनं मोदयति। (मोद्) ।
14. त्वं सत्यं चरसि। (चर्) ।
15. वयं सज्जनम् अनुगच्छामः। (अनु-गम्) ।
16. अहं सरस्वतीम् अर्चामि। (अर्च्) ।
17. यूयं यानं चालयथ। (चाल्) ।
18. गुरुः छात्रं पाठयति। (पाठ्) ।
19. नृपः सचिवं निर्दिशति। (निर्-दिश्) ।
20. मित्रं कवितां लिखति। (लिख्) ।

## अभ्यासः — 195

**अधोलिखितान् मूलशब्दान् आश्रित्य यथोदाहरणं कर्मणि एकवचने वाक्यानि रचयत—**
[ अधोलिखित मूलशब्दों के आधार पर उदाहरण के अनुसार कर्मवाच्य के एकवचन में वाक्य रचना करें।
Make sentences in passive singular on the basis of the base words as shown in the example. ]

उदा. **बाल श्लोक पठ्।** → **बालेन श्लोकः पठ्यते** ।
1. राम पाठ लिख्। → ...................... ।
2. गोपाल धेनु चर्। → ।
3. रोहित फल खाद्। → ।
4. सेवक दीप निर्वाप्। → ।
5. मूर्ख सज्जन निन्द्। → ।
6. यजमान कार्य सूच्। → ।
7. उद्यानपालक लता सिच्। → ।
8. भक्त देव नम्। → ।
9. बालक दुर्गुण त्यज्। → ।

10. लता सखी सूच्। → ।
11. रजक वस्त्र क्षाल्। → ।
12. सुधा ग्रन्थ पठ्। → ।
13. चोर घटी चोर्। → ।
14. महिला दीप नी। → ।
15. छात्र नियम पाल्। → ।
16. नृप प्रजा रक्ष्। → ।
17. व्यवस्थापक कार्यक्रम अवलोक्। → ।
18. अर्चक देव अर्च्। → ............................ ।
19. छात्रा पुस्तक स्थाप्। → ।
20. शिष्य कविता लिख्। → ।

## अभ्यासः — 196

✍ **यथोदाहरणं रूपाणि लिखत—**
[उदाहरण के अनुसार रूप लिखें। Write the verbal forms as shown in the example.]

| | | द्विवचने | बहुवचने |
|---|---|---|---|
| उदा. | **पठ्यते** | **पठ्येते** | **पठ्यन्ते** |
| 1. | लिख्यते | | |
| 2. | गम्यते | | |
| 3. | त्यज्यते | | |
| 4. | वन्द्यते | | |
| 5. | खाद्यते | | |
| 6. | क्षाल्यते | | |
| 7. | स्थाप्यते | | |
| 8. | मिल्यते | | |
| 9. | ज्ञायते | | |

10. पत्यते
11. गृह्यते
12. सूच्यते
13. पाल्यते
14. चोर्यते
15. मिल्यते
16. कथ्यते
17. कुप्यते
18. दह्यते
19. गम्यते
20. पीड्यते
21. सह्यते
22. गण्यते
23. गर्ज्यते
24. चिन्त्यते
25. सिच्यते

## अभ्यासः — 197

**कर्मणि प्रयोगे कर्मणः अनुसारं क्रियापदस्य प्रयोगः भवति इति पूर्वम् उक्तम्। तत्र कर्मपदम् अनुसृत्य क्रियापदस्य वचनादिकं भवति। यथानिर्देशं कर्मपदस्य द्विवचनान्तं बहुवचनान्तं वा रूपं योजयन्तः कर्मणि वाक्यानि लिखत—**

[ कर्मवाच्य में कर्म के अनुसार क्रियापद का प्रयोग होता है- यह पहले कहा जा चुका है। कर्मपद के अनुसार ही क्रियापद के वचनादि होते हैं। यथानिर्देश कर्मपद के द्विवचनान्त अथवा बहुवचनान्त रूप जोड़कर कर्मवाच्य में वाक्य लिखें। The verbal form is used as per the object in the passive voice. The number etc. of the verbal forms are governed by the objects. Write the sentences either in dual or in plural as per the number supplied in the bracket. ]

(2) = द्विवचनम्, (3) = बहुवचनम्

**उदा. बालेन ग्रन्थः (2) पठ्** → **बालेन ग्रन्थौ पठ्येते** ।

1. तेन देवः (3) नम् → ।
2. बालकेन वाक्यं (3) लिख् → ।
3. तया गीतं (3) गै (गी) → ।
4. कविना काव्यं (2) रच् → ।
5. मया बालः (3) सूच् → ।
6. एतेन लेखनी (3) क्री → ।
7. अध्यापकेन छात्रः (2) पाठ् → ।
8. जनैः कार्यं (3) कृ (क्रि) → ।
9. त्वया शब्दः (3) चिन्त् → ।
10. वैद्येन रोगी (3) दृश् → ।
11. बालया स्यूतः (2) क्री → ।
12. ग्रन्थपालेन ग्रन्थः (3) वितृ (वितीर्) → ।
13. सेवकेन सस्यं (2) रोप् → ।
14. कृषकेण वृषभः (2) पाल् → ।
15. आरक्षकेण चोरः (2) ग्रह् (गृह्) → ।
16. बालकेन फलं (2) खाद् → ।
17. सेविकया पात्रं (2) प्रक्षाल् → ।
18. तेन बालः (2) ताड् → ।
19. धनिकेन शुनकः (2) पोष् → ।
20. चालकैः यानं (3) चाल् → ।

## अभ्यासः — 198

**यथोदाहरणं कर्मणि वाक्यानि लिखत—**

[उदाहरण के अनुसार कर्मवाच्य में वाक्य लिखें। Write sentences in passive voice as shown in the example.]

उदा. **भक्तः देवान् नमति।** ........भक्तेन........ ........देवाः........ ........नम्यन्ते........ ।

1. गुरुः शिष्यान् पाठयति। (पाठ्) .............................. ।
2. अर्चकः देवान् अर्चति। (अर्च) ।
3. शिक्षकः बालौ आह्वयति। (आह्व) ।
4. नायकः सैनिकान् सूचयति। (सूच्) ।
5. अहं तौ पश्यामि। (दृश्) ।
6. वैद्यः रुग्णान् वदति। (उद्) ।
7. त्वं बालिके पीडयसि। (पीड्) ।
8. कृष्णः गोपीः अनुगृह्णाति। (अनुगृह्) ।
9. माला ते (द्वि०) प्रेषयति। (प्रेष्) ।
10. रमाकान्तः छात्रान् अभिनन्दति। (अभिनन्द) ।
11. गौतमी कार्याणि करोति। (क्रि) ।
12. प्रकाशः पत्राणि आनयति। (आनी) .............................. ।
13. नारायणः ग्रन्थौ नयति। (नी) ।
14. प्रतिमा स्यूतान् स्थापयति। (स्थाप्) ।
15. सीता कविते पठति। (पठ्) ।
16. रमा पद्ये लिखति। (लिख्) ।
17. महिला शाटिकाः प्रक्षालयति। (प्रक्षाल्) ।
18. सेविका प्रकोष्ठौ मार्जयति। (मार्ज्) ।
19. स्वामी सेवकान् निन्दति। (निन्द्) ।
20. बालकः नगराणि पश्यति। (दृश्)

## अभ्यासः – 199

✍ **मञ्जूषायां प्रदत्तानां धातुरूपाणाम् आधारेण कर्तरि विद्यमानं प्रयोगं कर्मणि परिवर्तयत–**
[ मञ्जूषा में प्रदत्त क्रियापदों के आधार पर कर्तृवाच्य के प्रयोगों को कर्मवाच्य में बदलें। Change the active voice usages into passive ones on the basis of the verbal forms given in the box. ]

**विशेषक्रियापदानि**

पिबति - पीयते, क्रीणाति - क्रीयते, चिनोति - चीयते, ददाति - दीयते, जानाति - ज्ञायते, आह्वयति - आहूयते, नयति - नीयते, गृह्णाति - गृह्यते, करोति - क्रियते, वक्ति - उच्यते, स्वपिति - सुप्यते, वपति - उप्यते, वसति - उष्यते।

**उदा. बालः क्षीरं पिबति।** ........**बालेन**........ ........**क्षीरं**........ ........**पीयते**...... ।

1. लता वस्त्रं क्रीणाति। ।
2. छात्रः विषयं जानाति। ।
3. सुधा पुष्पाणि चिनोति। ।
4. शिष्यः स्यूतं नयति। ।
5. महिला शाटिकां क्रीणाति। ।
6. रविः जलं पिबति। ।
7. कविः विचारान् सङ्गृह्णाति। ............................ ।
8. भीमः पुस्तकानि क्रीणाति। ।
9. अहं वस्तूनि नयामि। ।
10. धनिकः धनं ददाति। ।
11. बालकः कार्यं करोति। ।
12. सचिवः भाषणं जानाति। ।
13. गीता शाकं नयति। ।
14. ते पुस्तकानि स्वीकुर्वन्ति। ।
15. मालाकारी पुष्पाणि चिनोति। ।
16. सैनिकः युद्धं जानाति।
17. मनुः फलरसं पिबति। ।
18. शिशुः चलनं न जानाति। ।
19. राधा शाटिकां नयति। ।
20. शिक्षिका लेखनीं क्रीणाति। ।

# अभ्यासः — 200

✍ **अधोनिर्दिष्टेषु वाक्येषु क्रियापदं संशोध्य लिखत—**

[ अधोनिर्दिष्ट वाक्यों मे क्रियापदें को संशोधन करें। Correct the verbal forms in the following sentences. ]

| | | | | |
|---|---|---|---|---|
| **उदा.** | बालैः | पाठः | ~~पठ्यन्ते~~ | ........**पठ्यते**........ । |
| 1. | छात्रैः | ग्रन्थः | ~~लिख्यन्ते~~ | । |
| 2. | मित्रैः | वार्ता | ~~पठ्यन्ते~~ | । |
| 3. | बालकैः | श्लोकः | ~~उच्यन्ते~~ | । |
| 4. | महिलाभिः | पाकः | ~~क्रियन्ते~~ | । |
| 5. | युवकैः | सेवा | ~~क्रियन्ते~~ | । |
| 6. | कर्मकरैः | कार्यं | ~~क्रियन्ते~~ | .............................. । |
| 7. | बालकैः | जलं | ~~पीयन्ते~~ | । |
| 8. | जनन्या | भोजनं | ~~पच्यन्ते~~ | । |
| 9. | शिक्षकेण | पाठाः | ~~पठ्यते~~ | । |
| 10. | जनैः | उपदेशः | ~~श्रूयन्ते~~ | । |
| 11. | गायकैः | गीतं | ~~गीयन्ते~~ | । |
| 12. | पण्डितेन | वेदाः | ~~उच्चार्यते~~ | । |
| 13. | पाचकैः | पाकः | ~~क्रियन्ते~~ | । |
| 14. | कुम्भकारेण | घटाः | ~~क्रियते~~ | । |
| 15. | बालिकाभिः | गृहपाठौ | ~~लिख्यन्ते~~ | । |
| 16. | जनैः | मूर्खौ | ~~निन्द्यन्ते~~ | । |
| 17. | तया | फले | ~~क्रीयते~~ | । |
| 18. | सर्वैः | गीतं | ~~गीयन्ते~~ | । |
| 19. | मया | वाक्ये | ~~रच्यते~~ | । |
| 20. | तेन | दीपौ | ~~ज्वाल्यते~~ | । |

**सकर्मकाकर्मकव्यवस्था**

### अधोनिर्दिष्टानि वाक्यानि पठत–

[ नीचे लिखे वाक्यों को पढ़ें। Read the following sentences. ]

| क. सकर्मक-वाक्यानि | ख. अकर्मक-वाक्यानि |
|---|---|
| बालः गीतं गायति। | कार्यक्रमः भवति। |
| छात्रः पाठं पठति। | सस्यं वर्धते। |
| माला वार्तां शृणोति। | कुक्कुरः भषति। |
| सुधा चित्रं लिखति। | बालः धावति। |
| शिष्यः मन्त्रं वदति। | लता तिष्ठति। |
| रामः भोजनं करोति। | सिंहः गर्जति। |
| कृष्णः जलं पिबति। | नटी नृत्यति। |
| रमा दुष्टं निन्दति। | शिवः हसति। |
| गीता कार्यं करोति। | पक्षी डयते। |
| भीमः स्यूतं नयति। | पुष्पं विकसति। |

☞ **'क'-खण्ड-वाक्येषु कर्मपदम् अस्ति। 'ख'-खण्ड-वाक्येषु कर्मपदं नास्ति। एवं 'क'-खण्ड-वाक्यानि सकर्मकवाक्यानि 'ख'-खण्ड-वाक्यानि च अकर्मकवाक्यानि।**

⇨ कर्तृपदसहितं क्रियापदम् उद्दिश्य 'किम्' इति यदा प्रश्नं कुर्मः, तदा यदि उत्तरं प्राप्यते, तर्हि तत् क्रियापदं सकर्मकम्। उत्तरं न प्राप्तं चेत् अकर्मकम्।

| सकर्मकम् | अकर्मकम् |
|---|---|
| **उदा.** छात्रः पठति। | **उदा.** छात्रः हसति। |
| छात्रः किं पठति ? | छात्रः किं हसति ? |
| (पुस्तकं / ग्रन्थं इति उत्तरम् अस्ति) | (उत्तरं नास्ति) |
| अतः पठ्-धातुः सकर्मकः। | अतः हस्-धातुः अकर्मकः। |

## अभ्यासः — 201

✍ **अधः प्रदत्ताः धातवः सकर्मकाः अकर्मकाः वा इति लिखत—**

[ अधोलिखित धातु सकर्मक या अकर्मक है, लिखें। Write whether the following roots are transitives or intransitives. ]

| | वाक्यम् | किम् इत्यस्य उत्तरम् अस्ति/नास्ति | धातुः | सकर्मकः / अकर्मकः |
|---|---|---|---|---|
| उदा. | **छात्रः लिखति।** | अस्ति | लिख् | सकर्मकः |
| 1. | बालः पठति। | | | |
| 2. | गीता खादति। | | | |
| 3. | कृष्णः धावति। | | | |
| 4. | श्यामः स्मरति। | | | |
| 5. | राधा तिष्ठति। | | | |
| 6. | गोविन्दः वदति। | | | |
| 7. | शुनकः भषति। | | | |
| 8. | भीमः शृणोति। | | | |
| 9. | गायत्री निन्दति। | | | |
| 10. | पुष्पं विकसति। | | | |
| 11. | पुरुषः गच्छति। | | | |
| 12. | वृद्धः हसति। | | | |
| 13. | पक्षी डयते। | | | |
| 14. | सचिवः पिबति। | | | |
| 15. | शाखा कम्पते। | | | |
| 16. | पार्वती नयति। | | | |
| 17. | वृक्षः वर्धते। | | | |
| 18. | भटः रक्षति। | | | |

**स्मरत**

यत्र 'किम्' इत्यस्य उत्तरं न लभ्यते तत् एव अकर्मकं क्रियापदम्। **यथा** बालः हसति, वृक्षः वर्धते इत्यादि।

**भावे प्रयोगः**


## अधोलिखितम् अनुच्छेदं पठत–

[ निम्नलिखित अनुच्छेद को पढ़ें। Read the following paragraph. ]

मृगालये अनेकैः प्राणिभिः भूयते। तत्र सिंहेन गर्ज्यते। हरिणैः धाव्यते। पक्षिभिः डीयते। सिंह-दर्शनेन हरिणीभिः कम्प्यते, धाव्यते च। सिंहगर्जनं श्रुत्वा शिशुभिः रुद्यते। अन्यैः बालैः सविस्मयं स्थीयते। मृगालयस्य पार्श्वे एकत्र वनेन एकेन भूयते। तत्र अनेकैः पुष्पैः विकस्यते। वृक्षैः वर्ध्यते। एतानि सर्वाणि दृष्ट्वा बालैः सन्तोषेण हस्यते।

☞ **उपरितनवाक्येषु क्रियापदानि भावे प्रयुक्तानि। अत्र सावधानं परिशीलयत। सर्वत्र क्रियापदस्य प्रयोगः एकवचने प्रथमपुरुषे एव अस्ति। यत्र अकर्मकधातवः प्रयुज्यन्ते तत्र भावे प्रयोगः इति व्यवस्था। अर्थात् क्रिया भावं बोधयति चेत् तदा भावे प्रयोगः। अकर्मक-धातूनां प्रयोगे क्रियापदं कर्मापेक्षां न करोति इति कारणात् तस्य अन्यस्मिन् वचने, पुरुषे वा प्रयोगः न भवति।**

☞ **प्रयोगाः त्रिधा विभक्ताः– कर्तरि प्रयोगः, कर्मणि प्रयोगः, भावे प्रयोगः चेति। ते यथा–**




☞ **यत्र क्रियया भावः (धात्वर्थः) उच्यते सः भावे प्रयोगः। अकर्मकधातोः एव भावे प्रयोगः भवति। भावे प्रयोगे अपि धातोः 'य + ते' योज्यते।**

**यथा** हस् + य + ते = हस्यते।

उपविश् + य + ते = उपविश्यते।

## अभ्यासः – 202

✍ **अधोनिर्दिष्टानां धातूनां यथोदाहरणं भावे रूपं लिखत–**

[ अधोनिर्दिष्ट धातुओं का यथोदाहरण भाव में रूप लिखें। Write the *bhāva*-forms of the following roots as shown in the example. ]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| उदा. | **विकस्** | + | **य** | + | **ते** | = | विकस्यते |
| 1. | | + | | + | | = | हस्यते |
| 2. | | + | | + | | = | धाव्यते |
| 3. | | + | | + | | = | स्थीयते |
| 4. | | + | | + | | = | भष्यते |
| 5. | | + | | + | | = | मिल्यते |
| 6. | | + | | + | | = | डीयते |
| 7. | | + | | + | | = | वृध्यते |
| 8. | | + | | + | | = | भूयते |
| 9. | | + | | + | | = | कम्प्यते |
| 10. | | + | | + | | = | रुद्यते |

## अभ्यासः – 203

✍ **अधोनिर्दिष्टानां वर्तमानरूपाणां भावे रूपाणि लिखत–**

[ अधोनिर्दिष्ट वर्तमानरूपों का भाव में रूप लिखें। Write the *bhāva*-forms of the following present tense forms. ]

उदा. धावति – **धाव्यते**

| | | | | | |
|---|---|---|---|---|---|
| 1. | हसति – | | 6. | विकसति – | |
| 2. | रोदिति – | | 7. | धावति – | |
| 3. | तिष्ठति – | | 8. | उपविशति – | |
| 4. | कम्पते – | | 9. | मिलति – | |
| 5. | भवति – | | 10. | भषति – | |

☞ भावप्रयोगे सर्वदा क्रियापदे एकवचनं भवति। कर्मप्रयोगे तु कर्मणः एकत्वे एकवचनं, कर्मणः द्वित्वे द्विवचनं, कर्मणः बहुत्वे च बहुवचनं भवति।

## अभ्यासः – 204

✍ **केन किं न क्रियते इति लिखत–**

[ किसके द्वारा क्या नहीं किया जा रहा है लिखें। Write what is not being done by whom. ]

| | | | | |
|---|---|---|---|---|
| उदा. | ( क्रुद्धः | – | हस् ) | क्रुद्धेन न हस्यते । |
| 1. | ( मूकः | – | भाष् ) | । |
| 2. | ( मानवः | – | उड्डी ) | । |
| 3. | ( पङ्गुः | – | धाव् ) | । |
| 4. | ( निद्रितः | – | प्रस्था ) | । |
| 5. | ( शिला | – | कम्प् ) | । |
| 6. | ( पशु | – | हस् ) | । |
| 7. | ( शिलामयमुकुलम् | – | विकस् ) | । |
| 8. | ( व्याघ्रमूर्तिः | – | गर्ज ) | । |
| 9. | ( अपटुः | – | नृत् ) | । |
| 10. | ( वीरः | – | पलाय् ) | । |

## अभ्यासः — 205

✍ **अधः भाव-कर्मणोः वाक्यानि मिश्रयित्वा एकत्रैव लिखितानि सन्ति। तानि विचित्य निर्दिष्टस्थाने पृथक्-पृथक् लिखत—**

[ नीचे भाव एवं कर्म के वाक्य मिलाकर लिखे गए हैं। उन्हें चुनकर कर्म या भाव विभाग में यथास्थान लिखें। The follwing sentences belong to either active voice or impersonal voice. Classify them and write in appropriate column. ]

| | | | | | |
|---|---|---|---|---|---|
| 1. | रामेण पाठः पठ्यते। | 8. | बालैः देवः पूज्यते। | 15. | नटेन गानं श्रूयते। |
| 2. | रामेण उपविश्यते। | 9. | बालैः हस्यते। | 16. | नटेन नृत्यते। |
| 3. | रामेण स्थीयते। | 10. | बालेन तरुः कम्प्यते। | 17. | व्याघ्रेण गर्ज्यते। |
| 4. | पर्णेन पत्यते। | 11. | बालेन रुद्यते। | 18. | तेन प्रश्नः पृच्छ्यते। |
| 5. | बालैः कन्दुकं क्रीड्यते। | 12. | बालेन गीतं गीयते। | 19. | पित्रा पुत्रः ताड्यते। |
| 6. | बालैः लेखः लिख्यते। | 13. | बालेन शास्त्रं ज्ञायते। | 20. | पित्रा श्लोकः उच्यते। |
| 7. | बालैः धाव्यते। | 14. | त्वया न अखाद्यत। | | |

| **कर्मणि** | **भावे** |
|---|---|
| **रामेण पाठः पठ्यते** ............ । | **रामेण उपविश्यते** ............ । |
| । | । |
| । | । |
| । | । |
| । | । |
| । | । |
| । | । |
| । | । |
| । | । |
| । | । |

**वर्तमाने कर्मणि भावे च प्रयोगाः**

## आदर्शराज्यम्

जगति अनेकविधाः राजनैतिक-विचारधाराः अनेकविधाः च राजनैतिकव्यवस्थाः **दृश्यन्ते**। क्वचित् राजतान्त्रिकी व्यवस्था, क्वचित् च लोकतान्त्रिकी व्यवस्था अस्ति।

किञ्च या कापि विचारधारा व्यवस्था वा भवतु यस्यां राजनीतिकव्यवस्थायां राजनेतृभिः राजधर्मः सम्यक् **परिपाल्यते** सा व्यवस्था उत्तमा भवति। येन राज्येन नागरिकेभ्यः केचन मूलभूताः अधिकाराः **दीयन्ते**, नागरिकैश्च कानिचित् मूलभूतानि कर्तव्यानि **पाल्यन्ते** तद् राज्यम् उत्तमं, तस्य नागरिकाः च उत्तमाः भवन्ति।



यत्र राज्ये सर्वेभ्यः बालेभ्यः प्राथमिकी शिक्षा निःशुल्कं **दीयते**; श्रमिकेभ्यः उचितं पारिश्रमिकम् अवश्यं **निर्धार्यते**; केनचित् कस्यचित् अपि शोषणं न **क्रियते**; अधिकारिभिः जनाः **सेव्यन्ते**; कर्मचारिभिः सोत्साहं कर्म **क्रियते**; पुत्रैः पितरौ, शिष्यैः गुरवः, युवभिः वृद्धाः च **आद्रियन्ते**; गुरुभिः छात्रेषु पुत्रवत् **स्निह्यते** सम्यक् **अध्याप्यन्ते** च; सर्वैः नागरिकैः भोजनं, वस्त्रम् आवासः च **प्राप्यते**; जनैः परस्परं मैत्रीभावेन व्यवहारः **क्रियते**; लोके उत्तमगुणानाम् उत्तमचरित्रस्य च प्रतिष्ठा **दृश्यते**; गुणिषु गुणाः **पूज्यन्ते**; गुणाः कदापि न **तिरस्क्रियन्ते**; तद् राज्यम् एव आदर्शराज्यम्, **उच्यते** इति।

◆◆◆

## अभ्यासः — 206

1. **पाठाधारेण रिक्तस्थानानि पूरयत–**

[ पाठ के आधार पर रिक्त स्थान की पूर्ति करें। Fill in the blanks on the basis of the present lesson. ]

(i) राजनैतिक-विचारधाराः ............ । (ii) राजनेतृभिः राजधर्मः ............ ।

(iii) अधिकारिभिः जनाः ............ । (iv) गुणिषु गुणाः ............ ।

(v) गुणाः कदापि न ............ ।

2. **अधोलिखितानि वाक्यानि कर्मवाच्ये परिवर्तयत–**

[ अधोलिखित वाक्यों को कर्मवाच्य में बदलें। Change the following sentences into passive voice. ]

(i) भक्तः देवं पूजयति । (ii) कर्मचारिणः कर्म कुर्वन्ति ।

............ । ............ ।

(iii) नेता राजधर्मान् पालयति । (iv) विद्यार्थिनः गुरून् पूजयन्ति ।

............ । ............ ।

(v) राजा जनान् सेवते । (vi) अप्सराः इन्द्रं वन्दते ।

............ । ............ ।

3. **अधोलिखितानि वाक्यानि कर्तरि परिवर्तयत–**

[ अधोलिखित वाक्यों को कर्तृवाच्य में वदलें। Change the following sentences into active voice. ]

(i) नागरिकैः कर्तव्यानि आचर्यन्ते । (ii) जनैः व्यवहारः क्रियते ।

............ । ............ ।

(iii) राज्येन अधिकाराः दीयन्ते । (iv) सर्वैः भोजनं प्राप्यते ।

............ । ............ ।

(v) गुरुभिः छात्राः पाठयन्ते । (vi) विद्वद्भिः यज्ञः क्रियते ।

............ । ............ ।

**कर्मणि भूते लङ्**

## (क) अधोनिर्दिष्टानि वाक्यानि पठत—

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

बालेन पाठः अपठ्यत।

मया विद्यालयः अगम्यत।

छात्रेण लेखः अलिख्यत।

मालया चित्रम् अदृश्यत।

गोपालेन विषयः अज्ञायत।

मात्रा पुत्रः अताड्यत।

भवता नगरम् अभ्रम्यत।

जनैः वृक्षः अकर्त्यत।

भक्तेन देवः अनम्यत।

भिक्षुकेण धनम् अयाच्यत।

महिलया वस्त्रम् असीव्यत।

धनिकैः दानम् अदीयत।

यान्त्रिकेण यन्त्रम् अक्रियत।

कृषकेण भूमिः अकृष्यत।

क्रीडकेन कन्दुकम् अक्षिप्यत।

☞ **एतानि वाक्यानि कर्मणि भूतकाले सन्ति। आत्मनेपदिनः भूतकालरूपं स्मृतं चेत् 'पठ्यते' प्रभृतीनां कर्मणि प्रयोगाणां भावे प्रयोगाणां च भूतकालरूपम् आयासं विना प्राप्यते।**

**यथा** पठ्यते → अपठ्यत [ अ + धातुः + यत ]

↓

[ अ + पठ् + यत ] पठ्

लिख्यते → अलिख्यत [ अ + धातुः + यत ]

↓

[ अ + लिख् + यत ] लिख्

## अभ्यासः — 207

✍ **अधोलिखितानां वर्तमानकालरूपाणां भूतकालरूपाणि लिखत–**

[ अधोलिखित वर्तमानकालरूपों का भूतकाल रूप लिखें। Write the past tense forms of the following present tense forms. ]

| | | | | |
|---|---|---|---|---|
| यथा | ज्ञायते | → | **अज्ञायत** | [ अ + ज्ञा (धातुः) + यत ] |
| | लिख्यते | → | **अलिख्यत** | |
| 1. | क्रीड्यते | → | | |
| 2. | रच्यते | → | | |
| 3. | पूर्यते | → | | |
| 4. | मार्ज्यते | → | | |
| 5. | कथ्यते | → | | |
| 6. | खण्ड्यते | → | | |
| 7. | ध्रियते | → | | |
| 8. | स्नायते | → | | |
| 9. | स्थीयते | → | | |
| 10. | क्रियते | → | | |
| 11. | पीयते | → | | |

## अभ्यासः — 208

✍ **अधोलिखित-क्रियापदानां वर्तमान-भूतयोः कर्तरि कर्मणि च रूपं लिखत–**

[ अधोलिखित क्रियापदों के वर्तमान एवं भूत में कर्तृवाच्य एवं कर्मवाच्य रूप लिखें। Write the active and passive forms of the following verbal forms in present as well as past tense. ]

| वर्त. कर्तरि | वर्त. कर्मणि | भूते कर्तरि | भूते कर्मणि |
|---|---|---|---|
| उदा. 1. पठति | **पठ्यते** | **अपठत्** | **अपठ्यत** |

| वर्त. कर्तरि | वर्त. कर्मणि | भूते कर्तरि | भूते कर्मणि |
|---|---|---|---|
| 2. लिखति | | | |
| 3. क्रीडति | | | |
| 4. गच्छति | | | |
| 5. क्षालयति | | | |
| 6. पाठयति | | | |
| 7. जानाति | | | |
| 8. करोति | | | |
| 9. नयति | | | |
| 10. शृणोति | | | |
| 11. गृह्णाति | | | |
| 12. जिघ्रति | | | |
| 13. पश्यति | | | |
| 14. स्पृशति | | | |
| 15. हरति | | | |
| 16. धरति | | | |
| 17. गायति | | | |
| 18. ध्यायति | | | |
| 19. गणयति | | | |
| 20. क्रीणाति | | | |

## अभ्यासः — 209

**अधोनिर्दिष्टवाक्यानि भूतकाले लिखत—**

[ अधोनिर्दिष्ट वाक्यों को भूतकाल में लिखें। Write the following sentences in past tense. ]

**उदा. बालेन ग्रन्थः पठ्यते।** ......बालेन...... ......ग्रन्थः...... ......अपठ्यत...... ।

1. तेन गीतं गीयते। ।

2. तया श्लोकः स्मर्यते।
3. मया कार्यं क्रियते।
4. भवता वाक्यं लिख्यते।
5. ग्रन्थकारेण ग्रन्थः रच्यते।
6. कथाकारेण कथा श्राव्यते।
7. चालकेन यानं चाल्यते।
8. बालकेन जलं पीयते।
9. महिलया चित्रं रच्यते।
10. अध्यक्षेण सभा भूष्यते।
11. सेवकेन प्रकोष्ठः मार्ज्यते।
12. मया वस्त्रं क्षाल्यते।
13. देवदत्तेन वेदः ज्ञायते।
14. तया चित्रं दृश्यते।
15. भवता धनं दीयते।

## अभ्यासः — 210

✍ **कर्मणि प्रयोगे परिवर्तयत—**

[ कर्मवाच्य में परिवर्तन करें। Convert the usages to passive ones. ]

उदा. **बालः ग्रन्थम् अपठत्।** ........**बालेन**........ ........**ग्रन्थः**........ ........**अपठ्यत**........

1. सः शिलाम् अक्षिपत्।
2. एषा भित्तिम् अस्पृशत्।
3. भवान् तात्पर्यम् अजानात्।
4. दुष्टः सज्जनम् अपीडयत्।
5. सेवकः सस्यम् असिञ्चत्।
6. अग्निः गृहम् अदहत्।
7. चोरः धनम् अचोरयत्।

8. सा वस्त्रम् अस्थापयत्। ।
9. कृषकः धेनुम् अपालयत्। ।
10. ग्रामीणाः सस्यम् अपोषयन्। ।
11. गुरुः धर्मम् अबोधयत्। ।
12. मार्जारः मूषकम् अखादत्। ।
13. अहं दुरभ्यासम् अत्यजम्। ।
14. गृहस्वामी कष्टम् असहत। ।
15. भवान् देवम् अवन्दत। ।

**अधोलिखितानि रूपाणि स्मरत–**
[ अधोलिखित रूपों का स्मरण करें। Remember the following verbal forms. ]

**कर्मणि भूते रूपम्**

| | | |
|---|---|---|
| अपठ्यत | अपठ्येताम् | अपठ्यन्त |
| अरच्यत | अरच्येताम् | अरच्यन्त |
| अगीयत | अगीयेताम् | अगीयन्त |
| अखाद्यत | अखाद्येताम् | अखाद्यन्त |
| अश्रूयत | अश्रूयेताम् | अश्रूयन्त |

## अभ्यासः – 211

**अधोलिखितक्रियापदानां द्विवचन-बहुवचनरूपाणि लिखत–**
[ अधोलिखित क्रियापदों का द्विवचन बहुवचन रूप लिखें। Write the dual and plural forms of the following verbal forms. ]

उदा. **अदुह्यत** ....**अदुह्येताम्**.... ....**अदुह्यन्त**....
1. अखन्यत
2. अक्षिप्यत
3. अनृत्यत
4. अमार्ज्यत

5. अगण्यत
6. अचाल्यत
7. अपूज्यत
8. अबुध्यत
9. अहस्यत
10. अचिन्त्यत

## अभ्यासः — 212

✍ **अधोनिर्दिष्टक्रियापदानां यथोदाहरणं कर्मणि समानवचने रूपाणि लिखत—**

[ अधोनिर्दिष्ट क्रियापदों का उदाहरण के अनुसार उसी वचन में कर्मवाच्य का रूप लिखें। Write the passive forms of the following in the same number as shown in the example. ]

| | | |
|---|---|---|
| उदा. | अपठत् | **अपठ्यत** |
| | अलिखताम् | **अलिख्येताम्** |
| | अकुर्वन् | **अक्रियन्त** |

1. अनृत्यत्
2. अगच्छत्
3. अचलताम्
4. अपश्यन्
5. अभवत्
6. अहसताम्
7. अकरोत्
8. अगदन्
9. अखण्डयताम्
10. अक्षिपत्
11. अमार्जयन्
12. अचुम्बताम्
13. अपिबत्
14. अकथयन्
15. अतिष्ठताम्
16. अपश्यत्
17. अकर्तयन्
18. अचुटत्
19. अभषताम्
20. अवसत्
21. अकम्पन्त
22. अदशत्
23. अचरताम्
24. अपूरयन्

| | | | |
|---|---|---|---|
| 25. | अबध्नात् | 33. | अकर्षत् |
| 26. | अभाताम् | 34. | अवमन् |
| 27. | अनदत् | 35. | अशक्नोत् |
| 28. | अयच्छन् | 36. | अरचयन् |
| 29. | अमर्षयताम् | 37. | अदर्शयत् |
| 30. | अमुञ्चत् (अमुच्) | 38. | अपठत् |
| 31. | अवर्षताम् | 39. | अक्रीडन् |
| 32. | अरोहन् | 40. | अलुप्यन् |

## अभ्यासः — 213

✍ **अधोनिर्दिष्टेषु वाक्येषु कर्मणि यथोचितं भूतकालरूपं लिखत—**

[ अधोनिर्दिष्ट वाक्यों में कर्मवाच्य के यथोचित भूतकाल रूप लिखें। Write the appropriate past forms in passive voice in the following sentences. ]

**उदा. बालेन ग्रन्थः** **अपठ्यत** **(पठ्यते)**

| | | | |
|---|---|---|---|
| 1. छात्रैः नगराणि | (दृश्यन्ते) | 11. मधुपैः मधूनि | (चूष्यन्ते) |
| 2. पूजकेन देवः | (अर्च्यते) | 12. मया एषः | (ज्ञायते) |
| 3. मया एतत् कार्यं कर्तुम् | (शक्यते) | 13. हंसैः पुष्करिणी | (त्यज्यते) |
| 4. महिलया ग्रामः | (गम्यते) | 14. गोपालेन गावः | (दुह्यन्ते) |
| 5. त्वया कार्ये | (क्रियेते) | 15. धनिकाभ्यां धनं | (दीयते) |
| 6. मर्कटैः फलं | (खाद्यते) | 16. सज्जनैः दुर्जनाः | (निन्द्यन्ते) |
| 7. बालकेन कन्दुकम् | (क्षिप्यते) | 17. कविना कविताः | (लिख्यन्ते) |
| 8. शैवैः वैष्णवमतानि | (खण्ड्यन्ते) | 18. महिलया शाटिका | (ध्रियते) |
| 9. नैयायिकेन सिद्धान्ताः | (घोष्यन्ते) | 19. युवकैः चलचित्रे | (दृश्येते) |
| 10. शिक्षकैः विषयः | (चर्च्यते) | 20. शिक्षकेण छात्रः | (दण्ड्यते) |

## अभ्यासः — 214

✍ **यथोदाहरणं प्रयोगे परिवर्तनं कुरुत—**

[ उदाहरण के अनुसार प्रयोग में परिवर्तन करें। Change the usages as shown in the example. ]

| | | | |
|---|---|---|---|
| उदा. | **बालः विद्यालयम् अगच्छत्।** | उदा. | **बालेन विद्यालयः अगम्यत** । |
| 1. | शिक्षकः गणितविषयम् अबोधयत्। | 1. | । |
| 2. | इतिहासविदः तिरुपतिमन्दिरम् अपश्यन्। | 2. | । |
| 3. | पुत्रः जनकस्य परिचयम् अजानात्। | 3. | ………… । |
| 4. | गुरुः शिष्यान् आदिशत्। | 4. | । |
| 5. | शिक्षिका छात्रम् अपाठयत्। | 5. | । |
| 6. | देवाः फलानि न अखादन्। | 6. | । |
| 7. | छात्रः परीक्षापुस्तिकायाम् अलिखत्। | 7. | । |
| 8. | राजीवः चलचित्रम् अपश्यत्। | 8. | । |
| 9. | युवती शाटिकाम् अधरत्। | 9. | । |
| 10. | लेखकः लेखान् अरचयत्। | 10. | । |
| 11. | कविः कविताम् अरचयत्। | 11. | । |
| 12. | धनिकः धनम् अददात्। | 12. | । |
| 13. | मधुपाः मधु अचूषन्। | 13. | । |
| 14. | सत्पुरुषाः मूर्खान् अनिन्दन्। | 14. | । |
| 15. | काकः जलम् अपिबत्। | 15. | । |
| 16. | शिशुः गुलिकाम् अगिलत्। | 16. | । |
| 17. | माता पुत्रम् अबोधयत्। | 17. | । |
| 18. | शिक्षकः दुष्टबालकान् अदण्डयत्। | 18. | । |
| 19. | शिशुः उपनेत्रम् अक्षिपत्। | 19. | । |
| 20. | पुरुषाः नदीम् अतरन्। | 20. | । |

**कर्मणि भूते उपसर्गयोगः**

## अधोनिर्दिष्टानि वाक्यानि पठत–

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

| कर्तरि | कर्मणि |
|---|---|
| कृषिकः सर्पं प्राहरत्। | कृषिकेण सर्पः प्राह्रियत। |
| गुरुः शिष्यम् उपादिशत्। | गुरुणा शिष्यः उपादिश्यत। |
| माला वस्त्रं प्राक्षालयत्। | मालया वस्त्रं प्राक्षाल्यत। |
| रमेशः पिञ्जं प्राणुदत्। | रमेशेन पिञ्जः प्राणुद्यत। |
| पुरुषः काष्ठं व्यदारयत्। | पुरुषेण काष्ठं व्यदार्यत। |
| बालिका पेटिकाम् उदघाटयत्। | बालिकया पेटिका उदघाट्यत। |
| पुत्रः जनकम् अन्वगच्छत्। | पुत्रेण जनकः अन्वगम्यत। |
| धनिकः आसन्दे उपाविशत्। | धनिकेन आसन्दे उपाविश्यत। |
| भृत्यः भारम् उदनयत्। | भृत्येन भारः उदनीयत। |
| गृहिणी दीपान् प्राज्वलयत्। | गृहिण्या दीपाः प्राज्वल्यन्त। |

☞ **''प्राहरत्'' ''प्राहरताम्'' ''प्राहरन्'' इत्यादिषु कर्तरि वाक्येषु प्र-उत्-वि-इत्यादयः उपसर्गाः सन्ति। अतः अत्र क्रियापदप्रयोगः कथम् इति वयम् उपसर्गप्रकरणे लङ्-प्रकरणे च ज्ञातवन्तः एव। यथा उपसर्गप्रयोगे कर्तरि लङि क्रियापदे सन्धिः भवति तथा कर्मणि अपि भवति।**

**यथा** कर्तरि लङि – प्र + अहरत् = प्राहरत्

कर्मणि लङि – प्र + अह्रियत = प्राह्रियत

## सम्यक् पठत

1. प्रह्रियते – (कर्मणि वर्तमाने)

प्र + अह्रियत

(अ + अ = आ)

प्राह्रियत – (कर्मणि भूते)

2. निर्दिश्यते – (कर्मणि वर्तमाने)
निर् + अदिश्यत
(र् + अ)
निरदिश्यत – (कर्मणि भूते)

## अभ्यासः – 215

✍ **यथोदाहरणं पूरयत–**
[ उदाहरण के अनुसार पूरा करें। Complete as shown in the exmaple. ]

**उदा.** 1. संह्रियते
i. **सम् + अह्रियत**
ii. **म् + अ = म**
iii. **समह्रियत**

2. परिह्रियते
i.
ii.
iii.

3. विदार्यते
i.
ii.
iii.

4. निर्ह्रियते
i.
ii.
iii.

5. विह्रियते
i.
ii.
iii.

6. उदाह्रियते
i.
ii.
iii.

7. विक्रीयते
i.
ii.
iii.

8. उपक्रियते
i.
ii.
iii.

9. अनुक्रियते
i.
ii.
iii.

10. प्रक्रियते
i.
ii.
iii.

11. निराक्रियते
i.
ii.
iii.

12. संस्क्रियते
i.
ii.
iii.

13. उपक्रियते
i.
ii.
iii.

14. व्यवस्थाप्यते
i.
ii.
iii.

15. पराक्रियते
i.
ii.
iii.

## अभ्यासः — 216

✍ **अधोनिर्दिष्टानि वर्तमानरूपाणि भूतकाले लिखत—**
[ निम्नलिखित् वर्तमान रूपों को भूतकाल में लिखें। Write the past forms of the following present forms.]

**उदा. निराक्रियते** **निराक्रियत**

1. अपाक्रियते
2. संस्क्रियते
3. विक्रियते
4. प्रकृष्यते
5. प्रणम्यते
6. उपस्थाप्यते
7. सञ्चर्यते
8. प्रकम्प्यते
9. परिक्रियते
10. उदाह्रियते

## अभ्यासः — 217

✍ **अधोनिर्दिष्टानां कर्तरि वर्तमानकालिकवाक्यानि कर्तरि कर्मणि च भूतकाले परिवर्तयत—**

[ अधोलिखित कर्तृवाच्य के वर्तमानकालिक वाक्यों को कर्तृवाच्य एवं कर्मवाच्य के भूतकाल में परिवर्तित करें। Convert the following sentences into the sentences of past tense both in active as well as passive voice. ]

| | | | |
|---|---|---|---|
| उदा. | **बालः चित्रं प्रदर्शयति।** | **बालः चित्रं प्रादर्शयत्** । | [ **कर्तरि भूते** ] |
| | | **बालेन चित्रं प्रादर्श्यत** । | [ **कर्मणि भूते** ] |
| 1. | कृषिकः क्षेत्रं प्रकर्षति। | । | [ ] |
| | | । | [ ] |
| 2. | भक्तः देवं प्रणमति। | । | [ ] |
| | | । | [ ] |
| 3. | नृपः राज्यं प्रददाति। | । | [ ] |
| | | । | [ ] |
| 4. | चालकः यानं सञ्चालयति। | । | [ ] |
| | | । | [ ] |
| 5. | नायकः खलनायकं पराकरोति। | । | [ ] |
| | | । | [ ] |
| 6. | शिक्षकः कृष्णफलकं सम्मार्जयति। | । | [ ] |
| | | । | [ ] |
| 7. | वैयाकरणः स्वमतम् उपस्थापयति। | । | [ ] |
| | | । | [ ] |
| 8. | माता दीपं प्रज्वलयति। | । | [ ] |
| | | । | [ ] |
| 9. | रामः रावणं संहरति। | । | [ ] |
| | | । | [ ] |
| 10. | रमेशः दरिद्रम् उपकरोति। | । | [ ] |
| | | । | [ ] |

**भूते क्तः**

📖 **अधोनिर्दिष्टानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

बालेन पाठः अपठ्यत / पठितः।

लेखकेन लेखः अलिख्यत / लिखितः।

शिक्षकेण छात्रः अपाठ्यत / पाठितः।

कृषिकेण कार्यम् अक्रियत / कृतम्।

वानरेण फलम् अखाद्यत / खादितम्।

अध्यापकेन विषयः अबोध्यत / बोधितः।

व्यवस्थापकेन व्यवस्था अकल्प्यत / कल्पिता।

निदेशकेन अवसरः अदीयत / दत्तः।

गिरीशेन जलम् अपीयत / पीतम्।

मालया शाटिका अध्रियत / धृता।

☞ उपरितनवाक्येषु 'अपठ्यत' इत्यादि-स्थानेषु 'पठितः' इत्यादि-रूपं प्रयुक्तम्। 'पठितः' इत्यत्र 'क्त'-प्रत्ययः। 'क्त'-प्रत्ययान्तं रूपं त्रिषु लिङ्गेषु भवति–

| यथा | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | पठितः | पठितौ | पठिताः (पुं.) |
| | पठिता | पठिते | पठिताः (स्त्री.) |
| | पठितम् | पठिते | पठितानि (नपुं.) |

अत्र कर्मणः अनुसारम् लिङ्गवचनादयः भवन्ति इति सम्यक् स्मरत।

## अभ्यासः — 218

✍ **'क्त'-प्रत्ययान्तरूपैः रिक्तस्थानानि पूरयत–**

[ क्त-प्रत्ययान्त रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the forms ending in *kta*-suffix. ]

| | | | |
|---|---|---|---|
| उदा. | 1. जनैः पूजा | ..........**कृता**.......... | (कृ) |
| 2. | शिक्षकेण पाठः | | (पाठ्) |
| 3. | कविना कविता | | (लिख्) |
| 4. | बालकेन चित्रं | | (दृश्) |
| 5. | छात्रेण आसन्दः | | (नी) |
| 6. | शिष्येण दक्षिणा | | (दा) |
| 7. | मया समाचारः | | (श्रु) |
| 8. | चोरेण वस्तूनि | | (चुर्) |
| 9. | अध्यापिकया उत्तरं | | (ज्ञा) |
| 10. | गायकेन गीतं | | (गा) |
| 11. | बालिकया श्लोकः | | (स्मृ) |
| 12. | निरीक्षकेण प्रश्नाः | | (पृच्छ) |
| 13. | गोविन्देन माधवः | | (प्रेष्) |
| 14. | अनया कथा | | (रच्) |
| 15. | उपाध्यायेन वेदाः | | (बुध्) |
| 16. | मात्रा पुत्रः | | (तर्ज्) |
| 17. | देवेन दुर्जनः | | (दण्ड्) |
| 18. | मार्जारेण क्षीरं | | (पा) |
| 19. | महोदयेन प्रबन्धः | | (वच्) |
| 20. | देवदत्तेन ग्रामः | | (गम्) |

## अभ्यासः — 219

'क्त'-प्रत्ययान्त वाक्यानि लिखत—

[ क्त-प्रत्ययान्त वाक्य लिखें। Write the sentences having *kta*-suffix. ]

| क्तवतु | क्त |
|---|---|
| उदा. बालः वाक्यम् उक्तवान्। | बालेन वाक्यम् उक्तम्। |
| 1. पुरुषः कार्यं कृतवान्। | ............। |
| 2. शिक्षकः पाठं पाठितवान्। | । |
| 3. कविः कवितां लिखितवान्। | । |
| 4. गोविन्दः ग्रामं गतवान्। | । |
| 5. अहं चित्रं दृष्टवान्। | । |
| 6. उपाध्यायः चायं पीतवान्। | । |
| 7. महिला शाटिकां धृतवती। | । |
| 8. यान्त्रिकः यन्त्रं निर्मितवान्। | । |
| 9. चालकः यानं चालितवान्। | । |
| 10. राजीवः मिष्टान्नं खादितवान्। | । |
| 11. रामः रावणं हतवान्। | । |
| 12. रावणः सीताम् अपहृतवान्। | । |
| 13. अहं जर्मनभाषां विस्मृतवान्। | । |
| 14. अलसः उपायान् चिन्तितवान्। | । |
| 15. दरिद्रः धनं प्राप्तवान्। | । |
| 16. देवः भक्तान् रक्षितवान्। | । |
| 17. धीवरः जालं प्रसारितवान्। | ............। |
| 18. भक्तः देवम् अर्चितवान्। | । |
| 19. जननी पुत्रम् आहूतवती। | । |
| 20. एषः व्यसनं त्यक्तवान्। | । |

**कर्मणि/भावे भूते लङ्**

## 1857 खीष्टाब्दस्य स्वातन्त्र्यसङ्ग्रामः

अस्माकं राष्ट्रम् इदानीं स्वतन्त्रम् अस्ति। किं वयम् अनुभवामः अस्माकं पूर्वजैः एतत् स्वातन्त्र्यं कथम् **अलभ्यत**। स्वातन्त्र्याय अस्माकं पूर्वजैः किं किं न **अक्रियत**। सर्वे जानन्ति यद् वैदेशिकैः यद्यपि अस्माकं राष्ट्रं प्रथमतः वाणिज्यकारणात् **आगम्यत**। किञ्च क्रमेण तैः अत्रत्यं शासनम् अपि अधिकर्तुं **प्रायत्यत**। यदा प्रभृति आङ्गलजनैः अत्रत्यं शासनं स्वहस्ते **अगृह्यत** तदा प्रभृति एव भारतीयानाम् आङ्गलजनानां च क्रमेण



प्रतिरोधः **आरभ्यत**। किञ्च आरम्भे क्वचित् जनैः एषः प्रतिरोधः लघुरूपेण एव **समारभ्यत**। भारते 1857 तमे खीष्टवर्षे (खीष्टाब्दे) भारतीयैः आङ्गलजनान् प्रति कश्चन विशिष्टः विद्रोहः **अक्रियत**। एषः विद्रोहः 1857 तमे वर्षे मई-मासस्य दशमे दिनाङ्के मेरठनगरे सैनिकैः **समारभ्यत**। विद्रोहस्य द्वितीये दिवसे मेरठतः सैनिकैः देहलीं प्रति **प्रास्थीयत**। देहलीं समागत्य देहलीस्थैः सैनिकैः अपि विद्रोहं प्रति साहय्यम् **आचर्यत**। देहल्यां सैनिकैः 'बहादुरशाह जफरः' भारतवर्षस्य सम्राट् **उदघोष्यत**। अनन्तरम् एषः विद्रोहः सम्पूर्णं भारतं **व्याप्नोत्**। सम्पूर्णे भारते आङ्गलशासनस्य विरोधः **समारभ्यत**। अनेन विद्रोहेण विविधधर्मावलम्बिषु भारतीयसैनिकेषु परस्परम् ऐक्यं समवर्धत। यद्यपि एषः विद्रोहः आंग्लशासनेन क्रूरतया **अदम्यत** तथापि अनेन विद्रोहेण भारतस्य आंग्लशासनं प्रति प्रथमस्वतन्त्रसङ्ग्रामरूपेण दूरगामी प्रभावः **समुदपाद्यत**।

◆◆◆

## अभ्यासः – 220

**1. पाठाधारेण रिक्तस्थानानि पूरयत–**

[ पाठ के आधार पर रिक्त स्थान की पूर्ति करें। Fill in the blanks on the basis of the present lesson. ]

(i) आंग्लजनानां प्रतिरोधः ।

(ii) भारतीयैः विद्रोहः ।

(iii) सैनिकैः एषः विद्रोहः ।

(iv) दूरगामी प्रभावः ।

**2. अधोलिखितानां कर्मणि प्रयोगाणां कर्तरि रूपाणि लिखत–**

[ अधोलिखित कर्मवाच्य प्रयोगों के कर्तृवाच्य रूप लिखें। Write the active forms of the following passive usages. ]

उदा. (i) अलभ्यत ......**अलभत**...... । (ii) आगम्यत ।

(iii) अक्रियत । (iv) आचर्यत ।

(v) आरभ्यत । (vi) अयाच्यत ।

**3. अधोलिखितानि वाक्यानि कर्मणि भूते परिवर्तयत–**

[ अधोलिखित वाक्यों को कर्मवाच्य के भूतकाल में परिवर्तित करें। Change the following sentences into passive forms of *lan-lakāra.* ]

**कर्मणि भूते**

(i) शिशुः चन्द्रम् अपश्यत् ।

(ii) राजा प्रजाः अपालयत् ।

(iii) मन्त्री सन्देशम् अभाषत ।

(iv) गौरी शिवम् असेवत ।

(v) अहं नगरम् अगच्छम् ।

## कर्मणि लोट्

### (क) अधोनिर्दिष्टानि वाक्यानि पठत–

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

बालेन पाठः पठ्यताम्।

बालिकया पद्यं लिख्यताम्।

प्रेक्षकैः नाटकं दृश्यताम्।

सर्वैः भोजनं क्रियताम्।

छात्रेण लेखनी आनीयताम्।

शिशुना क्षीरं पीयताम्।

भक्तैः देवः नम्यताम्।

रसिकैः गानं श्रूयताम्।

अश्वाभ्यां रथः उह्यताम्।

गृहिण्या अन्नं पच्यताम्।

☞ **एतानि वाक्यानि कर्मणि लोट्-लकारे प्रयुक्तानि सन्ति। अत्रापि कर्तृपदं तृतीयाविभक्तौ भवति कर्मपदं च प्रथमा विभक्तौ। क्रियापदं कर्मपदस्य वचनम् अनुसरति।**

☞ **आत्मनेपदिनः लोट्-लकारस्य रूपं स्मृत्वा वयं कर्मणि लोट्-लकारे परिवर्तनं कर्तुं समर्थाः भवामः। यथा–**

| **आत्मनेपदिनः लोटि** | **कर्मणि लोटि** |
|---|---|
| सेवताम् | पठ् + य + ताम् = पठ्यताम् |
| लभताम् | लिख् + य + ताम् = लिख्यताम् |

## अभ्यासः — 221

✍ **अधोलिखितानां क्रियापदानां कर्मणि लोट्-लकारे रूपाणि लिखत–**

[ अधोलिखित क्रियापदों का कर्मवाच्य में लोट्-लकार का रूप लिखें। Write the imperative forms of the following in passive voice. ]

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| उदा. | **ज्ञायते** | = | **ज्ञा** | + | **य** | + | **ताम्** | = **ज्ञायताम्** |
| 1. | नीयते | = | | + | | + | | = |
| 2. | दीयते | = | | + | | + | | = |
| 3. | श्रूयते | = | | + | | + | | = |
| 6. | उह्यते | = | | + | | + | | = |
| 7. | गम्यते | = | | + | | + | | = |
| 8. | तीर्यते | = | | + | | + | | = |
| 9. | क्रियते | = | | + | | + | | = |
| 10. | खाद्यते | = | | + | | + | | = |
| 11. | ह्रियते | = | | + | | + | | = |
| 12. | कृष्यते | = | | + | | + | | = |
| 13. | स्मर्यते | = | | + | | + | | = |
| 14. | पूज्यते | = | | + | | + | | = |
| 15. | पाल्यते | = | | + | | + | | = |
| 16. | प्राप्यते | = | | + | | + | | = |
| 17. | प्रणम्यते | = | | + | | + | | = |
| 18. | गीयते | = | | + | | + | | = |
| 19. | त्यज्यते | = | | + | | + | | = |
| 20. | गृह्यते | = | | + | | + | | = |

## अभ्यासः — 222

✍ **अधोलिखितानां क्रियापदानां कर्मणि लटि लोटि च रूपाणि लिखत–**

[ अधोलिखित क्रियापदों का कर्मवाच्य में लट्-लकार एवं लोट्-लकार रूप लिखें। Write the paradigm of the following verbal forms in *laṭ* and *loṭ-lakāra* in passive voice. ]

| | | | कर्मणि वर्तमाने लटि | | कर्मणि प्रार्थनादौ लोटि |
|---|---|---|---|---|---|
| उदा. | पठति | → | पठ्यते | → | पठ्यताम् |
| 1. | जानाति | → | | → | |
| 2. | निन्दति | → | | → | |
| 3. | नृत्यति | → | | → | |
| 4. | गायति | → | | → | |
| 5. | पिबति | → | | → | |
| 6. | रक्षति | → | | → | |
| 7. | तरति | → | | → | |
| 8. | नयति | → | | → | |
| 9. | उपविशति | → | | → | |
| 10. | परिहरति | → | | → | |
| 11. | नश्यति | → | | → | |
| 12. | गृह्णाति | → | | → | |
| 13. | शृणोति | → | | → | |
| 14. | ददाति | → | | → | |
| 15. | आगच्छति | → | | → | |
| 16. | निराकरोति | → | | → | |
| 17. | पश्यति | → | | → | |
| 18. | उपदिशति | → | | → | |
| 19. | वदति | → | | → | |
| 20. | स्मरति | → | | → | |

**एतानि क्रियापद-रूपाणि स्मरत—**

[ इन क्रियापद रूपों का स्मरण करें। Remember these verbal forms. ]

### कर्मणि लोटि (प्रथमपुरुषे)

| धातु | एक. | द्वि. | बहु. |
|---|---|---|---|
| पठ् | पठ्यताम् | पठ्येताम् | पठ्यन्ताम् |
| वद् | उच्यताम् | उच्येताम् | उच्यन्ताम् |
| लिख् | लिख्यताम् | लिख्येताम् | लिख्यन्ताम् |
| स्मृ | स्मर्यताम् | स्मर्येताम् | स्मर्यन्ताम् |
| रक्ष् | रक्ष्यताम् | रक्ष्येताम् | रक्ष्यन्ताम् |

## अभ्यासः — 223

**अधोनिर्दिष्टानां क्रियापदानां द्विवचने बहुवचने च रूपं लिखत—**

[ अधोनिर्दिष्ट क्रियापदों का द्विवचन एवं बहुवचन रूप लिखें। Write the dual and plural forms of the following verbal words. ]

| | | | | | |
|---|---|---|---|---|---|
| उदा. | स्थाप्यताम् | → | स्थाप्येताम् | → | स्थाप्यन्ताम् |
| 1. | श्रूयताम् | → | | → | |
| 2. | दृश्यताम् | → | | → | |
| 3. | हस्यताम् | → | | → | |
| 4. | खाद्यताम् | → | | → | |
| 5. | क्रियताम् | → | | → | |
| 6. | त्यज्यताम् | → | | → | |
| 7. | वन्द्यताम् | → | | → | |
| 8. | सेव्यताम् | → | | → | |
| 9. | भज्यताम् | → | | → | |
| 10. | पीयताम् | → | | → | |

## अभ्यासः – 224

✍ **रामेण किं क्रियताम्–**

[ राम के द्वारा क्या किया जाय। What is to be done by *Rāma.* ]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| उदा. | चित्रम् | – | दृश् | → | **रामेण** | **चित्रं** | **दृश्यताम्** । |
| 1. | क्षीरं | – | पा (पीय) | → | **रामेण** | | । |
| 2. | अन्नं | – | खाद् | → | **रामेण** | | । |
| 3. | गृहं | – | गम् | → | **रामेण** | | । |
| 4. | भारः | – | वह् (उह्य) | → | **रामेण** | | । |
| 5. | उपदेशः | – | दा (दीय) | → | **रामेण** | | । |

## अभ्यासः – 225

✍ **छात्रैः के द्वे क्रियेताम्–**

[ छात्रों के द्वारा कौन से दो कार्य किये जाएँ। Which two actions to be performed by the students. ]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| उदा. | पाठः | – | पठ | → | **छात्रैः** | **पाठौ** | **पठ्येताम्** । |
| 1. | पद्यं | – | गै | → | **छात्रैः** | | । |
| 2. | लेखनी | – | आ + नी | → | **छात्रैः** | | । |
| 3. | पुस्तकं | – | क्री | → | **छात्रैः** | | । |
| 4. | स्यूतः | – | ग्रह् (गृह्य) | → | **छात्रैः** | | । |
| 5. | पिता | – | आ + हू | → | **छात्रैः** | | । |

## अभ्यासः – 226

✍ **बालकेन कानि कार्याणि क्रियन्ताम्—**

[ बालक के द्वारा कौन से कार्य किए जाएँ। What actions to be performed by the boy. ]

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा. | मोदकं | – | खाद् | → | **बालकेन** ...... **मोदकानि** ...... **खाद्यन्ताम्** | । |
| 1. | चित्रं | – | दृश् | → | **बालकेन** ...... | । |
| 2. | शब्दः | – | श्रु | → | **बालकेन** ...... | । |
| 3. | माता | – | वन्द् | → | **बालकेन** ...... | । |
| 4. | नदी | – | तृ (तीर्यते) | → | **बालकेन** ...... | । |
| 5. | उत्तरं | – | स्मृ (स्मर्यते) | → | **बालकेन** ...... | । |

## अभ्यासः – 227

✍ **अधोनिर्दिष्टानि वाक्यानि उचित-क्रियापदैः पूरयत—**

[ उचित क्रियापदों से अधोनिर्दिष्ट वाक्यों को पूरा करें। Complete the following sentences with the appropriate verbal forms. ]

| | | | |
|---|---|---|---|
| उदा. | गोविन्देन कन्दुकः | ...... **क्षिप्यताम्** ...... | (क्षिप्) |
| 1. | रजकैः वस्त्राणि | | (क्षाल्) |
| 2. | कुलालेन घटः | | (कृ-क्रिय) |
| 3. | राज्ञा प्रजाः | | (पाल्) |
| 4. | साहसिभिः पर्वतः | | (आ+रुह्) |
| 5. | बलीवर्दाभ्यां शकटः | | (वह्-उह्य) |
| 6. | लोकेन वार्ता | | (ज्ञा) |
| 7. | सर्वैः जयशब्दः | | (घुष्) |
| 8. | शालिनीनलिनीभ्यां कविते | | (विरच्) |
| 9. | भक्तैः भगवद्गुणाः | | (कीर्त्) |
| 10. | कृषकैः भूमिः | | (कृष्) |

## अभ्यासः — 228

✍ **वाच्यपरिवर्तनं कुरुत—**


[ वाच्य परिवर्तन करें। Change the voice. ]

| | कर्तरि प्रयोगः | | कर्मणि प्रयोगः | | |
|---|---|---|---|---|---|
| **उदा.** | **बालकः शब्दं पठतु।** | → | **बालकेन** | **शब्दः** | **पठ्यताम्** |
| 1. | सेविका गृहकार्याणि करोतु। | → | | | |
| 2. | अशक्तः सौलभ्यं प्राप्नोतु। | → | | | |
| 3. | आरक्षिणः चोरान् निगृह्णन्तु। | → | | | |
| 4. | सैनिकाः राष्ट्रं रक्षन्तु। | → | | | |
| 5. | बालिकाः गीतं गायन्तु। | → | | | |
| 6. | पितरः कुपुत्रान् दण्डयन्तु। | → | | | |
| 7. | अर्चकः पूजां करोतु। | → | | | |
| 8. | अग्रजः अनुजान् नयतु। | → | | | |
| 9. | माता शाकान् क्रीणातु। | → | | | |
| 10. | सिंहः मृगान् खादतु। | → | | | |
| 11. | धेनुः क्षीरं ददातु। | → | | | |
| 12. | ते जलं पिबन्तु। | → | | | |
| 13. | सा मुखं प्रक्षालयतु। | → | | | |
| 14. | मुकुन्दः स्वमित्रम् आह्वयतु। | → | | | |
| 15. | कपिः वृक्षम् आरोहतु। | → | | | |
| 16. | गुरवः विद्यालयं गच्छन्तु। | → | | | |
| 17. | गावः तृणानि चरन्तु। | → | | | |
| 18. | साधवः सदुपदेशं कुर्वन्तु। | → | | | |
| 19. | जनाः चित्राणि पश्यन्तु। | → | | | |
| 20. | सर्वे पापकर्माणि त्यजन्तु। | → | | | |

**कर्मणि/भावे लोट्**

## विद्यालयस्य वार्षिकोत्सवः

[ कक्षायाः दृश्यम् । अध्यापकः कक्षायां प्रविशति । सर्वे छात्राः उत्थाय अभिवादनं कुर्वन्ति । ]



**छात्राः** — गुरुदेव ! भवद्भिः अस्माकं प्रणामाः **स्वीक्रियन्ताम्** ।

**अध्यापकः** — सुखिभिः **भूयताम्** । **उपविश्यताम्** । आगामिनि मासे अस्माकं विद्यालयस्य वार्षिकोत्सवः भविता । स्मर्यते न वा ?

**छात्राः** — आम् गुरुदेव !

**अध्यापकः** — तर्हि तदर्थम् अस्माकं कक्षायाः कृते कः कार्यक्रमः निर्धारितः अस्ति ?

**छात्राः** — अस्माभिः एकं नाटकम् अभिनेतव्यम् अस्ति ।

**अध्यापकः** — तर्हि भवद्भिः रामकथापरकम् एकं नाटकम् **अभिनीयताम्** ।

**केशवः** — किं रामकथापरकं प्राचीननाटकम् अभिनेतव्यम् अथवा आधुनिकम् ?

**अध्यापकः** — प्राचीन-नाटकमेवास्तु । भवभूतेः उत्तररामचरितं तु प्रायः सर्वत्र अभिनीयते । अतः भवद्भिः तस्य एव महाकवेः महावीरचरितस्य अभिनयः **क्रियताम्** ।

**रमेशः** — तर्हि गुरुदेव ! एतद्विषये भवद्भिः अस्माकं मार्गदर्शनं **क्रियताम्**— कः कस्यां भूमिकायाम् अवतरेत् इति ।

**अध्यापकः** — अस्तु तर्हि ललितेन रामस्य अभिनयः **क्रियताम्** । रमया च सीतायाः भूमिका **अभिनीयताम्** ।

**ललितः** — नहि गुरुदेव ! अहं तु हनुमतः भूमिकायाम् अवतर्तुम् इच्छामि। रमेशेन च रामस्य अभिनयः **क्रियताम्**।

**अध्यापकः** — तत्तु सत्यम्। परन्तु शारीरिक-संरचनादृष्ट्या रमेशः राम-भूमिकायै योग्यः न प्रतीयते। भवता तत् पात्रम् **अभिनीयताम्**। केशवेन हनुमतः भूमिका **अभिनीयताम्**।

**केशवः** — तर्हि रमेशस्य का भूमिका भविष्यति।

**अध्यापकः** — तस्य कृतेऽपि उत्तमा भूमिका अस्ति। तेन परशुरामस्य चरितं **नाट्यताम्**।

**ललितः** — तर्हि रमेशं पृच्छामः, यदि सः तस्यां भूमिकायाम् अभिनेतुं सहमतः अस्ति।

**अध्यापकः** — वदतु रमेश ! त्वया अस्मिन् प्रसङ्गे सहमतिः **दीयताम्**।

**रमेशः** — यथा गुरुदेवः आदिशति तथैव अङ्गीकरोमि। परन्तु गुरुदेव ! अन्याः व्यवस्थाः कः द्रक्ष्यति ?

**अध्यापकः** — त्वया सुकान्तेन च सर्वाः व्यवस्थाः **दृश्यन्ताम्**। सुकान्तस्य नाटके भूमिका नास्ति, अतः तेन सर्वाः व्यवस्थाः **दृश्यन्ताम्**। भवता तु केवलं पुनरीक्षणं **क्रियताम्** !

**ललितः** — लक्ष्मणस्य चरितं कः नाटयिष्यति ?

**अध्यापकः** — धर्मेन्द्रेण लक्ष्मणस्य चरितम् **अभिनीयताम्**। नाटकार्थं यानि वस्तूनि अपेक्षितानि तानि कलाशालातः राजीवेन **आनीयन्ताम्**।

**ललितः** — तर्हि प्रकाशः ?

**अध्यापकः** — प्रकाशेन रङ्गव्यवस्था **क्रियताम्**। कृष्णकान्तेन च रङ्गे विद्युद्दीपस्य व्यवस्था **क्रियताम्**।

**रमेशः** — पात्रपरिचयं, स्वागतभाषणं च कः करिष्यति ?

**अध्यापकः** — आगतानाम् अतिथीनां स्वागतं भवता एव **व्याह्रियताम्**। भवतः शैली, कण्ठश्च तदर्थम् अनुकूलः वर्तते। अजयेन पात्रपरिचयः **प्रस्तूयताम्** यतो हि सः व्यवहारकुशलः अस्ति।

**सुकान्तः** — गुरुदेव ! व्यवस्थायै महान् समयः अपेक्ष्यते। तदर्थम् अस्माकम् अवकाशः कुत्र ?

**अध्यापकः** — चिन्ता नास्ति। तदर्थं "प्राचार्यैः छात्रेभ्यः अवकाशाः **दीयन्ताम्**' इति अहं निवेदयामि। तस्य आदेशेन सर्वं सुकरं भविष्यति। रत्नमोहन ! वेङ्कटेश ! युवाभ्याम् इदानीं कार्यालयः **गम्यताम्**। कार्यालयीय-व्यवस्थायै मुख्यलिपिकः **उच्यताम्**। अस्तु तर्हि अद्य अध्ययनविरामः। श्वः पुनः सर्वैः समयेन विद्यालयः **आगम्यताम्**। तावत् शुभं भूयात्।

**छात्राः** — अस्माकं प्रणामाः **स्वीक्रियन्ताम्** गुरुदेव !

◆◆◆

## अभ्यासः – 229

1. **पाठाधारेण रिक्तस्थानानि पूरयत–**

[ पाठ के आधार पर रिक्तस्थान की पूर्ति करें। Fill in the blanks on the basis of the present lesson. ]

(i) भवद्भिः अस्माकं मार्गदर्शनं ............ ।
(ii) रमया सीताया भूमिका ............ ।
(iii) तेन परशुरामस्य चरितं ............ ।
(iv) स्वागतं भवता एव ............ ।
(v) सर्वैः समयेन विद्यालयः ............ ।

2. **अधोलिखितानां क्रियापदानां कर्तरि रूपाणि लिखत–**

[ अधोलिखित क्रियापदों के कर्तृवाच्य में रूप लिखें। Write the active forms of the following.]

उदा. (i) क्रियताम् **करोतु** ............ । (ii) कथ्यताम् ............ ।
(iii) भूयताम् ............ । (iv) उच्यताम् ............ ।
(v) दीयताम् ............ । (vi) गम्यताम् ............ ।
(vii) आनीयताम् ............ । (viii) दृश्यताम् ............ ।

3. **अधोलिखितानि वाक्यानि कर्मणि परिवर्तयत–**

[ अधोलिखित वाक्यों को कर्मवाच्य में परिवर्तन करें। Change the following sentences into passive voice. ]

| | कर्तरि | कर्मणि |
|---|---|---|
| (i) | विद्यार्थी पाठं पठतु | **विद्यार्थिना पाठः पाठ्यताम्** । |
| (ii) | गुरुः शिष्यान् आदिशतु | ............ । |
| (iii) | माता ओदनं ददातु | ............ । |
| (iv) | सर्वे विद्यालयं गच्छन्तु | ............ । |
| (v) | वधूः मातरं सेवताम् | ............ । |

सुभाषितेषु कर्मणि प्रयोगाः

# सुभाषितानि

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते॥

गुरौ न प्राप्यते यत्तन्नान्यत्रापि हि लभ्यते।
गुरुप्रसादात् सर्वं तु प्राप्नोत्येव न संशयः॥

कुलं वृत्तं श्रुतं शौर्यं सर्वमेतन्न गण्यते।
दुर्वृत्ते वा सुवृत्ते वा जनो दातरि रज्यते॥

पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते।
वन्द्यते यदवन्द्योऽपि स प्रभावो धनस्य च॥

दृष्ट्वापि दृश्यते दृश्यं श्रुत्वापि श्रूयते पुनः।
सत्यं न साधुवृत्तस्य दृश्यते पुनरुक्तता॥

शरणं किं प्रपन्नानि विषवन्मारयन्ति किम्।
न त्यज्यन्ते न भुज्यन्ते कृपणेन धनानि यत्॥

नालोकः क्रियते सूर्ये भूः प्रतीपं न धार्यते
न हि प्रत्युपकाराणामपेक्षा सत्सु विद्यते॥

विषं विषेण व्यथते वज्रं वज्रेण भिद्यते।
गजेन्द्रो दृष्टसारेण गजेन्द्रेणैव बध्यते॥

अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम्।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम्॥

बालस्तावत्क्रीडासक्तः तरुणस्तावत्तरुणीरक्तः।
वृद्धस्तावच्चिन्तामग्नः परमे ब्रह्मणि कोऽपि न लग्नः॥

वयसि गते कः कामविकारः शुष्के नीरे कः कासारः।
नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः॥

भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता।
सकृदपि यस्य मुरारिसमर्चा तस्य यमेन न क्रियते चर्चा॥

आरोप्यते शिला शैले यत्नेन महता यथा।
निपात्यते क्षणेनाधस्तथात्मा गुणदोषयोः॥

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात्फलं नास्ति छाया केन निवार्यते॥

◆◆◆

**कथायां कर्मणि/भावे प्रयोगाः**
**(लट् / लोट् / लङ्)**

## लोभः परमः शत्रुः

कस्मिंश्चिद् ग्रामे हरिदत्तनामा दरिद्रः ब्राह्मणः निवसति स्म। तेन भिक्षावृत्त्या जीविका उपार्ज्यते स्म। यदा तया वृत्त्या तस्य परिवारस्य भरणपोषणं सम्यक् न समभवत् तदा तेन कृषिकार्यम् अक्रियत। कठिनं श्रमं कुर्वता अपि तेन कृषिकर्मणि साफल्यं न अलभ्यत। दुर्दैवात् तस्य पक्वं शस्यमपि विनष्टम्। एकदा चिन्तितः सः स्वक्षेत्रे कस्यचिद् वृक्षस्य अधः शयानः आसीत्। तदा तेन कश्चन विषधरः सर्पः अदृश्यत। प्रथमं सः सर्पात् भीतः अभवत्। अनन्तरं तेन चिन्तितं यत् "अनेन सर्पेण मदीयं कृषिक्षेत्रं रक्ष्यते। इदानीं यावत् मया एतस्य सम्मानः न विहितः। मन्ये एतदर्थं शस्यं विनष्टं भवति। इतः परं मया एतस्य पूजार्चने विधातव्ये" इति सः निर्णीतवान्।



ततः ग्रामं गत्वा तेन ब्राह्मणेन दुग्धपूर्णः चषकः आनीयत। दुग्धचषकं सर्पस्य समक्षं स्थापयित्वा तेन सर्पः प्रार्थ्यत– "भो ! नागराज ! भवतः उपस्थितिविषये मया न ज्ञातम्। अत एव अज्ञानेन मया भवतः उपेक्षा आचरिता। इदानीं भवतः दर्शनं प्राप्य मया स्वजीवनं धन्यं मन्यते। भवता मदीया प्रार्थनाः श्रूयन्ताम्। भवता कृपया दुग्धं स्वीक्रियताम्। भवता मयि अनुग्रहः क्रियताम्। एवं निवेदयता ब्राह्मणेन भूमौ दुग्धचषकः अस्थाप्यत। ततः तेन स्वगृहम् अगम्यत। परस्मिन् दिवसे क्षेत्रम् आगत्य ब्राह्मणेन दुग्धचषकः रिक्तः अदृश्यत। परन्तु तत्र दुग्धस्थाने एका स्वर्णमुद्रा अदृश्यत। ब्राह्मणेन सा स्वर्णमुद्रा सानन्दम् अगृह्यत।

ततः परं प्रतिदिनं ब्राह्मणेन सर्पाय दुग्धम् अर्प्यते स्म। सर्पेण च ब्राह्मणाय स्वर्णमुद्रा प्रत्यर्प्यते स्म। एतेन क्रमशः ब्राह्मणस्य दारिद्र्यम् अपगतम्। परन्तु तथापि तेन तयैव श्रद्धया सर्पः अपूज्यत।

एकदा ब्राह्मणेन ग्रामान्तरम् अगम्यत। गमनात् पूर्वं तेन सर्पपूजाविषये स्वपुत्रः बोधितः। परस्मिन् दिने ब्राह्मणपुत्रेण एव सर्पः समर्च्यत। सर्पेण अपि यथापूर्वं स्वर्णमुद्रा प्रत्यर्पिता। दिनद्वयात् परं ब्राह्मणपुत्रेण चिन्तितम्– "अस्मिन् विले बह्व्यः स्वर्णमुद्राः स्युः। तेभ्यः एकैका आनीय सर्पेण अस्मभ्यं दीयते। अतः अवश्यमेव सर्पं हत्वा एकस्मिन्नेव दिने सर्वाः स्वर्णमुद्राः ग्रहीतव्याः।"

परेद्युः ब्राह्मणपुत्रेण बिलस्य समीपे दुग्धचषकः अस्थाप्यत। दुग्धं दृष्ट्वा यदा सर्पेण बहिः आगम्यत तदा ब्राह्मणपुत्रेण तस्य शिरिसि प्रहारः अक्रियत। परन्तु तस्य दण्डः लक्ष्यभ्रष्टः जातः। फलतः क्रोधाविष्टेन सर्पेण ब्राह्मणपुत्रः अदश्यत। विषप्रभावेण सः पञ्चत्वं गतः।



ग्रामान्तरात् प्रतिनिवृत्य तेन ब्राह्मणेन सर्वः उदन्तः विज्ञातः। पुत्रेण स्वदुष्कृत्यस्य परिणामः भुक्तः इति विचिन्त्य ब्राह्मणेन कथञ्चिद् धैर्यम् अध्रियत। क्षेत्रं प्राप्य तेन पुनः सर्पः अपूज्यत। परन्तु महता विलम्बेन बिलात् निःसृत्य सर्पेण ब्राह्मणः एवं प्रत्यबोध्यत- ब्राह्मणदेव ! पूर्वम् अहं तव भक्त्या प्रसन्नः आसम्। परन्तु इदानीं लोभग्रस्तेन त्वया मम पूजा न क्रियताम्। इदानीं त्वया यथा पुत्रशोकः न विस्मरिष्यते तथैव मया अपि दण्डप्रहारः न विस्मरिष्यते। अत एव भविष्यत्काले त्वया अत्र न आगम्यताम्। अनन्तरं सर्पेण ब्राह्मणाय कश्चन हीरकखण्डः अदीयत, ब्राह्मणेन सः हीरकखण्डः स्व्यक्रियत। किन्तु परस्मिन् मुहूर्ते तस्य हृदयं शोकाकुलं जातम्। "लोभः मनुष्यस्य परमः शत्रुः" इति तेन एषा महती शिक्षा अगृह्यत।

◆◆◆

# पञ्चमः स्तबकः

## 5.1 प्रथमः पाठः

### [ विशेष्यविशेषणभावः ]

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]


**पुं.**



**नीलः** घटः।




**रक्तः** घटः।



**पीतः** घटः।

**स्त्री.**



**नीला** शाटिका।




**रक्ता** शाटिका।



**पीता** शाटिका।


**नपुं.**



**नीलं** पत्रम्।



**रक्तं** पत्रम्।



**पीतं** पत्रम्।

## विवरणम्

☞ उपरितनवाक्येषु 'नीलः घटः' इत्यत्र नीलः इति विशेषणपदं घटः इति च विशेष्यपदम् अस्ति। एवम् एव 'रक्तः घटः' इत्यत्र रक्तः इति विशेषणं 'घटः' इति च विशेष्यम् अस्ति। 'पीतः घटः' इत्यत्र 'पीतः' इति विशेषणं 'घटः' इति च विशेष्यम् अस्ति। तत्रैव अन्येषु वाक्येषु 'नीला, रक्ता, पीता' इति शाटिकायाः विशेषणम्। अपि च 'नीलम्, रक्तम्, पीतम्' इति पत्रस्य विशेषणं दर्शितम् अस्ति।

**स्मरत**

⇨ यत् वैशिष्ट्यं बोधयति तत् **विशेषणम्**।

⇨ यस्य वैशिष्ट्यं बोध्यते तत् **विशेष्यम्**।

## अभ्यासः — 230

✍ **अधोलिखितेषु वाक्येषु विशेषणस्य विशेष्यस्य च निर्धारणं कुरुत—**

[ अधोलिखित वाक्यों में विशेषण और विशेष्य का निर्धारण करें। Recognise the qualifier and qualificand in the following sentences. ]

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| 1. स्वच्छं गृहम्। | | |
| 2. दीर्घः बाहुः। | | |
| 3. रक्तं वस्त्रम्। | | |
| 4. लम्बः कर्णः। | | |
| 5. उन्नतं वक्षःस्थलम्। | | |
| 6. निपुणः अध्यापकः। | | |
| 7. पुरातनी पत्रिका। | | |
| 8. कोमलं पत्रम्। | | |
| 9. महान् श्रमः। | | |
| 10. बुद्धिमान् मन्त्री। | | |


## एतानि वाक्यानि पठत–

[ इन वाक्यों को पढ़ें। Read these sentences. ]

| पुं. | स्त्री. | नपुं. |
| --- | --- | --- |



**नीलः** मेघः।



**नीला** लेखनी।




**नीलं** कमलम्।



**हरितः** वृक्षः।




**हरिता** लता।



**हरितं** यानम्।



**कृष्णः** काकः।



**कृष्णा** गौः।



**कृष्णं** युतकम्।

☞ उपरितनेषु वाक्येषु 'नील, हरित, कृष्ण' इति विशेषणशब्दाः सन्ति। एकः एव नीलशब्दः त्रिषु लिङ्गेषु प्रयुक्तः अस्ति। तत्र विशेष्य-पदस्य लिङ्गानुसारं (क्रमशः) 'मेघः' इति पुंल्लिङ्गशब्देन सह 'नीलः', 'लेखनी' इति स्त्रीलिङ्गशब्देन सह 'नीला', तथा च 'कमलम्' इति नपुंसकलिङ्गशब्देन सह 'नीलम्' इति प्रयुक्तम् अस्ति। एवम् एव 'हरित, कृष्ण' इति शब्दः अपि विशेष्यस्य लिङ्गस्य अनुरूपः प्रयुक्तः अस्ति। अतः अवधेयम्–

⇨ प्रायेण विशेष्यपदस्य लिङ्गानुरूपं विशेषणपदस्य अपि लिङ्गं भवति।

## अभ्यासः – 231

✍ **विशेष्यानुगुणं विशेषणं लिखत–**

[ विशेष्य के अनुसार विशेषण लिखें। Write the qualifier as per the qualificand. ]

| | | | |
|---|---|---|---|
| 1. | वस्त्रम्, | घटः, | माला। (रक्त– रक्तः, रक्ता, रक्तम्) |
| 2. | पुस्तिका, | ग्रन्थः, | पत्रम्। (हरित– हरितः, हरितम्, हरिता) |
| 3. | छात्रा, | छात्रः, | वस्त्रम्। (उत्तम– उत्तमः, उत्तमम्, उत्तमा) |
| 4. | बालिका, | युवकः, | युवतिः। (कुशल– कुशलः, कुशला) |
| 5. | पुरुषः, | महिला। | (वृद्ध– वृद्धा, वृद्धः) |

📖 **अवधानेन पठत–**

[ ध्यान से पढ़ें। Read carefully. ]

| | | |
|---|---|---|
| कुशलः बालकः। | कुशलौ बालकौ। | कुशलाः बालकाः। |
| मधुरं फलम्। | मधुरे फले। | मधुराणि आम्राणि। |
| सुन्दरी नारी। | सुन्दर्यौ नार्यौ। | सुन्दर्यः नार्यः। |

☞ उपरितनेषु वाक्येषु विशेष्यस्य वचनानुरूपं विशेषणस्य वचनम् अपि दर्शितम् अस्ति। अतः अवधेयम्–

⇨ **प्रायेण विशेष्यपदस्य वचनानुरूपं विशेषणपदस्य वचनम् अपि भवति।**

## अभ्यासः – 232

✍ **विशेष्यानुगुणं विशेषणं लिखत–**

[ विशेष्य के अनुसार विशेषण लिखें। Write the qualifier as per the qualificand. ]

| | | |
|---|---|---|
| 1. | बालिके स्तः। | (सुन्दरी) |
| 2. | वस्त्राणि सन्ति। | (नूतन) |
| 3. | युवकौ स्तः। | (वीर) |
| 4. | शिष्याः सन्ति। | (बुद्धिमत्) |
| 5. | गुरवः आगच्छन्ति। | (पूज्य) |

## अवधानेन पठत–

[ ध्यान से पढ़ें। Read carefully. ]

नीलः घटः अस्ति।

नीलं घटम् आनय।

नीलेन घटेन जलं नय।

नीलाय घटाय कुम्भकारस्य गृहं गच्छामि।

नीलाद् घटात् जलम् उद्धर।

नीलस्य घटस्य आकारः विशालः।

नीले घटे शीतलं जलम् अस्ति।

उपरिलिखितेषु वाक्येषु घट-शब्दस्य सप्तसु विभक्तिषु प्रयोगः कृतः। घट-शब्देन सह तस्य विशेषणं नीलपदम् अपि प्रयुक्तम्। अत्र अवधेयम्–

- **यस्यां विभक्तौ विशेष्यपदं प्रयुक्तं तस्यामेव विभक्तौ विशेषणपदस्य प्रयोगः भवति।**
- **विशेष्यपदस्य विभक्त्यनुगुणं विशेषणपदे विभक्तिः अपि भवति।**

### अभ्यासः – 233

**विशेष्यपदस्य विभक्तिमनुसृत्य विशेषणपदेन सह तामेव विभक्तिं संयोज्य रिक्तस्थानं पूरयत–**

[ विशेष्यपद की विभक्ति के अनुसार विशेषण पद में विभक्ति जोड़कर रिक्तस्थान की पूर्ति करें। Fill in the blanks with the qualifier given in the bracket by adding the case-endings as per the qualificands. ]

1. छात्रस्य लक्षणं किम् ? (उत्तम)
2. उपकाराय कल्पते विद्याभ्यासः। (महत्)
3. गुरुवर्याणां कृपया सर्वं सम्पन्नम्। (दयालु)
4. पुरुषाणां स्वभावः अनुकरणीयः। (धीमत्)
5. वस्त्रस्य मूल्यं किम् ? (एतत्)

**अधोनिर्दिष्टानि वाक्यानि अवधानपूर्वकं पठत—**

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read the following sentences carefully. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| **नीलः मेघः** आकाशे सञ्चरति। | **नीलौ मेघौ** आकाशे सञ्चरतः। | **नीलाः मेघाः** आकाशे सञ्चरन्ति। |
| **चतुरः बालकः** विद्यालये पठति। | **चतुरौ बालकौ** विद्यालये पठतः। | **चतुराः बालकाः** विद्यालये पठन्ति। |
| **सुन्दरी बालिका** गीतं गायति। | **सुन्दर्यौ बालिके** गीतं गायतः। | **सुन्दर्यः बालिकाः** गीतं गायन्ति। |
| **कृष्णा धेनुः** प्रान्तरे चरति। | **कृष्णे धेनू** प्रान्तरे चरतः। | **कृष्णाः धेनवः** प्रान्तरे चरन्ति। |
| **नूतनं वस्त्रम्** अस्ति। | **नूतने वस्त्रे** स्तः। | **नूतनानि वस्त्राणि** सन्ति। |
| अहं **मधुरं फलं** खादामि। | आवां **मधुरे फले** खादावः। | वयं **मधुराणि फलानि** खादामः। |
| **उन्नतं मन्दिरं** शोभते। | **उन्नते मन्दिरे** शोभेते। | **उन्नतानि मन्दिराणि** शोभन्ते। |

**उपरितनवाक्येषु स्थूलाक्षरैः मुद्रिताः शब्दाः क्रमशः विशेषणानि विशेष्यानि च सन्ति। यानि वैशिष्ट्यं बोधयन्ति तानि 'विशेषणानि'। येषां वैशिष्ट्यम् उच्यते तानि 'विशेष्याणि' इति भवन्तः पूर्वं ज्ञातवन्तः।**

**अवधेयम्**

- विशेष्यस्य यत् लिङ्गं तदेव लिङ्गं विशेषणस्य अपि भवति।
- विशेष्यस्य यत् वचनं तदेव वचनं विशेषणस्य अपि भवति।
- विशेष्यस्य या विभक्तिः सा एव विभक्तिः विशेषणस्य अपि भवति।

**इमं नियमम् अधस्तन-श्लोकेन स्मरत—**

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।
तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्य॥ इति।

**लिङ्गं विभक्तिं च अनुसृत्य यः रूपभेदः भवति सः अधः प्रदर्श्यते। तम् अवधानपूर्वकं पठत—**

[ लिङ्ग विभक्ति के अनुसार जो रूप भेद हैं वे नीचे दिखाये गए हैं। इन्हें ध्यान से पढ़ें। The variation in the forms due to gender and case-ending, are shown below. Read them carefully. ]

| | पुं. | | स्त्री. | | नपुं. | |
|---|---|---|---|---|---|---|
| प्र. → | चतुरः | बालकः | चतुरा | बालिका | चतुरम् | मित्रम् |
| द्विती. → | चतुरम् | बालकम् | चतुराम् | बालिकाम् | चतुरम् | मित्रम् |
| तृ. → | चतुरेण | बालकेन | चतुरया | बालिकया | चतुरेण | मित्रेण |
| च. → | चतुराय | बालकाय | चतुरायै | बालिकायै | चतुराय | मित्राय |
| पं. → | चतुरात् | बालकात् | चतुरायाः | बालिकायाः | चतुरात् | मित्रात् |
| ष. → | चतुरस्य | बालकस्य | चतुरायाः | बालिकायाः | चतुरस्य | मित्रस्य |
| स. → | चतुरे | बालके | चतुरायाम् | बालिकायाम् | चतुरे | मित्रे |

## अभ्यासः — 234

**निर्दिष्टविशेषणस्य विशेष्यानुगुणं विविधरूपाणि लिखत—**

[ सूचित विशेषण के विशेष्य के अनुसार विविध रूप लिखें। Write various forms of the qualifiers mentioned as per the qualificands given. ]

| क | I | | II | | III | |
|---|---|---|---|---|---|---|
| प्र. → | **बुद्धिमान्** | तरुणः | **बुद्धिमती** | बालिका | **नश्यत्** | शरीरम् |
| द्विती. → | | तरुणम् | | बालिकाम् | | शरीरम् |
| तृ. → | | तरुणेन | | बालिकया | | शरीरेण |
| च. → | | तरुणाय | | बालिकायै | | शरीराय |
| पं. → | | तरुणात् | | बालिकायाः | | शरीरात् |
| ष. → | | तरुणस्य | | बालिकायाः | | शरीरस्य |
| स. → | | तरुणे | | बालिकायाम् | | शरीरे |

| ख | I | | II | | III | |
|---|---|---|---|---|---|---|
| प्र. → | श्रेष्ठाः | पुरुषाः | सुन्दर्यः | तरुण्यः | मधुराणि | फलानि |
| द्विती. → | | पुरुषान् | | तरुणीः | | फलानि |
| तृ. → | | पुरुषैः | | तरुणीभिः | | फलैः |
| च. → | | पुरुषेभ्यः | | तरुणीभ्यः | | फलेभ्यः |
| पं. → | | पुरुषेभ्यः | | तरुणीभ्यः | | फलेभ्यः |
| ष. → | | पुरुषाणाम् | | तरुणीनाम् | | फलानाम् |
| स. → | | पुरुषेषु | | तरुणीषु | | फलेषु |

## अभ्यासः — 235

✍ **कोष्ठकस्थविशेषणानां विशेष्यानुगुणं समुचितं रूपं लिखत—**

[ कोष्ठकस्थित विशेषणों के विशेष्य के अनुसार समुचित रूप लिखें। Write the appropriate forms of the following qualifiers as per the qualificands. ]

**पुंलिङ्गे**

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा. | (धीमान्) | **धीमता** | छात्रेण । | 4. | (वृद्धः) | पण्डितम् । |
| 1. | (कुशलः) | | अध्यापकाय । | 5. | (विशालः) | वृक्षस्य । |
| 2. | (सुन्दरः) | | बालकः । | 6. | (समृद्धः) | कवेः । |
| 3. | (उत्तमः) | | जनात् । | 7. | (सुदीर्घः) | मार्गे । |

**स्त्रीलिङ्गे**

| | | | | | | |
|---|---|---|---|---|---|---|
| 8. | (मलिना) | | नद्याम् । | 12. | (विशाला) | सभायै । |
| 9. | (उत्तमा) | | महिलाम् । | 13. | (वृद्धा) | मातुः । |
| 10. | (स्थूला) | | अभिनेत्री । | 14. | (पवित्रा) | गङ्गायाः । |
| 11. | (प्रवीणा) | | गायिकया । | 15. | (नूतना) | पत्रिकायाम् । |

**नपुंसकलिङ्गे**

| | | | | | | |
|---|---|---|---|---|---|---|
| 16. | (पुरातनम्) | | भवनम् । | 20. | (समग्रम्) | नगराय । |
| 17. | (पक्वम्) | | फलम् । | 21. | (उन्नतम्) | मन्दिरात् । |
| 18. | (स्वच्छम्) | | वस्त्रेण । | 22. | (पराधीनम्) | राष्ट्रे । |
| 19. | (विशालम्) | | पुस्तकस्य । | | | |

## अभ्यासः — 236

**विशेषणस्य विभक्तिं वचनं च दृष्ट्वा विशेष्यस्य विभक्ति-वचने निर्दिशत—**

[ विशेषण के विभक्ति और वचन को देखकर विशेष्य के विभक्ति और वचन का निर्देश करें। Point out the case and number of the qualificands as per the case and number of the qualfiers. ]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| यथा | उत्तमेन | ......**बालकेन**...... । | (बालकः) | | | | |
| 1. | सुन्दरीम् | । | (बालिका) | 16. | कृशेन | । | (शिशुः) |
| 2. | नूतनाय | । | (वस्त्रम्) | 17. | महता | । | (श्रमः) |
| 3. | लघुना | । | (उपायः) | 18. | नीलस्य | । | (गगनम्) |
| 4. | समृद्धात् | । | (नगरम्) | 19. | समग्रायाः | । | (कथा) |
| 5. | स्वच्छे | ........................ । | (जलम्) | 20. | उन्नतानाम् | । | (वृक्षः) |
| 6. | निपुणस्य | । | (अध्यापकः) | 21. | वृद्धेन | । | (जनः) |
| 7. | महते | । | (उपकारः) | 22. | मलिनायां | । | (शाटिका) |
| 8. | मूर्खाय | । | (सेवकः) | 23. | पक्वेषु | । | (फलम्) |
| 9. | कृपालुना | । | (धनिकः) | 24. | प्रवीणाः | । | (वक्ता) |
| 10. | अभिज्ञस्य | । | (पिता) | 25. | सहृदयाः | । | (श्रीमान्) |
| 11. | कोमलात् | । | (पत्रम्) | 26. | समग्रे | । | (राष्ट्रम्) |
| 12. | विशालायै | । | (सभा) | 27. | पुरातनीषु | । | (पत्रिका) |
| 13. | पराधीनायाः | । | (माता) | 28. | संस्कृतायां | । | (भूमिः) |
| 14. | पिङ्गयोः | । | (नेत्रम्) | 29. | रिक्तेषु | । | (पात्रम्) |
| 15. | सकलानां | । | (विद्या) | 30. | संपूर्णे | । | (पुस्तकम्) |

## अभ्यासः — 237

**विशेष्यानुगुणं विशेषणानां रूपाणि लिखत—**

[ विशेष्य के अनुसार विशेषणों के रूप लिखें। Write the declension of the qualifiers as per the qualificands. ]

| | | | | |
|---|---|---|---|---|
| यथा | अहं | (दीर्घ) | **दीर्घां** | कथां पठामि। |
| 1. | | (पुरातन) | | भारते संस्कृतं जनभाषा आसीत्। |
| 2. | | (नूतन) | | रथेषु मूर्तयः विराजन्ते। |

| | | | |
|---|---|---|---|
| 3. | सा | (पवित्र) | गङ्गाजलम् आनयति। |
| 4. | | (उत्तम) | क्रीडापटुः प्रान्तरे क्रीडति। |
| 5. | भवान् | (पक्व) | फलानि आनयतु। |
| 6. | सः | (वृद्ध) | जनेन सह आगतवान्। |
| 7. | | (नील) | गगने पक्षिणः शोभन्ते। |
| 8. | भवान् | (अभिज्ञ) | वैज्ञानिकस्य नाम स्मरतु। |
| 9. | मातामही | (प्राचीन) | कथां कथयति। |
| 10. | | (स्वच्छ) | जले जनाः स्नानं कुर्वन्ति। |
| 11. | | (बुद्धिमान्) | जनाः प्रशंसनीयाः भवन्ति। |
| 12. | | (वृद्धा) | महिलायाः गृहं नास्ति। |
| 13. | वयं | (पक्व) | फलानां रसं पिबामः। |
| 14. | | (कोमला) | लतायां कुसुमानि विकसन्ति। |
| 15. | | (दयालु) | धनिकाः जनसेवां कुर्वन्ति। |
| 16. | | (निर्मल) | गगने नक्षत्राणि शोभन्ते। |
| 17. | | (महत्) | श्रमेण छात्राः पठन्ति। |
| 18. | ते | (सकला) | विद्यानाम् अभ्यासं कुर्वन्ति। |
| 19. | आरक्षिणः | (समग्र) | नगरं परिक्रामन्ति। |
| 20. | | (शीतल) | वातावरणे प्रातःभ्रमणं सुखकरं भवति। |
| 21. | | (उन्नत) | वृक्षेषु वानराः वसन्ति। |
| 22. | | (उत्तम) | छात्रेषु गुरवः स्निह्यन्ति। |
| 23. | सर्वे | (महत्) | जनानाम् उपदेशं शृणुयुः। |
| 24. | भवती | (रिक्त) | पात्रेषु जलं पूरयतु। |
| 25. | सर्वकारः | (नूतन) | योजनानां कार्यान्वयं करोति। |
| 26. | एषः ग्रन्थः छात्राणां | (महत्) | उपकाराय भवेत्। |
| 27. | | (लघु) | उपायेन वयं संस्कृतं वदिष्यामः। |
| 28. | भाषाशिक्षणाय एषा | (नूतन) | पद्धतिः अस्ति। |
| 29. | | (अभिज्ञ) | शिक्षकाणां सहयोगेन एतत् शिक्षणं सफलं भवति। |
| 30. | | (उत्तम) | छात्राः राष्ट्रस्य निधयः सन्ति। |

## अभ्यासः — 238

✍ **कोष्ठके दत्तानां विशेषणानां लिङ्गं विभक्तिं वचनं च स्थूलाक्षरैः लिखितस्य विशेष्यस्य अनुरूपं रिक्तस्थानेषु लिखत–**

[ कोष्ठक में दिये गये विशेषणों के लिङ्ग, विभक्ति तथा वचन स्थूलाक्षर में लिखे गये विशेष्यों के अनुसार रिक्तस्थान में लिखें। Write the gender, case and number of the qualifiers in the blank space as per the qualificands written in bold letters. ]

उदा. (चतुर) ......**चतुरः**...... **बालकः** (दीर्घ) ......**दीर्घेण**...... **दण्डेन** (दुर्बल) ......**दुर्बलं**...... **सर्पं** मारितवान्।

1. (कुशल) ............ **अध्यापकाः** (सरल) ............ **संस्कृतेन** (नूतन) ............ **छात्रान्** बोधयन्ति।
2. (विशाल) ............ **वृक्षस्य** अधः (कृष्ण) ............ **धेनुः** (कोमल) ............ **तृणानि** चरति।
3. (सुन्दरी) ............ **तरुण्यः** (सुदीर्घ) ............ **राजमार्गे** (सहृदय) ............ **सुहृद्भिः** सह भ्रमन्ति।
4. (प्रवीण) ............ **गुरवः** (उत्तम) ............ **शिष्यैः** सह (संपूर्ण) ............ **शास्त्रचर्चां** कृतवन्तः।
5. (धीमत्) ............ **जनाः** (समग्र) ............ **समाजस्य** (महत्) ............ **उपकाराय** सचेष्टाः भवेयुः।
6. (निपुण) ............ **रजकः** (पुरातन) ............ (मलिन) ............ **वस्त्राणि** (स्वच्छ) ............ **जलेन** प्रक्षालयति।
7. (बुद्धिमत्) ............ **बालिका** (नूतन) ............ (समीचीन) ............ **उत्तराणि** लिखितवती।
8. (वृद्ध) ............ **मातामही** (मधुर) ............ **भाषया** (सरस) ............ **कथाः** कथितवती।
9. (ज्येष्ठ) ............ **भगिनी** (रिक्त) ............ **पात्रेषु** (शीतल) ............ **जलं** पूरयति।
10. (दक्ष) ............ **अभियन्ता** (स्वकीय) ............ **सङ्गणकेन** (बहु) ............ **कार्याणि** शीघ्रं सम्पादयति।
11. (निर्मल) ............ **गगने** (शुभ्र) ............ **बकपङ्क्तिः** (शारदी) ............ **शोभां** वर्धयति।
12. (पटु) ............ **वटुः** (मुक्त) ............ **कण्ठेन** (प्रसिद्ध) ............ **वेदमन्त्रान्** उच्चारयति।
13. (भारतीय) ............ **सैनिकाः** (मातृभूमि) ............ **भारतभूमेः** (पूर्ण) ............ **सुरक्षां** कुर्वन्तु।
14. (अभिज्ञ) ............ **कार्यकर्तारः** (लघु) ............ **उपायेन** (महत्) ............ **कार्यं** साधयन्ति।
15. वयं (सहज) ............ **प्रयासेन** (नूतन) ............ **शैल्या** (देवभाषा) ............ **प्रियभाषां** सम्पादयेम।

## अभ्यासः — 239

✍ **'तद्'-शब्दस्य उचितैः रूपैः रिक्तस्थानानि पूरयत–**

['तद्' शब्द के उचित रूप से रिक्तस्थानों की पूर्ति करें। Fill in the blanks with necessary declension of *tad.* ]

| | | |
|---|---|---|
| **यथा** | तं | छात्रम् अहम् आह्वयामि। |
| 1. | | वृद्धः ग्रामे वसति। |
| 2. | | साधुना सह अहं सम्भाषणं कृतवान्। |
| 3. | | भगिनीं वयं जानीमः। |
| 4. | | भिक्षुकाय त्वं भिक्षां देहि। |
| 5. | | नगरात् यानम् आगमिष्यति। |
| 6. | | विद्यालये केवलं बालिकाः पठन्ति। |
| 7. | | चलचित्रस्य नाम स्मरति वा ? |
| 8. | | बालकस्य पिता देहल्यां तिष्ठति। |
| 9. | | छात्राणां परीक्षा मार्चमासे अस्ति। |
| 10. | | अध्यापकयोः पदोन्नतिः भविष्यति। |
| 11. | | मन्दिरे कस्य देवस्य पूजा भवति ? |
| 12. | | गायिकया सह अहं गीतं गास्यामि। |
| 13. | | पुत्रीभ्यां विना माता क्षणं न तिष्ठति। |
| 14. | | वृद्धाभ्यः राजकीयम् अनुदानं लभ्यते। |
| 15. | | महिलाभिः सह मातामही गच्छति। |
| 16. | | नायिकायाः अभिनयः सम्यक् अस्ति। |
| 17. | | मालानां मूल्यं कियत् ? |
| 18. | | पुष्करिण्यां पुष्पाणि विकसन्ति। |
| 19. | | ग्रामे मम परिवारः तिष्ठति। |
| 20. | | ग्रन्थेषु एषः ग्रन्थः सर्वोत्कृष्टः अस्ति। |

## अभ्यासः — 240

✍ **अधोनिर्दिष्टेषु वाक्येषु विशेषणपदानि संशोध्य रिक्तस्थानेषु लिखत—**

[अधोनिर्दिष्ट वाक्यों में विशेषण पदों को संशोधित कर रिक्तस्थान में लिखें। Correct the qualifiers in the following sentences and write them in the blank space.]

| | | | |
|---|---|---|---|
| उदा. | ~~एतया~~ | **एतेन** | बालकेन सह अहं पठामि। |
| 1. | ~~एतत्~~ | | वृद्धाय भवान् किमपि ददातु। |
| 2. | ~~एतस्मात्~~ | | छात्रेभ्यः त्वं चित्रं प्रदर्शय। |
| 3. | ~~एतस्मै~~ | | छात्रेषु सर्वे स्निह्यन्ति। |
| 4. | ~~एतं~~ | | पत्रिकां भवन्तः अवश्यं पठन्तु। |
| 5. | ~~कस्मै~~ | | विद्यालये पठसि। |
| 6. | ~~एतस्य~~ | | मन्दिरे श्रीजगन्नाथस्य पूजनं भवति। |
| 7. | ~~एतं~~ | | भिक्षुकाय वयं भिक्षां दद्मः। |
| 8. | ~~एतयोः~~ | | बालकाभ्यां माता मिष्टान्नं दत्तवती। |
| 9. | ~~एतैः~~ | | महिलाभिः सह माता ग्रामं गच्छतु। |
| 10. | ~~एतस्यां~~ | | शाटिकायाः मूल्यं कियत्? |
| 11. | ~~एतौ~~ | | बालिके कुत्र गच्छतः? |
| 12. | ~~एते~~ | | छात्रौ किं पठतः? |
| 13. | ~~एतानि~~ | | शिशवः प्रान्तरे क्रीडन्तु। |
| 14. | ~~एते~~ | | पुस्तकानि अहं पठितवान्। |
| 15. | ~~एषा~~ | | भोजनं स्वादिष्टम् अस्ति। |
| 16. | ~~एषा~~ | | सेवकः गृहकार्यं करोति। |
| 17. | ~~एते~~ | | तैलानि हेमन्ते सुखदानि। |
| 18. | ~~एतौ~~ | | भगिन्यौ सम्यक् गायतः। |
| 19. | ~~एतस्मात्~~ | | नद्याः जलं स्वीकुरु। |
| 20. | ~~एते~~ | | वीरौ देशं रक्षतः। |

## अभ्यासः — 241

✍ **वाक्यद्वयं योजयित्वा उदाहरणानुगुणम् अखण्डं वाक्यं रचयत—**

[ दोनों वाक्यों को जोड़कर उदाहरण के अनुसार अखण्ड वाक्य लिखें। Write single sentence by joining two sentences given as shown in the example. ]

उदा. गणेशः उत्तमः बालकः। तम् अहम् इच्छामि।

अहम् **उत्तमं बालकं गणेशम्** इच्छामि। ।

1. रेखा बुद्धिमती छात्रा अस्ति। तया सह अहं पठामि।

   ।

2. विभुदत्तः सुधीरः आसीत्। सर्वे तस्य प्रशंसाम् अकुर्वन्।

   ।

3. वाराणसी नगरी विद्याभूमिः अस्ति। संस्कृतज्ञाः वाराणसीम् अवश्यं गच्छेयुः।

   ।

4. गङ्गा पवित्रा नदी। तस्यां भक्ताः स्नानं कुर्वन्ति।

   ।

5. श्रीजगन्नाथमन्दिरं विश्वप्रसिद्धम्। तत्र बलभद्रः सुभद्रा च स्तः।

   ।

6. कुशलाः अध्यापकाः सन्ति। छात्राः तेषां निकटे पठेयुः।

   ।

7. राजमार्गः दीर्घः भवति। तस्मिन् यानानि चलन्ति।

   ।

8. विशालम् अरण्यम् आसीत्। तस्मिन् बहवः जन्तवः आसन्।

   ।

9. स्वच्छं जलम् अस्ति। तेन माता पाकं करोति।

   ।

10. भारतीयः वैज्ञानिकः बुद्धिमान्। तं सर्वे निमन्त्रयन्ति।

.................................................................................................................. ।

11. सरस्वती विद्यादात्री। छात्राः तस्याः पूजां कुर्वन्ति।

।

12. संस्कृतं सरलम् अस्ति। तत् सर्वे जानीयुः।

।

13. वृद्धाः जनाः सन्ति। भवन्तः तैः सह विचारयन्तु।

।

14. उन्नताः वृक्षाः सन्ति। तेषु वानराः क्रीडन्ति।

।

15. शीतलं जलम् अस्ति। तेन वयं स्नानं कुर्मः।

।

16. सर्वकारस्य नूतनाः योजनाः भवन्ति। ताभिः देशः सुसमृद्धः भवति।

।

17. तपोवनानि सुन्दराणि आसन्। तेषु मुनयः तपस्याम् अकुर्वन्।

।

18. सा दिनपत्रिका। तस्यां परीक्षाफलं प्रकाशितम्।

।

19. भारतस्य राजधानी नवदेहली। तस्यां राजनेतारः निवसन्ति।

20. संस्कृतज्ञाः स्वभावेन सरलाः। ते सर्वत्र अभिनन्दिताः भवन्ति।

**विशेष्यविशेषणभावः**

## रामः द्विर्नाभिभाषते

रामः दशरथस्य **प्रियः पुत्रः** आसीत् । सः च तस्य **ज्येष्ठः पुत्रः** आसीत् । शत्रुघ्नः तस्य **कनिष्ठः पुत्रः** आसीत् । भरत-लक्ष्मणौ च **मध्यमौ पुत्रौ** आस्ताम् । रामस्य माता कौशल्या दशरथस्य **ज्येष्ठा राज्ञी** आसीत् । सुमित्रा च तस्य **कनिष्ठा राज्ञी** आसीत् । कैकेयी तस्य **मध्यमा राज्ञी** आसीत् या दशरथस्य **प्रियतमा पत्नी** अपि आसीत् । **सा** न केवलं **रूपवती** अपितु **युद्ध-विद्या-निपुणा** अपि आसीत् । **बहुषु युद्धेषु** सा दशरथस्य सहकारिणी अवर्तत । तस्याः साहाय्यम् अवाप्य सः एकं **महत् युद्धं** जितवान् । **प्रसन्नः दशरथः** यथेच्छं वरं दातुं तस्यै प्रत्यशृणोत् । किन्तु सा ''यथासमयं याचिष्यते'' इति उक्तवती ।



रामस्य राज्याभिषेकसमये सा तं **प्रतिश्रुतं वरद्वयं** याचितवती– ''रामः चतुर्दश वर्षाणि यावत् **घने अरण्ये** गच्छतु । मम पुत्रः भरतः च अयोध्यायाः राजा भवतु'' इति । तत् श्रुत्वा दशरथः मनसि **प्रभूतं कष्टम्** अनुभूतवान् । सः एतदर्थं कैकेयीं भृशम् आक्षिप्तवान् । **निर्विकारः रामः** पितरं सत्यवचनं कर्तुं स्वेच्छया एव वनं प्रस्थितवान् ।

रामेण सह तस्य **प्रियः अनुजः** लक्ष्मणः अपि वनं गतवान् । **पतिव्रता पत्नी** सीता अपि रामस्य अनुगमनं कृतवती । अयोध्यायाः **रामभक्ताः प्रजाः ईर्ष्याशीलायै कैकेय्यै** भृशं कुपिताः अभवन् । भरतः

अपि मातुल-गृहात् प्रतिनिवृत्य **स्वार्थवशवर्तिन्यै स्वमात्रे** अकुप्यत्। ततः सः चित्रकूटं गत्वा **ज्येष्ठं भ्रातरं** रामम् अयोध्यां प्रत्यागन्तुं प्रार्थयत। किन्तु **दृढव्रतः रामः** तस्य अनुरोधं न अङ्गीकृतवान्।



अन्ततः भरतः रामेण धारितं काष्ठमयं पादुकायुगलं गृहीत्वा अयोध्यां प्रतिनिवृत्तवान्। पादुके एव रामस्य प्रतिनिधिरूपेण राज्यसिंहासने प्रतिष्ठाप्य भरतः रामस्य प्रत्यागमनपर्यन्तं न्यासभूतं राज्यं पालितवान्। वस्तुतः राजा **सन्नपि** सः **संन्यासिवत् स्वप्रियम्** अयोध्याराज्यं शासितवान्।

◆◆◆

## सुभाषितम्

ददाति न तु गृह्णाति सत्यं वदति नानृतम्।
द्विः शरं नाभिसन्धत्ते रामो द्विर्नाभिभाषते॥

## अभ्यासः — 242

1. **विशेष्यपदं विशेषणपदं च यथास्थानं निर्दिशत–**

[ विशेष्य पद एवं विशेषण पद का यथास्थान निर्देश करें। Point out the qualificand and qualifier in the specified space. ]

| | | विशेष्यम् | विशेषणम् | | | विशेष्यम् | विशेषणम् |
|---|---|---|---|---|---|---|---|
| (i) | प्रियः पुत्रः | पुत्रः | प्रियः | (ii) | कनिष्ठः पुत्रः | | |
| (iii) | मध्यमा राज्ञी | | | (iv) | महत् युद्धम् | | |
| (v) | प्रसन्नः दशरथः | | | (vi) | घने अरण्ये | | |
| (vii) | रामभक्ताः प्रजाः | | | (viii) | दृढव्रतः रामः | | |
| (ix) | पतिव्रता पत्नी | | | (x) | प्रभूतं कष्टम् | | |

2. **उचितं विशेष्यपदं चित्वा रिक्तस्थानानि पूरयत–**

[ उचित विशेष्य पद चुनकर रिक्तस्थान की पूर्ति करें। Fill in the blanks with appropriate qualificand. ]

(i) प्रियः ......पुत्रः...... । (मित्रम्, पुत्रः, पुत्री)

(ii) महत् ............ । (श्रमः, विपत्तिः, कष्टम्)

(iii) मध्यमा ............ । (स्थानम्, अङ्गुलिः, आत्मजः)

(iv) विशाले ............ । (भवनानि, भवनस्य, भवने)

(v) परया ............ । (भक्तिः, भक्त्या, भक्त्याम्)

3. **उचितं विशेषणपदं चित्वा रिक्तस्थानानि पूरयत–**

[ उचित विशेषण पद चुनकर रिक्तस्थान की पूर्ति करें। Fill in the blanks with appropriate qualifier. ]

(i) ......प्रियः...... अनुजः। (प्रियम्, प्रिया, प्रियः)

(ii) ............ दधि। (मधुरम्, मधुरः, मधुरा)

(iii) ............ बुद्धिः। (सूक्ष्मः, सूक्ष्मा, सूक्ष्मम्)

(iv) ............ विपत्तौ। (महति, महतः, महत्याम्)

(v) ............ स्रजे। (दीर्घे, दीर्घायाः, दीर्घायै)

सुभाषितेषु विशेष्यविशेषणभावः

# सुभाषितानि

किं कुलेन विशालेन विद्या-हीनस्य देहिनः ।
अकुलीनोऽपि विद्यावान् देवैरपि स पूज्यते ॥

प्राज्ञो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाम्भसः ॥

अन्यानि शास्त्राणि विनोदमात्रं प्राप्तेषु वा तेषु न तैश्च किञ्चित् ।
चिकित्सितज्योतिषमन्त्रवादाः पदे-पदे प्रत्ययमावहन्ति ॥

व्याघ्रः सेवति काननं सुगहनं सिंहो गुहां सेवते,
हंसः सेवति पद्मिनीं कुसुमितां गृध्रः श्मशानस्थलीम् ।
साधु सेवति साधुमेव सततं नीचोऽपि नीचं जनं
या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते ॥

वाणी रसवती यस्य भार्या पुत्रवती सती ।
लक्ष्मीर्दानवती यस्य सफलं तस्य जीवितम् ॥

◆◆◆

**कथायां विशेष्यविशेषणभावः**

## मगधसाम्राज्यम् महामनीषी चाणक्यश्च

प्राचीने भारते मगधजनपदे नन्दवंशस्य साम्राज्यम् आसीत्। तस्मिन् राज्ये बुद्धिमन्तः मन्त्रिणः कर्त्तव्यनिष्ठाः कर्मचारिणः च राज्ञः साहाय्यं कुर्वन्ति स्म । अतः चतसृषु दिक्षु सम्पन्नता आसीत् ।

मगध-साम्राज्यस्य सभायां गुणवन्तः चिन्तनशीलाः ज्ञानिनः च पण्डिताः आसन् । ते विद्वांसः समदर्शिनः आसन् । अतः न्यायव्यवस्था अतीव समीचीना आसीत् ।



तस्मिन् राज्ये शक्तिमन्तः सैनिकाः दीर्घ-कायाः मल्लाः च आसन् । तत्र अश्वशालायां श्वेतेभ्यः कृष्णेभ्यः रक्तेभ्यः विचित्रवर्णेभ्यः च बलिष्ठेभ्यः अश्वेभ्यः युद्धप्रशिक्षणं दीयते स्म । महाराजः आवश्यकतायां सत्यां मदमत्तैः स्थूलैः गजैः साकं युद्धार्थं गच्छति स्म ।

नगरस्य वैभवम् अपि उत्कृष्टम् आसीत्। तत्र उन्नतं दीर्घं च भवनं, सुन्दरं सुरम्यं मनोहरं च उद्यानं, स्निग्धाः फलयुक्ताः च वृक्षाः, शिखरयुक्तं विशिष्टं च मन्दिरं, विशालः तडागः, सुदीर्घः राजमार्गः,

शोभना वीथी, उत्तमा पाठशाला, सुव्यवस्थिता विपणिः च नगरस्य शोभां वर्धयन्ति स्म।

घटोध्न्यः कपिलाः गावः अमृतमयेन दुग्धेन जनान् तर्पयन्ति स्म। राज्ये उत्तमं कृषिकार्यं प्रचलति स्म। अतः नागरिकाः धनिकाः आसन्। एकः अपि बुभुक्षितः अशिक्षितः निर्वस्त्रः निर्धनः गृहविहीनः वा जनः न आसीत्। शिक्षणव्यवस्था अपि अत्युत्कृष्टा आसीत्।

तस्मिन् एव राज्ये जगत्-प्रसिद्धः नालन्दा- विश्वविद्यालयः आसीत्। तत्र सहस्राधिकाः छात्राः पठन्ति स्म। तान् प्रतिभावतः छात्रान् पाठयितुं कुशलानां गुणवतां कृतभूरिपरिश्रमाणाम् आचार्याणां नियुक्तिः राज्यशासनेन एव क्रियते स्म। सर्वत्र पवित्रं वातावरणम् आसीत्।

राज्ये बहूनि वर्षाणि यावत् शासनव्यवस्था उत्तमतया प्राचलत्। पश्चात् तस्मिन् कुले उत्पन्नः घनानन्दः नाम कश्चन शासकः राजसिंहासने उपाविशत्। बाल्यात् एव सः परमस्वार्थी इन्द्रियासक्तः च आसीत्। राज्यकार्ये परोपकारे वा तस्य रुचिः न आसीत्। सर्वाणि कार्याणि विहाय अन्तःपुरे एव सततं तस्य मनः संलग्नं भवति स्म। कतिपयेषु वर्षेषु व्यतीतेषु अपि इन्द्रियसुखेषु आसक्तः राज्यचिन्तानिरपेक्षः प्रियामुखप्रेक्षी घनानन्दः स्वीयां जीवनशैलीं नैव परिवर्तितवान्। तस्य अन्तःपुरे काश्चन रूपयौवनसम्पन्नाः प्रवीणाः नर्तक्यः आसन्। तासु एकस्याः नर्तक्याः, द्वयोः नर्तक्योः वा नृत्यदर्शनेन न कदापि तस्य मनः तृप्तं भवति स्म। अतः सः राज्यस्य लेशतः अपि चिन्ताम् अकृत्वा बह्वीनां नर्तकीनां नृत्ये निरन्तरं निमग्नः भवति स्म।

राज्ञः उदासीनभावात् विविधाभिः समस्याभिः समस्तं राज्यं ग्रस्तम् अभवत्। तस्मात् सर्वे जनाः चिन्तिताः जाताः। केचन राज्यस्य शुभचिन्तकाः ताः समस्याः दूरीकर्तुं प्रयत्तवन्तः। महाराजं घनानन्दं सन्मार्गम् आनेतुं कश्चन एकः सचिवः यत्नं कृतवान्। किन्तु सः असफलः अभवत्। पश्चात् द्वौ सचिवौ मिलित्वा यत्नं कृतवन्तौ। परन्तु तौ अपि असफलौ जातौ। अन्ते अनेके सचिवाः विविधान् यत्नान् कृतवन्तः। किञ्च ते अपि असफलाः जाताः। तस्मिन् अकर्मण्ये राज्ञि घनानन्दे सर्वासां प्रजानां विश्वासः समाप्तः जातः। अतः महान् स्वामिभक्तः प्रधानः अमात्यः राक्षसः अपि चिन्तितः अभवत्।

तत्र पाटलिपुत्रे महान् बुद्धिमान् सद्गुण-सम्पन्नः व्यवहारकुशलः सर्वशास्त्रपारङ्गतः राष्ट्रभक्तः श्यामलवर्णः कश्चन ब्राह्मणः वसति स्म। तस्य ब्राह्मणस्य नाम चाणक्यः आसीत्। सः अतीव परोपकारी सर्वहितचिन्तकः च आसीत्।

राज्यस्य तादृशीं दुर्दशां दृष्ट्वा तत्रस्थाः सर्वे बुद्धिजीविनः अनुपमेन अर्थशास्त्रज्ञेन राष्ट्रभक्तेन तेन चाणक्येन सह परामर्शं कृतवन्तः। अपि च पथः भ्रष्टस्य घनानन्दस्य सकाशं तं प्रेषितवन्तः। राजभवनं गत्वा



पण्डितः चाणक्यः कर्त्तव्यच्युतं तं महाराजं प्रबोधितवान् । तस्मात् कुपितः सः मदान्धः राजा महतः बुद्धिमतः सर्वगुणसम्पन्नस्य सकलशास्त्रपारङ्गतस्य निःस्वार्थिनः तेजस्विनः तस्य ब्राह्मणस्य अपमानं कृतवान् । तदानीम् एव परमः सात्त्विकः सः चाणक्यः नन्दसाम्राज्यं विनाशयितुं प्रतिज्ञां कृतवान् ।

तस्मात् राजभवनात् आगत्य सः महापुरुषः एकं धीरं शास्त्रनिपुणं वीरं युवकं दृष्टवान् । तस्य युवकस्य नाम 'चन्द्रगुप्तः' इति आसीत् । आचार्यः चाणक्यः तस्मिन् कुशले चन्द्रगुप्ते अद्भुतं सामर्थ्यं परिलक्षितवान् । महामनीषी चाणक्यः स्वीयेन बुद्धिकौशलेन दुष्टात् घनानन्दात् राज्याधिकारं हृत्वा समूलं नन्दवंशं च विनाश्य चतुराय महावीराय तस्मै चन्द्रगुप्ताय सम्पूर्णं मगधराज्यं प्रदत्तवान् । तस्य चन्द्रगुप्तस्य पराक्रमेण राज्यस्य रिक्तः कोषः पुनः पूर्णः जातः । राज्ये सर्वत्र समृद्धिः सुखशान्तिः च अभवत् । आबालवृद्धाः प्रसन्नाः भूत्वा सुखेन जीवनयापनम् आरब्धवन्तः । कालान्तरे सः एव चन्द्रगुप्तः स्वगुरोः आचार्यस्य चाणक्यस्य मार्गदर्शनेन मौर्यवंशस्य स्थापनां कृत्वा अखिले भारते स्वीयं साम्राज्यं विस्तार्य चक्रवर्तित्वेन विश्वविख्यातः अभवत् ।

◆◆◆

# पञ्चमः स्तबकः

## 5.2 प्रथमः पाठः

### [ चित्-चन-प्रयोगाः ]

**चित्-चन-प्रयोगाः**

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]


**पुं.**



**कश्चित्** बालकः पठति।



**कौचित्** बालकौ पठतः।



**केचित्** बालकाः पठन्ति।



बालः **कञ्चित्** साधुं पश्यति।




बाला **कौचित्** साधू पश्यति।



बालः **कांश्चित्** साधून् पश्यति।



पङ्गुः **केनचित्** दण्डेन चलति।



पङ्गुः **काभ्याञ्चित्** दण्डाभ्यां चलति।



बालाः **कैश्चित्** दण्डैः क्रीडन्ति।




माता **कस्मैचित्** भिक्षुकाय
भिक्षां ददाति।



माता **काभ्याञ्चित्** भिक्षुकाभ्यां
भिक्षां ददाति।



माता **केभ्यश्चित्** भिक्षुकेभ्यः
भिक्षां ददाति।



**कस्माच्चित्** वृक्षात् पत्रं
पतति।



**काभ्याञ्चित्** वृक्षाभ्यां पत्राणि
पतन्ति।




**केभ्यश्चित्** वृक्षेभ्यः पत्राणि
पतन्ति।



**कस्यचित्** बालकस्य
स्यूतः अस्ति।



**कयोश्चित्** बालकयोः स्यूतौ
स्तः।



**केषाञ्चित्** बालकानां स्यूताः
सन्ति।



ब्रह्मचारी **कस्मिंश्चित्**
उटजे वसति।



एतौ **कयोश्चित्** उटजयोः
वसतः।



एते **केषुचित्** उटजेषु वसन्ति।

**स्त्री.**




**काचित्** बालिका लिखति।



**केचित्** बालिके लिखतः।




**काश्चित्** बालिकाः लिखन्ति।



बालः **काञ्चित्** वृद्धां पश्यति।




बाला **केचित्** वृद्धे पश्यति।



बालः **काश्चित्** वृद्धाः पश्यति।



बालः **कयाचित्** महिलया
सह गच्छति।



बालिका **काभ्याञ्चित्**
महिलाभ्यां सह गच्छति।



बालिका **काभिश्चित्** महिलाभिः
सह गच्छति।



माता **कस्यैचित्** ब्रह्मचारिण्यै भिक्षां ददाति ।



माता **काभ्याञ्चित्** ब्रह्मचारिणीभ्यां भिक्षां ददाति ।



माता **काभ्यश्चित्** ब्रह्मचारिणीभ्यः भिक्षां ददाति ।



**कस्याश्चित्** लतायाः पुष्पं पतति ।



**काभ्याञ्चित्** लताभ्यां पुष्पाणि पतन्ति ।




**काभ्यश्चित्** लताभ्यः पुष्पाणि पतन्ति ।




**कस्याश्चित्** छात्रायाः लेखनी अस्ति ।




**कयोश्चित्** छात्रयोः पुस्तकानि सन्ति ।



**कासाञ्चित्** छात्राणां घट्यः सन्ति ।



एषः **कस्याञ्चित्** पाठशालायां पठति ।




एतौ **कयोश्चित्** पाठशालयोः पठतः ।




एते **कासुचित्** पाठशालासु पठन्ति ।


**नपुं.**




**किञ्चित्** यानं चलति ।




**केचित्** याने चलतः ।



**कानिचित्** यानानि चलन्ति ।



बालः **किञ्चित्** चित्रं पश्यति ।



बालः **केचित्** चित्रे पश्यति ।



बालः **कानिचित्** चित्राणि पश्यति ।

## विवरणम्

☞ किम्-शब्दरूपाणाम् अन्ते चित्-चन-प्रयोगः भवति—

| | | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| **नपुं.** | किम् | **प्रथमा** | किञ्चित् / किञ्चन | केचित् / केचन | कानिचित् /कानिचन |
| **पुं.** | किम् | **प्रथमा** | कश्चित् / कश्चन | कौचित् / कौचन | केचित् / केचन |
| **स्त्री.** | किम् | **प्रथमा** | काचित् / काचन | केचित् / केचन | काश्चित् /काश्चन |

एवम् अन्यासु विभक्तिषु अपि संयोजनं करणीयम्।

☞ **कति-शब्दस्य रूपाणाम् अन्ते चित्-चन-प्रयोगः भवति। कतिशब्दस्य त्रिषु लिङ्गेषु समानानि एव रूपाणि भवन्ति।**

| | **चित्** | **चन** |
|---|---|---|
| **प्र.** | कतिचित् | कतिचन |
| **द्विती.** | कतिचित् | कतिचन |
| **तृ.** | कतिभिश्चित् | कतिभिश्चन |
| **च.** | कतिभ्यश्चित् | कतिभ्यश्चन |
| **प.** | कतिभ्यश्चित् | कतिभ्यश्चन |
| **ष.** | कतीनाञ्चित् | कतीनाञ्चन |
| **स.** | कतिषुचित् | कतिषुचन |

☞ **निम्नाङ्कितानाम् प्रश्नवाचकानाम् अव्ययानाम् अन्ते अपि चित्-चन-प्रयोगः भवति।**

| **अव्ययम्** | **चित्** | **चन** |
|---|---|---|
| कदा | कदाचित् | कदाचन |
| कुत्र | कुत्रचित् | कुत्रचन |
| कर्हि | कर्हिचित् | कर्हिचन |
| कथम् | कथञ्चित् | कथञ्चन |
| कुतः | कुतश्चित् | कुतश्चन |

## (क) अधोनिर्दिष्टानि वाक्यानि अवधानपूर्वकं पठत–

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read the following sentences carefully. ]

**कश्चित्** विद्यालयं गच्छति।

**कस्मैचित्** देहि।

**कञ्चित्** पाठं पठ।

☞ उपरिलिखितानि वाक्यानि परिशीलयत। प्रथमे वाक्ये 'कः' इति निश्चयः नास्ति। अतः 'कश्चित्' इति प्रयुक्तम्। द्वितीये वाक्ये 'कस्मै दातव्यम्' इत्यंशः न निश्चितः। अतः 'कस्मैचित्' इति। तृतीये वाक्ये अपि तथैव, अतः 'कञ्चित्' इति उक्तम्। एवं ज्ञायते यत् अनिर्णीते अर्थे 'चित्' भवति।

### अवधेयम्

**कः कश्चित् इति शब्दयोः अयं भेदः**

| | | | |
|---|---|---|---|
| **कः** | कौन | = | Who |
| **कश्चित्** | कोई (एक) | = | Some one |

### विवरणम्

अनिर्णीते एव अर्थे 'चन' इत्यपि अस्ति। अतः 'चित्' स्थाने 'चन' अपि प्रयोक्तुं शक्यम्। तस्मात् पूर्वोक्तेषु वाक्येषु क्रमेण कश्चन/कस्मैचन/कञ्चन इत्यपि रूपाणि प्रयोक्तुं शक्यानि। एतौ अव्ययशब्दौ 'किं' शब्दात् परं प्रयुज्येते। 'किं'-शब्दस्य विभिन्नविभक्त्यन्तं रूपं कृत्वा 'चित् + चन' शब्दौ योज्येते। 'किम्' इति शब्दस्य यस्यां कस्यामपि विभक्तौ यस्मिन् कस्मिन्नपि वचने परिनिष्ठितरूपात् परमेव 'चित्' 'चन'-शब्दौ भवतः। यथावसरं सन्धिः अपि करणीयः।

**उदा.** केनचित्, कयाचित्, कञ्चित्, कस्यैचित् इत्यादि।

## अभ्यासः – 243

✍ **किं शब्दस्य पुंलिङ्गरूपाणि विलिख्य 'चित्' अव्ययपदं संयोज्य सिद्धरूपाणि रिक्तस्थलेषु लिखत–**

['किम्' शब्द के पुंलिङ्ग रूपों से 'चित्' अव्ययपद जोड़कर सिद्धरूपों को रिक्तस्थान में लिखें। Fill in the blanks with the words derived from the masculine form of '*kim*' with the addition of indeclinable word *cit.*]

**पुंलिङ्गे**

उदा. **कः + चित् = कश्चित्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्र.** | कः + चित् = कश्चित् | कौ + चित् = कौचित् | के + चित् = केचित् |
| **द्विती.** | कम् + चित् = कञ्चित् | ........ + = ........ | कान् + चित् = कांश्चित् |
| **तृ.** | + ........ = ........ | काभ्याम् + चित् = काभ्याञ्चित् | कैः + चित् = कैश्चित् |
| **च.** | + = ........ | ........ + = ........ | केभ्यः + चित् = केभ्यश्चित् |
| **प.** | कस्मात् + चित् = कस्माच्चित् | ........ + ........ = ........ | ........ + = |
| **ष.** | + ........ = ........ | कयोः + चित् = कयोश्चित् | केषां + चित् = केषाञ्चित् |
| **स.** | कस्मिन् + चित् = कस्मिंश्चित् | ........ + ........ = | ........ + = |

## अभ्यासः – 244

✍ **यथोदाहरणं रिक्तं स्थानं पूरयत–**

[उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example.]

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा. | 1. | कः | + चित् | = | **कश्चित्** | |
| | 2. | | + चित् | = | केभ्यश्चित् | |
| | 3. | कयोः | + चित् | = | | |
| | 4. | | + चित् | = | कांश्चित् | |
| | 5. | कस्मिन् | + चित् | = | | |

| | | |
|---|---|---|
| कः | कौ | के |
| कम् | कौ | कान् |
| केन | काभ्याम् | कैः |
| कस्मै | काभ्याम् | केभ्यः |
| कस्मात् | काभ्याम् | केभ्यः |
| कस्य | कयोः | केषाम् |
| कस्मिन् | कयोः | केषु |

## अभ्यासः – 245

✍ **यथोदाहरणं स्त्रीलिङ्गे रूपाणि लिखत—**

[ उदाहरण के अनुसार स्त्रीलिङ्ग रूप लिखें। Write the feminine forms as shown in the example. ]

**स्त्रीलिङ्गे**

उदा. **का + चित् = काचित्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | का + चित् = काचित् | के + चित् = केचित् | काः + चित् = काश्चित् |
| द्वि. | कां + चित् = काञ्चित् | ........ + = ........ | काः + चित् = काश्चित् |
| तृ. | + = | काभ्यां + चित् = काभ्याञ्चित् | काभिः + चित् = काभिश्चित् |
| च. | + = ........ | + = ........ | काभ्यः + चित् = काभ्यश्चित् |
| पं. | कस्याः + चित् = कस्याश्चित् | + = ........ | + = |
| ष. | + = ........ | कयोः + चित् = कयोश्चित् | कासां + चित् = कासाञ्चित् |
| स. | कस्यां + चित् = कस्याञ्चित् | ........ + = ........ | + = |

**नपुंसकलिङ्गे**

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | किञ्चित् | केचित् | कानिचित् |
| द्विती. | किञ्चित् | केचित् | कानिचित् |

**तृतीयादिषु पुंलिङ्गवत् एव रूपाणि भवन्ति।**

**स्मरत**

कान् + चित् = कांश्चित्। कस्मिन् + चित् = कस्मिंश्चित्।

'क' शब्दः 'विशेषणम्'। अतः कश्चित् इत्यादयः अपि 'विशेषणानि' एव।

## अभ्यासः — 246

✍ **रिक्तं स्थानं पूरयत—**

[ रिक्तस्थान पूरा करें। Fill in the blanks. ]

उदा. कस्याः + चित् = **कस्याश्चित्**

| | | | |
|---|---|---|---|
| 1. | काः + चित् = | 3. | काभ्यः + चित् = |
| 2. | + चित् = कयोश्चित् | 4. | .................. + चित् = काभिश्चित् |

## अभ्यासः — 247

✍ **अधोनिर्दिष्टानां विशेष्याणाम् अनुगुणं 'किम्' शब्दस्य 'चित्' युक्तं समुचितं रूपं लिखत—**

[ अधोनिर्दिष्ट विशेष्यों के अनुरूप 'किम्' शब्द के 'चित्' युक्त रूप लिखें। Write the forms derived from the word '*kim*' with the addition of *cit* according to the qualificands given below. ]

उदा. ......**कयाचित्**...... बालिकया।

| | | | |
|---|---|---|---|
| 1. | छात्रः। | 16. | नगरात्। |
| 2. | महिलाम्। | 17. | गायिकानाम्। |
| 3. | यानेन। | 18. | अभिनेतृणाम्। |
| 4. | वृद्धम्। | 19. | लेखिका। |
| 5. | भिक्षुकाय। | 20. | स्थानम्। |
| 6. | भगिन्याः। | 21. | कारणेन। |
| 7. | देशात्। | 22. | उदाहरणानि। |
| 8. | कवेः। | 23. | प्रमाणेषु। |
| 9. | वृक्षाभ्याम्। | 24. | पुष्करिण्याम्। |
| 10. | नद्योः। | 25. | शाटिकाः। |
| 11. | पत्रिकायाम्। | 26. | आतङ्कवादिनः। |
| 12. | कथासु। | 27. | सैनिकैः। |
| 13. | ग्रामे। | 28. | सेवकेभ्यः। |
| 14. | अरण्ययोः। | 29. | पुस्तकानाम्। |
| 15. | मन्दिरेषु। | 30. | भाषासु। |

## अभ्यासः — 248

✍ **विशेष्यानुसारं चित्परस्य 'किम्'-शब्दस्य समुचितरूपेण रिक्तस्थानानि पूरयत–**

[ विशेष्य के अनुसार 'चित्'-अन्त वाले 'किम्' के समुचित रूप से रिक्तस्थान भरें। Fill in the blanks with the appropriate form of the word '*kim*' on the basis of the qualificand by adding the indeclinable '*cit*'.]

**उदा.** **कञ्चित्** छात्रम् आह्वय।

1. ........ यानेन गन्तव्यम्।
2. ........ दरिद्राय ददातु।
3. ........ अरण्ये तिष्ठति।
4. ........ मित्रेण सह अक्रीडत्।
5. ........ जनैः कोलाहलः कृतः।
6. ........ अध्यापकः व्याख्यानं करोति।
7. ........ कवेः ग्रन्थः एव।
8. ........ नगरे पुत्रः पठिष्यति।
9. ........ मन्दिरेषु मूर्तयः न सन्ति।
10. ........ विद्यालयेषु शिक्षकाः संस्कृतं वदन्ति।
11. ........ यानानि तत्र गच्छन्ति।
12. ........ मित्रयोः सङ्केतं ददातु।
13. ........ पत्राणि अहम् अत्र स्थापितवान्।
14. ........ फले स्यूते आस्ताम्।
15. ........ यात्रिणः समुद्रतीरे अभ्रमन्।
16. ........ वैज्ञानिकौ विज्ञानागारे स्तः।
17. ........ सेवकौ स्वामी दण्डितवान्।
18. ........ दुष्टजनान् आरक्षकाः निगृहीतवन्तः।
19. ........ असहायेभ्यः सर्वकारः अनुदानं दास्यति।
20. ........ प्रमाणेन एतत् सुनिश्चितम्।
21. ........ नर्तकी रङ्गमञ्चे नृत्यति।
22. ........ गायिके गीतं गायतः।
23. ........ भगिन्यः नद्याः जलम् आनयन्ति।
24. ........ पत्रिकां पठतु भवान्।
25. ........ शाटिके आपणात् क्रेष्यामः।
26. ........ सञ्चिकाः कार्यालये स्थापिताः।
27. ........ महिलया गृहकार्यं सम्पाद्यते।
28. ........ छात्राभ्यां सुन्दरं चित्रं कृतम्।
29. ........ स्त्रीभिः वस्त्रं प्रदत्तम्।
30. ........ पत्न्यै राजा फलं दत्तवान्।
31. ........ सेविकाभ्यां पुरस्कारौ दास्येते।
32. ........ लेखिकाभ्यः मानपत्राणि प्रदास्यन्ते।
33. ........ कथायाः सारांशं लिख।
34. ........ लताभ्यः कोमलपत्राणि आनय।
35. ........ पत्रिकायां मम लेखः प्रकाशितः।
36. ........ पाठशालासु छात्राः न सन्ति।
37. ........ नद्योः नौवाणिज्यं प्रचलतु।
38. ........ बालिकानां स्वभावः कठोरः।
39. ........ पुत्र्यां मातुः अधिकः स्नेहः भवति।
40. ........ ध्वनिमुद्रिकासु वेदमन्त्राः भवन्तु।

### (ख) अधोनिर्दिष्टानि वाक्यानि अवधानपूर्वकं पठत–

[ अधोनिर्दिष्ट वाक्यों को ध्यान से पढ़ें। Read the following sentences carefully. ]

**कुत्रचित्** - अहं ग्रीष्मावकाशे **कुत्रचित्** गमिष्यामि। मम पुत्रः **कुत्रचित्** पठिष्यति।

**कदाचित्** - किं भवान् **कदाचित्** रथयात्रां दृष्टवान् ? अध्यापकः **कदाचित्** छात्राय अक्रुध्यत्।

**कुतश्चित्** - अद्य **कुतश्चित्** दूरवाणी आगता आसीत्। एषः सुगन्धः **कुतश्चित्** समायाति।

**कथञ्चित्** - तेन **कथञ्चित्** परीक्षा उत्तीर्णा। अस्माभिः **कथञ्चित्** तत्र गन्तव्यम् एव।

**कतिचित्** - अहं **कतिचित्** वर्षाणि संस्कृतप्रचारं कृतवान्। वयं **कतिचित्** दिनानि बेङ्गलुरुनगरे स्थास्यामः।

**उपरितनवाक्येषु 'कुत्रचित्-कदाचित्' इत्यादीनि पदानि प्रयुक्तानि। एतानि अव्ययानि। पूर्वं यथा किं-शब्देन सह 'चित्' - 'चन' - प्रयोगः दर्शितः तथैव एतैः अव्ययैः सह अपि 'चित्' 'चन' भवतः। 'कस्मिन् स्थाने' इत्यस्य इदमित्थंतया निर्देशाभावे यदा अनिश्चितनिर्देशः भवति तदा 'कुत्रचित्' इत्यस्य प्रयोगः भवति। एवमेव कस्मिन् काले इत्यस्य यदा अनिश्चितनिर्देशः तदा 'कदाचित्' इति प्रयुज्यते। एवमेव 'कुतश्चित्' 'कथञ्चित्' 'कतिचित्' इत्यादयः प्रयोगाः अपि ज्ञेयाः।**

## अभ्यासः – 249

**'कुत्रचित्, कदाचित्, कुतश्चित्, कथञ्चित्, कतिचित्' इत्येतेषु समुचितं पदं रिक्तस्थाने लिखत–**

[ कुत्रचित्, कदाचित्, कुतश्चित्, कथञ्चित्, कतिचित् - इनमें से उचित पद से रिक्तस्थान भरें। Fill in the blansk with either of the words : *kutracit, kadācit, kutaścit, kathañcit* and *katicit.* ]

| | | | |
|---|---|---|---|
| उदा. | **कतिचित्** उदाहरणानि अहं लिखामि। | 8. | भारतीयाः क्रीडकाः ______ विपक्षदलं जयेयुः। |
| 1. | ______ माता मातुलगृहं यास्यति। | 9. | वैदेशिकाः ........ वर्षाणि भारते शासनं कृतवन्तः। |
| 2. | पुत्रस्य कृते ______ क्रीडनकं क्रेतव्यम्। | 10. | अहं ______ प्रेक्षालयं न गतवान्। |
| 3. | ______ वयं देहलीं गमिष्यामः। | 11. | वृद्धः ______ कृषिक्षेत्रं गच्छति। |
| 4. | ______ दिनानि ग्रामे यापयितव्यानि। | 12. | महिलाः ______ कोपशीलाः भवन्ति। |
| 5. | ______ अद्य वृष्टिः भवेत्। | 13. | छात्राः ______ परीक्षायाम् उत्तीर्णाः भवन्ति। |
| 6. | ______ भवन्तः एतत् कार्यं साधयन्तु। | 14. | भवन्तः ______ मुम्बईनगरीं गतवन्तः वा ? |
| 7. | ह्यः ______ महान् कोलाहलः अभवत्। | 15. | सर्वे ______ राष्ट्रकार्यं कुर्युः। |

| | | | | | |
|---|---|---|---|---|---|
| 16. | भ्रातरः | तिष्ठन्ति। | 18. | नगरे | सभा भवेत्। |
| 17. | नौकाः | नदीं तरन्ति। | 19. | भवन्तः | मासान् संस्कृतं पठन्तु। |

## अभ्यासः — 250

✍ **कोष्ठक-स्थितानां दोषयुक्तरूपाणां स्थाने शुद्धरूपाणि लिखत—**

[ कोष्ठकस्थित दोषयुक्त रूपों के स्थान में शुद्धरूप लिखें। Write the correct forms of the words given in the bracket. ]

उदा. (कयाचित्) **केनचित्** बालकेन सह अहम् आगच्छम्।
1. (केनचित्) ........ बालिकया उत्तराणि लिखितानि।
2. (काचित्) ........ यात्री त्रिचक्रिकया अगच्छत्।
3. (कस्मैचित्) ........ वृद्धायै भोजनं दातव्यम्।
4. (कस्मिंश्चित्) ........ नद्यां तीर्थयात्रिणः स्नान्ति।
5. (कस्याश्चित्) ........ अभिनेतुः अभिनयं पश्यामः।
6. (काश्चित्) ........ पुस्तकं पठतु भवती।
7. (काञ्चित्) ........ छात्रम् अत्र आह्वयतु।
8. (कासुचित्) ........ अरण्येषु चन्दनतरवः भवन्ति।
9. (कैश्चित्) ........ छात्राभिः नृत्यं प्रदर्श्यते।
10. (केषुचित्) ........ कलाशालासु संस्कृतं पाठ्यते।
11. (कश्चित्) ........ कान्ता गृहे वसति।
12. (केचित्) ........ गायिकाः गीतं गास्यन्ति।
13. (कौचित्) ........ नायिके अभिनयं करिष्यतः।
14. (काश्चित्) ........ संस्कृतपत्रिकाः भवन्तः पठन्तु।
15. (कस्मैचित्) ........ सेविकायै पुरस्काराः दातव्याः।
16. (कस्माच्चित्) ........ लतायाः पुष्पाणि आनय।
17. (कस्यैचित्) ........ कथायाः सारं वदतु।
18. (कस्याश्चित्) ........ स्थानात् वस्तूनि आनीतवान्।
19. (काभ्यश्चित्) ........ प्रमाणैः एतत् सिद्धम्।
20. (केचित्) ........ विद्यार्थिन्यः संस्कृतं वदन्ति।

## अभ्यासः — 251

**मञ्जूषातः पदानि गृहीत्वा यथोचितं रिक्तं स्थानं पूरयत–**

[ मञ्जूषा के उचित पद से रिक्त स्थान की पूर्ति करें। Fill in the blanks with the appropriate word given in the box. ]

कश्चित् / काचित् / किञ्चित्

| | | |
|---|---|---|
| यथा | **कश्चित्**..... | बालकः आगमिष्यति। |
| 1. | ........ | वृद्धः उपदेक्ष्यति। |
| 2. | ........ | अध्यापकः पाठयति। |
| 3. | ........ | बालिका क्रीडति। |
| 4. | ........ | युवतिः नृत्यति। |
| 5. | ........ | नायिका अभिनयति। |
| 6. | ........ | फलं पतति। |
| 7. | ........ | वस्तु अस्ति। |

## अभ्यासः — 252

**मञ्जूषातः पदानि गृहीत्वा यथोचितं रिक्तं स्थानं पूरयत–**

[ मञ्जूषा के उचित पद से रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate word given in the box. ]

कश्चित् / काचित् / किञ्चित् / कौचित् / किञ्चित् / केचित् / काश्चित् / कानिचित्

| | | |
|---|---|---|
| यथा | **कश्चित्**..... | बालकः रोदिति। |
| 1. | ........ | वृद्धौ तत्र वार्तालापं कुरुतः। |
| 2. | ........ | युवकाः क्रीडाङ्गणे क्रीडन्ति। |
| 3. | ........ | लेखिका पुस्तकम् प्राप्तवती। |
| 4. | ........ | बालिके पठतः। |
| 5. | ........ | तरुण्यः भोजनालये भोजनं पचन्ति। |
| 6. | ........ | यानेन गन्तव्यम्। |
| 7. | ........ | पुस्तके अत्र स्तः। |
| 8. | ........ | पत्राणि पतितानि। |
| 9. | ........ | कार्यं करोति। |
| 10. | ........ | अतिथिः आगच्छति। |

## अभ्यासः — 253

✍ **मञ्जूषातः पदानि गृहीत्वा यथोचितं रिक्तं स्थानं पूरयत—**

[मञ्जूषा में प्रदत्त यथोचित पद से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the appropriate word given in the box.]

| |
|---|
| कश्चित् / काचित् / किञ्चित्, कौचित् / केचित् / केचित्, केचित् / काश्चित् / कानिचित् |

यथा ....**कौचित्**.... वैज्ञानिकौ एतत् निर्मितवन्तौ।

1. ............ वृद्धाः एवं ब्रुवन्ति।
2. ............ महिलाः आपणं गच्छन्ति।
3. ............ मनस्विनः एवम् उपदिशन्ति।
4. ............ सभा अद्य आयोजिता।
5. ............ विशालः कार्यक्रमः अस्ति।
6. ............ महत्यः नगर्यः सन्ति।
7. ............ भवनानि नष्टानि।
8. ............ युवत्यः चित्रालयं गन्तुम् इच्छन्ति।
9. ............ मद्यपाः रथ्यासु पतिताः सन्ति।
10. ............ सर्वकारीया योजना अस्ति।
11. ............ बालिके माम् उक्तवत्यौ।
12. ............ बालिके क्रीडितवत्यौ।
13. ............ युवकौ पुरस्कारं प्राप्तवन्तौ।
14. ............ विद्वान् एवं न मन्यते।
15. ............ विदुष्यः संस्कृतग्रन्थान् विरचितवत्यः।

## अभ्यासः — 254

✍ **किम्-शब्दस्य विशेष्यानुगुणेन विभक्तिरूपेण सह 'चित्' इति संयोज्य रिक्तस्थानं पूरयत—**

[ विशेष्य के अनुसार 'किम्' शब्द के विभक्ति रूप के साथ 'चित्' जोड़कर रिक्तस्थान की पूर्ति करें। **Fill in the blanks with the appropriate form of *kim* with the addition of *cit* conducive to the qualificands.** ]

**पुं.**

1. ........ वैज्ञानिकाः भवन्ति।
2. ........ कविः भवति।
3. ........ गायकौ भवतः।
4. ........ छात्रम् अध्यापकः पृच्छति।
5. ........ बालकौ जननी आह्वयति।
6. ........ नगरात् सः आगतवान्।
7. ........ अरण्ये एकः सिंहः आसीत्।
8. ........ व्याजेन अहं काव्यं पठामि।
9. ........ भिक्षुकाय एतत् वस्त्रं देहि।
10. ........ राज्ञः भवनम् एतत्।
11. ........ गृहेषु इदानीम् अपि संस्कृतेन एव व्यवह्रियते।
12. ........ युवकाभ्याम् एषः भारः वोढुं शक्यते।
13. ........ मन्दिरेषु त्रयाणां महतां देवानां मूर्तयः सन्ति।
14. ........ द्वयोः स्थानयोः कृते यात्रापत्रं स्वीकरोतु।
15. ........ दिवसेषु मम सामर्थ्यम् अधिकम् आसीत्।

**स्त्री.**

1. ........ बाला आगत्य माम् उक्तवती।
2. ........ नूतननायिकायाः अभिनयं पश्यामः।
3. ........ त्रुटेः संशोधनं न जातम्।
4. ........ लेखिकायाः लेखेषु बालक्रीडाः एव सन्ति।
5. ........ नगर्याः प्रभावः त्वयि नास्ति।
6. ........ नद्यां मकराः सन्ति।
7. ........ कथाम् अहं श्रोतुम् इच्छामि।
8. ........ अपि भृत्यया अद्य स्वच्छता न कृता।
9. ........ अपि शाखायाः वानरः न पतति।
10. ........ विद्यार्थिन्यै अध्यापिका पुरस्कारं प्रदत्तवती।

## चित्-चन-प्रयोगाः

### कर्मायत्तं फलं पुंसाम्


पुरा जानश्रुतिः नाम **कश्चित्** राजा प्रतिवसति स्म। सः एकदा अचिन्तयत्– "सर्वाभ्यः प्रजाभ्यः अन्नदानं करिष्यामि। मम राज्ये **कस्मिंश्चित्** प्रदेशे कोऽपि बुभुक्षया पीडितः न भविष्यति। तस्मात् अहं **किञ्चन** अपूर्वं पुण्यं प्राप्स्यामि" इति। एतद् विचिन्त्य सः **कांश्चन** कर्मकरान् आहूय आदिष्टवान्। तदनुसारेण प्रत्यहं **काचित्** भोजन-व्यवस्था कल्पिता। सर्वे जनाः **कुतश्चित्** अपि आगत्य सानन्दं भोजनं प्राप्य सुखेन कालं यापितवन्तः।



एकदा रैक्वः नामकः **कश्चित्** ब्राह्मणः ऋषिकुमारः तेन मार्गेण शकटेन गच्छन् आसीत्। शकटस्योपरि **कानिचन** काष्ठानि आसन्। मार्गे विपुलं जनसम्मर्दं दृष्ट्वा मुनिकुमारः गमनाय अवसरम् इष्टवान्। तस्य वचनं श्रुत्वा **केचन** राजपुरुषाः तत्र समागताः। ते अपि ब्राह्मणकुमारं भोजनाय आमन्त्रितवन्तः। ते अवदन्– अस्माकं **काचित्** राजाज्ञा अस्ति यत् कोऽपि **कुतश्चित्** आयाति चेत् भोजनं कृत्वा एव इतः गच्छतु। अन्यथा राजा अस्मभ्यं कोपिष्यति।

एतत् श्रुत्वा ऋषिकुमारः प्रत्यवदत्– "अहं कथमपि भोजनं न करिष्यामि। भवतां राजा पुण्यप्राप्तये भोजनं ददाति"। राजपुरुषाः अवदन्– "भवान् **कश्चित्** ब्राह्मणकुमारः इति प्रतिभाति। दानग्रहणं भवतां कर्तव्यम्"। रैक्वः अवदत्– भवतां राजा प्रजानां नाशं करोति। प्रजानां देशस्य च रक्षणं राज्ञः परमं

कर्तव्यम् । अहं तरुणः अस्मि । कार्यं कृत्वा अन्नं प्राप्स्यामि । अतः श्रमं विना **कस्मिंश्चित्** अपि देशे भोजनं न करिष्यामि । राजा भोजनव्यवस्थां कृत्वा जनान् अलसान् कर्मविमुखान् च करोति । मम वचनं राज्ञे श्रावयन्तु– "अस्मिन् राज्ये ये केचन वृद्धाः, असहायाः, असमर्थाः, अन्धाः सन्ति ते एव अत्र भोजनं कुर्वन्तु, न तु सर्वे । अहं तु कथमपि अन्नग्रहणं नैव करिष्यामि" इति उक्त्वा ऋषिकुमारः **कञ्चित्** प्रदेशं निरगच्छत् ।



एतत् वृत्तं श्रुत्वा राज्ञः मोहः नष्टः । **कानिचन** रत्नानि **कतिचन** मालाः च गृहीत्वा राजा स्वयम् एव मुनिकुमारस्य समीपं गतवान् । तं प्रणम्य शिष्यत्वेन ज्ञानार्जनम् अकरोत् ।

◆◆◆

## अभ्यासः — 255

**1. यथोचितं रिक्तस्थानानि पूरयत–**

[ यथोचित रिक्तस्थान की पूर्ति करें। Fill in the blanks with appropriate word. ]

(i) ______ राजा। (कश्चित्, काचित्, किञ्चित्)

(ii) ______ कर्मकरान्। (कानिचन, काश्चन, कांश्चन)

(iii) ______ काष्ठानि। (केचन, कानिचन, काचन)

(iv) ______ वृद्धः। (कानिचन, कश्चन, काचन)

(v) ______ मालाः। (कानिचन, केचन, काश्चन)

(vi) ______ प्रदेशे। (कस्मिंश्चित्, केनचित्, कस्यचित्)

(vii) ______ मार्गेण। (कयाचित्, केनचित्, कस्यचित्)

(viii) ______ व्यवस्थाम्। (कञ्चित्, काञ्चित्, कश्चित्)

(ix) ______ मालाः। (कश्चन, काचन, कतिचन)

(x) ______ ब्राह्मणाय। (कस्मैचित्, कस्यैचित्, केभ्यश्चित्)

**2. रिक्तस्थानं पूरयत–**

[ रिक्त स्थान की पूर्ति करें। Fill in the blanks. ]

(i) कः + चित् ______ । (ii) किम् + चित् ______

(iii) कस्य + चित् ______ । (iv) कस्याम् + चित् ______

(v) काम् + चित् ______ । (vi) काः + चित् ______

(vii) कान् + चित् ______ । (viii) कस्याः + चित् ______

(ix) कस्मिन् + चित् ______ । (x) केषु + चित् ______

**सुभाषितेषु चित्-चन-प्रयोगाः**

# सुभाषितानि

न कश्चित् कस्यचिद् मित्रं न कश्चित् कस्यचिद् रिपुः ।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा ॥

केचिद् अज्ञानतो नष्टाः केचित् नष्टाः प्रमादतः ।
केचित् ज्ञानावलेपेन केचित् नष्टैस्तु नाशिताः ॥

केचित् प्राञ्जलमिच्छन्ति केचित् वक्रं वचो बुधाः ।
केचित् कथां रसस्फीताम् अतः सर्वं विधीयते ॥

केचन वितरन्ति धनं केऽपि तु तत्सार्धमप्यसुभिः ।
आद्या वदान्यकीर्तिं हन्त लभन्ते परे कदर्यत्वम् ॥

द्विषद्भिः शत्रुभिः कश्चित् कदाचित् पीड्यते न वा ।
इन्द्रियैर्बाध्यते सर्वः सर्वत्र च सदैव च ॥

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवम्
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित् किञ्चिद् बुधजनसकाशादवगतम्
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥

◆◆◆

## कथायां चित्-चन-प्रयोगाः

# पतञ्जलिं प्राञ्जलिरानतोऽस्मि

पूर्वम् अस्माकं देशे पतञ्जलिनामा कश्चन वैयाकरणः आसीत् । सः विश्वविश्रुतः भाषाविज्ञानी आसीत् । तेन महाभाष्यनामकः कश्चन अपूर्वः व्याकरणग्रन्थः, कश्चन योगग्रन्थः, कश्चन आयुर्वेदग्रन्थः अपि लिखितः । अस्माकं परम्परायां 'त्रिमुनि-व्याकरणम्' इति या प्रसिद्धिः वर्तते तत्र पतञ्जलिः काञ्चित् विशिष्टां भूमिकां निर्वहति । पतञ्जलेः नामकरणविषये काचित् किंवदन्ती अपि श्रूयते । सः शेषनागस्य अवतारः आसीत् इति काचित् जनश्रुतिः वर्तते ।



एकदा कश्चित् मुनिः कस्मिंश्चित् तडागे स्नानरतः आसीत् । स्नान-समये कश्चित् क्षुद्रः सर्पः तस्य अञ्जलौ अपतत् । किञ्चिद् भीतः मुनिवरः अपृच्छत्– 'कोर्भवान्' इति । सर्पः अवदत्– 'सपोऽहम्' । तत् श्रुत्वा मुनिवरः पुनः अपृच्छत्– 'रेफः क्व गतः' इति । सर्पः उक्तवान्– 'त्वया अपहृत' इति । मुनिवरः स्वत्रुटिं ज्ञात्वा लज्जितः अभवत् । सः ज्ञातवान् यत् अवश्यम् अयं कश्चन महापुरुषः विद्वान् च वर्तते । पतञ्जलेः जीवन-वृन्तान्त-विषये अन्याः अपि काश्चन किंवदन्त्यः सन्ति । पतञ्जलेः व्याकरण-महाभाष्यम् आकरग्रन्थः वर्तते । तस्य योगविषयकः अपि विलक्षणग्रन्थः वर्तते । यः कश्चन महाभाष्यं पठति स उत्कृष्टः वैयाकरणः भवति । वस्तुतः पतञ्जलेः व्याकरण-विषये यावान् अधिकारः आसीत् तावान् अधिकारः योगे आयुर्वेदे अपि आसीत् । अस्मिन् प्रसङ्गे कश्चन श्लोकः अपि प्रसिद्धः अस्ति–

योगेन चित्तस्य पदेन वाचां
मलं शरीरस्य च वैद्यकेन ।
योऽपाकरोत् तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

◆◆◆

# पञ्चमः स्तबकः

## 5.3 तृतीयः पाठः

## [ सङ्ख्याः ]

प्रथमा विभक्तिः
(त्रिषु लिङ्गेषु)

**अधोनिर्दिष्टानि वाक्यानि पठत–**
[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

पुं. | स्त्री. | नपुं.



**एकः** बालकः क्रीडति।




**एका** बालिका क्रीडति।




**एकं** फलं पतति।



**द्वौ** बालकौ क्रीडतः।




**द्वे** बालिके क्रीडतः।




**द्वे** फले पततः।



**त्रयः** बालकाः क्रीडन्ति।



**तिस्रः** बालिकाः क्रीडन्ति।




**त्रीणि** फलानि पतन्ति।

**पुं.**



**चत्वारः** पुरुषाः गच्छन्ति।



**पञ्च** आसन्दाः सन्ति।



**षट्** वानराः कूर्दन्ते।



**सप्त** सैनिकाः सन्ति।

**स्त्री.**




**चतस्रः** बालिकाः क्रीडन्ति।



**पञ्च** नर्तक्यः नृत्यन्ति।




**षट्** मधुमक्षिकाः सन्ति।



**सप्त** बालिकाः लिखन्ति।

**नपुं.**




**चत्वारि** यानानि गच्छन्ति।



**पञ्च** पुष्पाणि सन्ति।



**षट्** मन्दिराणि निर्मितानि।




**सप्त** पुस्तकानि सन्ति।


**पुं.** | **स्त्री.** | **नपुं.**



**अष्ट** छात्राः गच्छन्ति ।



**अष्ट** बालिकाः क्रीडन्ति ।




**अष्ट** फलकानि सन्ति ।




**नव** चिकित्सकाः सन्ति ।




**नव** बालिकाः गच्छन्ति ।




**नव** पत्राणि सन्ति ।



**दश** वृक्षाः सन्ति ।



**दश** रज्जवः सन्ति ।




**दश** चक्राणि सन्ति ।



**एकादश** काकाः सन्ति ।



**एकादश** नायिकाः सन्ति ।




**एकादश** पुष्पाणि सन्ति ।


**पुं.** | **स्त्री.** | **नपुं.**




**द्वादश** ऋषयः सन्ति।




**द्वादश** कुञ्चिकाः सन्ति।




**द्वादश** उपनेत्राणि सन्ति।




**त्रयोदश** कण्डोलाः निर्मिताः।




**त्रयोदश** कूप्यः सन्ति।




**त्रयोदश** पत्राणि सन्ति।




**चतुर्दश** कमण्डलवः सन्ति।




**चतुर्दश** छुरिकाः सन्ति।



**चतुर्दश** द्वाराणि सन्ति।



**पञ्चदश** स्यूताः सन्ति।



**पञ्चदश** भित्तयः सन्ति।




**पञ्चदश** पर्णानि पतन्ति।


## पुं.




**षोडश** दन्तकूर्चाः सन्ति।



**सप्तदश** चषकाः सन्ति।




**अष्टादश** चमसाः दृश्यन्ते।




**नवदश** घटाः सन्ति।


## स्त्री.




**षोडश** घट्यः सन्ति।



**सप्तदश** मयूर्यः नृत्यन्ति।



**अष्टादश** अङ्गन्यः सन्ति।




**नवदश** लेखन्यः दृश्यन्ते।


## नपुं.



**षोडश** पूजापात्राणि सन्ति।



**सप्तदश** पुस्तकानि सन्ति।




**अष्टादश** अस्थीनि सन्ति।




**नवदश** पुष्पाणि सन्ति।

**पुं.**



**विंशतिः** दण्डाः सन्ति।

**स्त्री.**



**विंशतिः** अङ्गुल्यः सन्ति।

**नपुं.**



**विंशतिः** अक्षीणि सन्ति।

**अवधेयम्**

पञ्चतः आरभ्य शतं यावत् ये सङ्ख्याशब्दाः तेषां त्रिषु लिङ्गेषु समानरूपाणि भवन्ति।

विवरणम्

संस्कृतभाषायां सङ्ख्येयवाचिका सङ्ख्या अपि विशेषणं भवति। अतः ताः सङ्ख्याः विशेष्यानुगुणं रूपं प्राप्नुवन्ति। यथा एकः बालः, एका बाला, एकम् पुष्पम्। एकादिशब्दानां त्रिषु लिङ्गेषु रूपाणि पठत–

**एक-शब्दः**

| | पुं. | स्त्री. | नपुं. |
|---|---|---|---|
| प्र. | एकः | एका | एकम् |
| द्विती. | एकम् | एकाम् | एकम् |
| तृ. | एकेन | एकया | |
| च. | एकस्मै | एकस्यै | पुंलिङ्गवत् |
| प. | एकस्मात् | एकस्याः | |
| ष. | एकस्य | एकस्याः | |
| स. | एकस्मिन् | एकस्याम् | |

**द्वि-शब्दः**

| | पुं. | स्त्री. | नपुं. |
|---|---|---|---|
| प्र. | द्वौ | द्वे | |
| द्विती. | द्वौ | द्वे | |
| तृ. | द्वाभ्याम् | | |
| च. | द्वाभ्याम् | पुंलिङ्गवत् | स्त्रीलिङ्गवत् |
| प. | द्वाभ्याम् | | |
| ष. | द्वयोः | | |
| स. | द्वयोः | | |

**त्रि-शब्दः**

| | पुं. | स्त्री. | नपुं. |
|---|---|---|---|
| प्र. | त्रयः | तिस्रः | त्रीणि |
| द्विती. | त्रीन् | तिस्रः | त्रीणि |
| तृ. | त्रिभिः | तिसृभिः | पुंलिङ्गवत् |
| च. | त्रिभ्यः | तिसृभ्यः | |
| प. | त्रिभ्यः | तिसृभ्यः | |
| ष. | त्रयाणां | तिसृणाम् | |
| स. | त्रिषु | तिसृषु | |

**चतुर्-शब्दः**

| | पुं. | स्त्री. | नपुं. |
|---|---|---|---|
| प्र. | चत्वारः | चतस्रः | चत्वारि |
| द्विती. | चतुरः | चतस्रः | चत्वारि |
| तृ. | चतुर्भिः | चतसृभिः | पुंलिङ्गवत् |
| च. | चतुर्भ्यः | चतसृभ्यः | |
| प. | चतुर्भ्यः | चतसृभ्यः | |
| ष. | चतुर्णाम् | चतसृणाम् | |
| स. | चतुर्षु | चतसृषु | |

**पञ्चन्-शब्दः**

| | पुं. | स्त्री. | नपुं. |
|---|---|---|---|
| प्र. | पञ्च | पुंलिङ्गवत् | पुंलिङ्गवत् |
| द्विती. | पञ्च | | |
| तृ. | पञ्चभिः | | |
| चतु. | पञ्चभ्यः | | |
| प. | पञ्चभ्यः | | |
| ष. | पञ्चानाम् | | |
| स. | पञ्चसु | | |

**षष्-शब्दः**

| | पुं. | स्त्री. | नपुं. |
|---|---|---|---|
| प्र. | षट् | पुंलिङ्गवत् | पुंलिङ्गवत् |
| द्विती. | षट् | | |
| तृ. | षड्भिः | | |
| चतु. | षड्भ्यः | | |
| प. | षड्भ्यः | | |
| ष. | षण्णाम् | | |
| स. | षट्सु | | |

**अवधेयम्**

'सप्तन्-अष्टन्-नवन्-दशन्-एकादशन्-द्वादशन्-त्रयोदशन्-चतुर्दशन्-पञ्चदशन्-षोडशन्-सप्तदशन्-अष्टादशन्-नवदशन्' इत्येतेषां नकारान्त-शब्दानां रूपाणि 'पञ्चन्' शब्दवत् केवलं बहुवचने भवन्तिं ।

**विंशति-शब्दः**

| स्त्री. |
|---|
| विंशतिः |
| विंशतिम् |
| विंशत्या |
| विंशत्यै/विंशतये |
| विंशत्याः/विंशतेः |
| विंशत्याः/विंशतेः |
| विंशत्याम्/विंशतौ |

**त्रिंशत्-शब्दः**

| स्त्री. |
|---|
| त्रिंशत् |
| त्रिंशतम् |
| त्रिंशता |
| त्रिंशते |
| त्रिंशतः |
| त्रिंशतः |
| त्रिंशति |

**अवधेयम्**

एकोनविंशतितः नवविंशतिं यावत् सङ्ख्येयवाचकानां सङ्ख्याशब्दानां रूपाणि विंशतिवत् एकवचने एव।

एकोनत्रिंशत्तः नवपञ्चाशतं यावत् सङ्ख्येयवाचकानां सङ्ख्याशब्दानां रूपाणि त्रिंशत्-शब्दवत् एकवचने।

**षष्टि-शब्दः**

| स्त्री. |
|---|
| षष्टिः |
| षष्टिम् |
| षष्ट्या |
| षष्ट्यै/षष्टये |
| षष्ट्याः/षष्टेः |
| षष्ट्याः/षष्टेः |
| षष्ट्यां/षष्टौ |

**सप्तति-शब्दः**

| स्त्री. |
|---|
| सप्ततिः |
| सप्ततिम् |
| सप्तत्या |
| सप्तत्यै/सप्ततये |
| सप्तत्याः/सप्ततेः |
| सप्तत्याः/सप्ततेः |
| सप्तत्याम्/सप्ततौ |

**शत-शब्दः**

| नपुं. |
|---|
| शतम् |
| शतम् |
| शतेन |
| शताय |
| शतात् |
| शतस्य |
| शते |

**अवधेयम्**

एकोनषष्टितः नवषष्टिं यावत् सङ्ख्येयवाचकानां सङ्ख्याशब्दानां रूपाणि षष्टिवत् एकवचने।

एकोनसप्ततितः नवनवतिं यावत् सङ्ख्येयवाचकानां सङ्ख्याशब्दानां रूपाणि सप्ततिवत् एकवचने।

सङ्ख्येयवाचकानां शतसहस्रादि-सङ्ख्याशब्दानां रूपाणि एकवचने भवन्ति।

## अभ्यासः — 256

✍ **'एक'-शब्दस्य विविधानि रूपाणि विशेष्यानुगुणं लिखत–**

['एक' शब्द का विविध रूप विशेष्य के अनुसार लिखें। Write various forms of the word '*eka*' according to the qualificands. ]

उदा. **एकस्मै** बालकाय पारितोषिकाणि देहि।

1. ........ बालकः धावति।
2. ........ बालिका खादति।
3. ........ छात्रेण पुरस्कारः जितः।
4. ........ महिलया पूजा कृता।
5. ........ देवात् वरम् इच्छति।
6. ........ देव्याः पुष्पं पतति।
7. ........ फलं पतति।
8. ........ पुष्पं चिनोति।
9. ........ बालिकायै मोदकं देहि।
10. ........ स्वादु न भुञ्जीत।
11. ........ च अर्थं न चिन्तयेत्।
12. ........ सुपुत्रेण कुलम् उज्ज्वलं भवति।
13. ........ वह्निना वनं दह्यते।
14. ........ लतायाः पुष्पम् आनय।
15. ........ वृक्षस्य फलं नयतु।
16. ........ मार्गे गच्छ।
17. ........ उत्पीठिकायां स्थापय।
18. ........ आसन्दम् आनय।
19. ........ दिनस्य कथा अस्ति।
20. ........ रात्रेः घटनां वदामि।

**स्मरत**

⇨ एकः स्वादु न भुञ्जीत।

⇨ एकश्चार्थं न चिन्तयेत्।

⇨ एकेनैव सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद् वनं सर्वं सुपुत्रेण कुलं यथा॥

## अभ्यासः — 257

**द्वि-शब्दस्य रूपाणि**

**विशेष्यानुगुणं द्विशब्दस्य रूपैः रिक्तस्थानानि पूरयत—**

[ विशेष्य के अनुसार 'द्वि' शब्द के रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the forms of the word '*dvi*' according to the qualificands. ]

उदा. द्वाभ्यां बालिकाभ्यां सह गतवान्।
1. रूप्यकाभ्यां क्रीतम् एतत् पुस्तकम्।
2. बालकौ आगतौ।
3. गायिके आगते।
4. पत्रे पततः।
5. वृक्षौ शोभेते।
6. छात्राभ्यां पुस्तकं देहि।
7. महिलाभ्यां शाटिकां देहि।
8. वृक्षयोः पत्राणि पतन्ति।
9. लतयोः पुष्पाणि विकसन्ति।
10. आम्रवृक्षयोः फलानि मधुराणि सन्ति।
11. भवनयोः चित्राणि।
12. उद्यानयोः जनसम्मर्दः अस्ति।
13. जनयोः विवादे तृतीयस्य लाभः भवति।
14. पुत्रीभ्यां माता अभिनन्दिता।
15. पुत्राभ्यां यानम् आरूढम्।

## अभ्यासः — 258

**त्रि-शब्दस्य रूपाणि**

**विशेष्यानुगुणं त्रिशब्दस्य रूपैः रिक्तस्थानानि पूरयत—**

[ विशेष्य के अनुसार 'त्रि' शब्द के रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the forms of the word '*tri*' according to the qualificands. ]

उदा. ......त्रयः...... बालकाः क्रीडाङ्गणे क्रीडन्ति।
1. महिलाः नद्याः आगच्छन्ति।

2. पुस्तकानि जीर्णानि सन्ति।
3. छात्रान् पाठय।
4. अध्यापिकाः आमन्त्रयतु।
5. वाहनानि पश्य।
6. गुरून् नमत।
7. छात्रेभ्यः सुधाखण्डं देहि।
8. मित्रेभ्यः वार्ता शृणु।
9. गायकेभ्यः गीतं शृणुत।
10. मातृभ्यः रामः आशीर्वादं गृह्णाति।
11. श्रमिकाणाम् आवश्यकता अस्ति।
12. नर्तकीनां नृत्यं पश्य।
13. मित्राणां नाम किम् ?
14. पुत्रेषु पितुः विश्वासः अस्ति।
15. पुत्रीषु माता स्निह्यति।

## अभ्यासः — 259

'चतुर्'-शब्दस्य रूपाणि

**विशेष्यानुगुणं चतुर्-शब्दस्य रूपाणि रिक्तस्थाने लिखत-**

[ विशेष्य के अनुसार 'चतुर्' शब्द के रूप रिक्तस्थान में लिखें। Write the forms of the word '*catur*' in the blank space as per the qualificands. ]

उदा. ....**चत्वारः**.... वेदाः अध्येतव्याः।
1. गृहिण्यः पाकं कुर्वन्ति।
2. स्थानानि रिक्तानि सन्ति।
3. ग्रन्थान् पठत।
4. बालिकाः आह्वय।
5. तालफलानि आस्वादय।
6. पुरुषैः कार्यं सम्पादितम्।
7. उपचारिकाभिः रुग्णः परीक्षितः।
8. कर्मकरेभ्यः वेतनं देहि।
9. गायिकाभ्यः पुरस्कारान् देहि।

10. नगरेभ्यः जनाः आगताः।
11. नदीभ्यः जलम् आनीतम्।
12. कर्मकराणाम् आवश्यकता अस्ति।
13. युवतीनां विवाहः सञ्जातः।
14. शास्त्रेषु तस्य समाना गतिः।
15. नदीषु मकराः सन्ति।

**स्मरत**

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षण-च्छेदन-ताप-ताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा।।

## अभ्यासः — 260

**पञ्चादि-शब्दानां रूपाणि**

**कोष्ठकस्थ-सङ्ख्यया सूचितानां पञ्चादि-शब्दानां रूपाणि विशेष्यानुगुणं रिक्तस्थाने पूरयत—**

[कोष्ठकस्थ सङ्ख्या के विशेष्यानुगुण रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the declension of the number given in the bracket according to the qualificands.]

उदा. **पञ्चभ्यः** बालकेभ्यः पारितोषिकं ददाति। (5)
1. ........ रसानां नामानि वदत। (9)
2. ........ जनानां कार्यम् एकं यन्त्रं करोति। (10)
3. ........ बालानां खाद्यं द्वौ एव खादितवन्तौ। (7)
4. ........ मातृणां पुत्रः कार्तिकेयः अस्ति। (6)
5. ........ द्वीपैः विशिष्टा इयं पृथिवी वर्तते। (7)
5. ........ वसूनां विषये उल्लेखः पुराणेषु दृश्यते। (8)
7. ........ रसैः काव्यं रुचिरं भवति। (9)
8. ........ इन्द्रियेषु मनः एकादशं भवति। (10)
9. ........ वर्षेभ्यः अयं कार्यं करोति। (6)
10. ........ बालिकाः परीक्षायाम् उत्तीर्णाः। (12)

## अभ्यासः — 261

**सङ्ख्याशब्दानां रूपाणि**

**कोष्ठके सूचिताभिः सङ्ख्याभिः रिक्तस्थानानि पूरयत–**
[कोष्ठक में सूचित सङ्ख्या के रूप से रिक्त स्थान की पूर्ति करें। Fill in the blanks with the declension of the number given in the bracket.]

उदा. ....**दशसु**.... विद्यालयेषु संस्कृतपाठः न प्रचलति। (10)

1. छात्राः विद्यालयं न गच्छन्ति। (7)
2. पाण्डुपुत्रेषु युधिष्ठिरः ज्येष्ठः। (5)
3. महाद्वीपेषु एशिया-महाद्वीपं बृहत्तमम्। (7)
4. ग्रहेषु पृथिवी अन्यतमः ग्रहः। (9)
5. दशरथस्य राज्ञ्यः आसन्। (3)
6. मुनिभ्यः नमः। (3)
7. वेदानां रचयितारः ऋषयः एव। (4)
8. पुराणानां रचयिता व्यासः। (18)
9. दिग्भ्यः खगाः आगच्छन्ति। (4)
10. जनाभ्यां व्याघ्रः मारितः। (2)

**अवधेयम्**

- ⇨ एकतः चतुःपर्यन्तं सङ्ख्याशब्दानां लिङ्गभेदात् रूपभेदः
- ⇨ पञ्चतः नवपर्यन्तं सङ्ख्याशब्दानां त्रिषु लिङ्गेषु समानं रूपम्
- ⇨ एकोनविंशतितः अनन्तरं लिङ्गवचनादिविषये विशेषनियमाः सन्ति। ते अत्र न निरूपिताः।

**कति / कियत् शब्दयोः प्रयोगाः**

## अधोलिखितानि वाक्यानि पठत—

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

विद्यालये **कति** छात्राः पठन्ति ?

**कतिभ्यः** जनेभ्यः एतद् दातव्यम् ?

भवनस्य विशालत्वं **कियत्** ?

वृक्षस्य औन्नत्यं **कियत्** ?

## विवरणम्

☞ उपरिनिर्दिष्टवाक्येषु 'कति'-शब्दः 'कियत्'-शब्दः च प्रयुक्तौ स्तः। यत्र सङ्ख्या पृच्छ्यते उत्तरं च अपेक्ष्यते तत्र कति-शब्दः प्रयुज्यते। उदा.- "सभायाम् अत्र कति जनाः सन्ति ?" अत्र जनाः गणना-साध्याः। अतः 'कति'-शब्दस्य प्रयोगः कृतः। यत्र परिमाणं पृच्छ्यते तत्र 'कियत्'-शब्दः प्रयुज्यते। उदा.- "पात्रे कियत् जलम् अस्ति ?" जलं न गणना-साध्यम्। अतः 'कियत्' शब्दः प्रयुक्तः।

### स्मरत

| | | | |
|---|---|---|---|
| **कति** | कितने | How many | (उत्तरं सङ्ख्यात्मकम्) |
| **कियत्** | कितना | How much | (उत्तरं परिमाणात्मकम्) |

### अवधेयम्

☞ 'कति'-शब्दः नित्यं बहुवचनान्तः। अतः यदि उत्तरम् एकवचनं द्विवचनं वा भवेत् तदापि 'कति'-शब्दयुक्तः प्रश्नः तु बहुवचने एव स्यात्। यथा—

**प्रश्नः** भवतः गृहे कति जनाः सन्ति ?

**उत्तरम्** ⇨ एकः अस्ति (एकवचने)।

⇨ द्वौ स्तः (द्विवचने)।

⇨ त्रयः सन्ति (बहुवचने)।

## कियत्-शब्दस्य रूपाणि

### पुंलिङ्गे

| | | | |
|---|---|---|---|
| प्र. | कियान् | कियन्तौ | कियन्तः |
| द्विती. | कियन्तम् | कियन्तौ | कियतः |
| तृ. | कियता | कियद्भ्याम् | कियद्भिः |
| च. | कियते | कियद्भ्याम् | कियद्भ्यः |
| पं. | कियतः | कियद्भ्याम् | कियद्भ्यः |
| ष. | कियतः | कियतोः | कियताम् |
| स. | कियति | कियतोः | कियत्सु |

### स्त्रीलिङ्गे

| | | | |
|---|---|---|---|
| प्र. | कियती | कियत्यौ | कियत्यः |
| द्विती. | कियतीम् | कियत्यौ | कियतीः |
| तृ. | कियत्या | कियतीभ्याम् | कियतीभिः |
| च. | कियत्यै | कियतीभ्याम् | कियतीभ्यः |
| पं. | कियत्याः | कियतीभ्याम् | कियतीभ्यः |
| ष. | कियत्याः | कियत्योः | कियतीनाम् |
| स. | कियत्याम् | कियत्योः | कियतीसु |

### नपुंसकलिङ्गे

| | | | |
|---|---|---|---|
| प्र. | कियत् | कियती | कियन्ति |
| द्विती. | कियत् | कियती | कियन्ति |

तृ.
च.
पं. → पुंलिङ्गवत्
ष.
स.

### कति-शब्दस्य रूपाणि

| | |
|---|---|
| **प्र.** | कति |
| **द्विती.** | कति |
| **तृ.** | कतिभिः |
| **च.** | कतिभ्यः |
| **पं.** | कतिभ्यः |
| **ष.** | कतीनाम् |
| **स.** | कतिषु |

**अवधेयम्**

**कति**-शब्दस्य रूपाणि त्रिषु लिङ्गेषु समानानि भवन्ति।

## अभ्यासः — 262

**'कति' शब्दस्य विविधैः विभक्तिरूपैः रिक्तस्थानं पूरयत—**

['कति' शब्द के विविध विभक्ति रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with various forms of *kati*.]

उदा. ...**कतीनां**... जनानाम् अनुरक्तिः संस्कृते अस्ति ?

1. ............ छात्रेभ्यः पुरस्कारान् दास्यति शिक्षकः ?
2. ............ गृहेषु सङ्गणक-यन्त्राणि सन्ति ?
3. ............ वृक्षेषु फलानि सन्ति ?
4. ............ छात्रान् पाठयति अध्यापिका ?
5. ............ शिक्षकाः विरामे सन्ति ?
6. ............ वणिग्भ्यः वस्तूनि क्रीतानि ?
7. ............ महिलाभिः पूजा कृता ?
8. ............ शिक्षकैः पाठाः पाठिताः ?
9. ............ पुष्पाणि योजयति बालिका ?
10. ............ छात्राणां कक्षायाम् उपस्थितिः अस्ति ?

## अभ्यासः – 263

**अधोनिर्दिष्टेषु वाक्येषु औचित्यं दृष्ट्वा कति-शब्दं कियत्-शब्दं वा स्थापयत–**
[ अधोनिर्दिष्ट वाक्यों में औचित्य की दृष्टि से 'कति' शब्द या कियत् शब्द का प्रयोग करें। Use the word '*kati*' or '*kiyat*' as required in the following sentences. ]

उदा. ......कति...... जनाः नाटकं दृष्टवन्तः ?

1. ............ महिलाः स्नातुं गच्छन्ति ?
2. ............ कृषकाः क्षेत्रं कर्षन्ति ?
3. ............ नदीषु मकराः सन्ति ?
4. तडागे ............ जलम् अस्ति ?
5. इयं धेनुः ............ दुग्धं ददाति ?
6. ............ नाटकानां प्रदर्शनं जातम् ?
7. ............ श्रमिकैः वृत्तिः लब्धा ?
8. ............ शर्करया पायसं निर्माति ?
9. तैलस्य ............ मूल्यम् ?
10. ............ औन्नत्यं पर्वतस्य ?
11. ............ क्रीडकैः पुरस्काराः प्राप्ताः ?
12. ............ शिशुभ्यः मोदकानि देयानि।
13. ............ जलेन औषधं पेयम् ?
14. ............ जम्बीररसम् इच्छति भवान् ?
15. ............ प्राणाः भवन्ति।

## अभ्यासः – 264

**उत्तरानुगुणं 'कति'-शब्देन 'कियत्'-शब्देन वा उचितानि प्रश्नवाक्यानि लिखत–**
[ उत्तर के अनुरूप 'कति' शब्द या 'कियत्' शब्द के प्रयोग से उचित प्रश्नवाक्य लिखें। Write the interrogative sentences with the use of either '*kati*' or '*kiyat*' as per the answers given. ]

**उदा.** उ.- मम गृहे दश जनाः सन्ति।
**प्र.**- तव गृहे कति जनाः सन्ति ?

1. उ.- मम विद्यालये सप्ततिः छात्राः सन्ति।

प्र.- ?

2. उ.- अस्य वृक्षस्य औन्नत्यं महत् अस्ति।

प्र.- ?

3. उ.- अस्मिन् तडागे बहवः मत्स्याः सन्ति।

प्र.- ?

4. उ.- दशरथस्य चत्वारः पुत्राः आसन्।

प्र.- ?

5. उ.- द्रौपद्याः पञ्च पुत्राः आसन्।

प्र.- ?

6. उ.- अस्मिन् वृक्षे प्रभूतानि फलानि सन्ति।

प्र.- ?

7. उ.- अस्मिन् प्रदेशे दश अजाः चरन्ति।

प्र.- ?

8. उ.- अहं दुग्धे न्यूनां शर्कराम् इच्छामि।

प्र.- ?

9. उ.- अद्य त्रयाणां देवानां नूतनकलेवरः भविष्यति।

प्र.- ?

10. उ.- अस्य कटस्य दैर्घ्यम् अधिकं वर्तते।

प्र.- ?

11. उ.- अस्य आसन्दस्य औन्नत्यं द्विपादमितम् अस्ति।

प्र.- ?

12. उ.- मम गृहम् इतः दशसु क्रोशेषु अस्ति।

प्र.- ?

13. उ.- इदं यानं बहुशब्दं करोति।

प्र.- ?

**सङ्ख्याः**

## भूत्यै न प्रमदितव्यम्

**आपणिकः** — आगच्छतु श्रीमन् ! आगच्छतु । वदतु, किं ददानि ?

**ग्राहकः** — बहूनि वस्तूनि आवश्यकानि सन्ति । **द्वे** द्रौण्यौ, **द्वौ** तृण-कटौ, **तिस्रः** स्थाल्यः, **षट्** चषकाः ..... (किञ्चिद् विरमति) ।

**आपणिकः** — भवान् वदन् भवतु । आदौ अहम् अपेक्षितां वस्तुसूचीं लिखामि । ततः सर्वाणि वस्तूनि निष्कास्य दास्यामि ।



**ग्राहकः** — अस्तु तर्हि लिखतु - **दश** चमसाः, **चतस्रः** दर्व्यः, **द्वौ** अवकर-कण्डोलौ, **दश** अल्पाहारस्थाल्यः ।

**आपणिकः** — अन्न-व्यञ्जनादि-निर्माणाय पात्राणि ?

**ग्राहकः** — तानि मध्यमाकाराणि **चत्वारि** ददातु । चषकाः सन्ति किम् ?

**आपणिकः** — आम्, सन्ति । कति ददानि ?

**ग्राहकः** — इदानीं **चतुरः** ददातु । पुनः अन्ये कति आवश्यकाः इति मम पत्नी अनन्तरं वदिष्यति ।

**आपणिकः** — सद्योविवाहितः भवान् इति भाति ।

**ग्राहकः** — आम्, आम् । किन्तु कथं ज्ञातं भवता ?

**आपणिकः** — एवं पाकशाला-सम्बद्धानि सर्वाणि वस्तूनि सद्योविवाहितः खलु क्रीणाति ।

**ग्राहकः** — एवं वा ? अस्तु इदानीं कियद् देयमिति त्वरितं वदतु । अत्यावश्यकानि बहूनि कार्याणि कर्तव्यानि सन्ति ।

**आपणिकः** — अस्तु सङ्कलय्य वदामि। (सङ्कलनानन्तरम्) .. सर्वमाहत्य रूप्यकाणां **त्रिशती** अभवत् ।

**ग्राहकः** — मया एतावन्ति वस्तूनि क्रीतानि । किञ्चित् मूल्यं न्यूनं न करिष्यति ?

**आपणिकः** — अद्यत्वे सर्वाणि वस्तूनि महार्घाणि मिलन्ति । अतः व्यवसाये बहु लाभः नास्ति । भवान् वदति चेत् **पञ्च** रूप्यकाणि न्यूनीकृत्य ददातु ।

**ग्राहकः** — **पञ्चभिः** रूप्यकैः किं भवति । किञ्चित् भूयः न्यूनीकरोतु । स्वीकरोतु ।

**आपणिकः** — न महोदय ! एवं न करोतु । भवान् उच्चपदे आसीनः कश्चन अधिकारी वर्तते इति जानामि । तर्हि किमर्थम् एवम् आचरति ।



**ग्राहकः** — उच्चपदे आसीनः अस्मि इति यद् भवता उक्तं तत् तु सत्यम् । किन्तु भवान् न जानाति वा ?

**आपणिकः** — नहि महोदय ! तथा किमपि न जानामि । भवान् एव वदतु ।

**ग्राहकः** — तर्हि शृणोतु - "भूत्यै न प्रमदितव्यम्" । धनसङ्ग्रहे अवहेलनं न युज्यते ।

◆◆◆

## अभ्यासः — 265

### 1. यथोचितं रिक्तस्थानानि पूरयत–

[ यथोचित रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate words. ]

| | | | |
|---|---|---|---|
| (i) | | गुरुः गच्छति। | (एकः, एका, एकम्) |
| (ii) | | बालिके पठतः। | (द्वे, द्वौ, द्वयम्) |
| (iii) | | फलानि सन्ति। | (त्रयः, त्रीणि, तिस्रः) |
| (iv) | | नद्यः प्रवहन्ति। | (चत्वारि, चत्वारः, चतस्रः) |

### 2. यथोचितं योजयत–

[ यथोचित पदों को जोडें। Match the following words. ]

| | | |
|---|---|---|
| (i) | त्रयः | नदी |
| (ii) | द्वे | विद्यार्थिनौ |
| (iii) | एका | राजा |
| (iv) | त्रीणि | सरितः |
| (v) | द्वौ | मातरौ |
| (vi) | एकम् | धनूंषि |
| (vii) | तिस्रः | विद्वांसः |
| (viii) | एकः | अक्षि |

### 3. अधोलिखिताः सङ्ख्याः अक्षरैः लिखत–

[ अधोलिखित संख्या को अक्षरों में लिखें। Write the numbers in the words. ]

| | | | | |
|---|---|---|---|---|
| (i) | 5 | पञ्च। | (ii) | 12 |
| (iii) | 22 | । | (iv) | 37 |
| (v) | 44 | । | (vi) | 56 |
| (vii) | 63 | । | (viii) | 77 |
| (ix) | 89 | । | (x) | 94 |
| (xi) | 100 | । | (xii) | 1000 |

## पूरणप्रत्ययाः

**अधोनिर्दिष्टानि वाक्यानि पठत—**

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



1 2 3 4 5 6 7 8 9 10

पङ्क्तौ दश बालकाः सन्ति।

**प्रथमः** बालकः पठति।

**द्वितीयः** बालकः लिखति।

**तृतीयः** बालकः क्रीडति।

**चतुर्थः** बालकः गायति।

**पञ्चमः** बालकः नृत्यति।

**षष्ठः** बालकः रोदिति।

**सप्तमः** बालकः हसति।

**अष्टमः** बालकः पिबति।

**नवमः** बालकः खादति।

**दशमः** बालकः गच्छति।

**स्त्री.**




1 2 3 4 5 6 7 8 9 10

पङ्क्तौ दश बालिकाः सन्ति।

**प्रथमा** बालिका गच्छति ।
**द्वितीया** बालिका पठति ।
**तृतीया** बालिका रोदिति ।
**चतुर्थी** बालिका नृत्यति ।
**पञ्चमी** बालिका हसति ।

**षष्ठी** बालिका पिबति ।
**सप्तमी** बालिका गायति ।
**अष्टमी** बालिका खादति ।
**नवमी** बालिका लिखति ।
**दशमी** बालिका क्रीडति ।

**नपुं.**



1 2 3 4 5 6 7 8 9 10

पङ्क्तौ दश वस्तूनि सन्ति ।

**प्रथमं** पुस्तकम् ।
**द्वितीयम्** आम्रम् ।
**तृतीयं** पत्रम् ।
**चतुर्थं** पुष्पम् ।
**पञ्चमं** यानम् ।

**षष्ठम्** अक्षि ।
**सप्तमम्** अस्थि ।
**अष्टमं** दाम ।
**नवमम्** उपनेत्रम् ।
**दशमं** मन्दिरम् ।

## पुंलिङ्गे नपुंसकलिङ्गे च पूरणप्रत्ययान्ताः

### अधोनिर्दिष्टानि वाक्यानि पठत—

[ अधोनिर्दिष्ट वाक्यों को पढ़ें। Read the following sentences. ]

1 **प्रथमः** पाठः अतीव सरलः अस्ति।
**प्रथमं** चित्रं समीचीनम् अस्ति।

2. **द्वितीये** आसन्दे मम मित्रम् उपविशति।
**द्वितीये** गृहे मम बान्धवाः निवसन्ति।

3. **तृतीयेन** पुत्रेण माता सत्कृता।
**तृतीयेन** शस्त्रेण शत्रुः व्यापादितः।

4. **चतुर्थं** पुत्रं पिता आह्वयति।
**चतुर्थं** स्थानं कः प्राप्तवान्।

5. **पञ्चमाय** भिक्षुकाय कम्बलं देहि।
**पञ्चमाय** मित्राय चिकित्सा आवश्यकी।

6. **षष्ठात्** कवेः कवितां शृणुत।
**षष्ठात्** दारुणः कीलकं निस्सारय।

7. **सप्तमस्य** ऋषेः नाम पुलस्त्यः।
**सप्तमस्य** करिणः दन्तः भग्नः।

8. **अष्टमे** शिशौ अहं स्निह्यामि।
**अष्टमे** वस्तुनि मम रुचिः।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| एकम् | – | one | – | एक | प्रथमः | – | first | – | पहला |
| द्वे | – | two | – | दो | द्वितीयः | – | second | – | दूसरा |
| त्रीणि | – | three | – | तीन | तृतीयः | – | third | – | तीसरा |

(एवम् अग्रे)

**प्रथम-द्वितीय-तृतीयादयः पूरण-प्रत्ययान्ताः इति उच्यन्ते।**

## पुं./नपुं./स्त्री.-लिङ्गेषु-पूरणप्रत्ययान्तरूपाणि

| पुं. | नपुं. | स्त्री. |
|---|---|---|
| प्रथमः | प्रथमम् | प्रथमा |
| द्वितीयः | द्वितीयम् | द्वितीया |
| तृतीयः | तृतीयम् | तृतीया |
| चतुर्थः | चतुर्थम् | चतुर्थी |
| पञ्चमः | पञ्चमम् | पञ्चमी |
| षष्ठः | षष्ठम् | षष्ठी |

| पुं. | नपुं. | स्त्री. |
| --- | --- | --- |
| सप्तमः | सप्तमम् | सप्तमी |
| अष्टमः | अष्टमम् | अष्टमी |
| नवमः | नवमम् | नवमी |
| दशमः | दशमम् | दशमी |
| एकादशः | एकादशम् | एकादशी |
| द्वादशः | द्वादशम् | द्वादशी |
| त्रयोदशः | त्रयोदशम् | त्रयोदशी |
| चतुर्दशः | चतुर्दशम् | चतुर्दशी |
| पञ्चदशः | पञ्चदशम् | पञ्चदशी |
| षोडशः | षोडशम् | षोडशी |
| सप्तदशः | सप्तदशम् | सप्तदशी |
| अष्टादशः | अष्टादशम् | अष्टादशी |
| नवदशः/एकोनविंशः/ एकोनविंशतितमः | नवदशम्/एकोनविंशम्/ एकोनविंशतितमम् | नवदशी/एकोनविंशी/ एकोनविंशतितमी |

**अवधेयम्**

विंशतिशब्दात् ऊर्ध्वं 'तमट्' (तम)-प्रत्ययः 'डट्'-प्रत्ययः वा योजनीयः।

| | | | | |
| --- | --- | --- | --- | --- |
| **यथा** | विंशतिः + तमट् | विंशतितमः | विंशतितमम् | विंशतितमी |
| | विंशतिः + डट् | विंशः | विंशम् | विंशी |

| | | पुं. | नपुं. | स्त्री. |
| --- | --- | --- | --- | --- |
| 30 | त्रिंशत् | त्रिंशः / त्रिंशत्तमः | त्रिंशम् / त्रिंशत्तमम् | त्रिंशी / त्रिंशत्तमी |
| 40 | चत्वारिंशित् | चत्वारिंशत्तमः | चत्वारिंशत्तमम् | चत्वारिंशत्तमी |
| 50 | पञ्चाशत् | पञ्चाशत्तमः | पञ्चाशत्तमम् | पञ्चाशत्तमी |
| 60 | षष्टिः | षष्टितमः | षष्टितमम् | षष्टितमी |
| 70 | सप्ततिः | सप्ततितमः | सप्ताततमम् | सप्ततितमी |
| 80 | अशीतिः | अशीतितमः | अशीतितमम् | अशीतितमी |
| 90 | नवतिः | नवतितमः | नवतितमम् | नवतितमी |
| 100 | शतम् | शततमः | शततमम् | शततमी |

**अवधेयम्**

- ⇨ 'षष्ठः' ✓ इति शुद्धं 'षष्ठमः' × इति अशुद्धं रूपम्।
- ⇨ एकादश, द्वादश इत्यादयः (विसर्गरहिताः) सङ्ख्यां बोधयन्ति।
- ⇨ एकादशः, द्वादशः इत्यादयः (विसर्गसहिताः) पूरणीं सङ्ख्यां बोधयन्ति।
- ⇨ 'तमट्' (तम)-प्रत्ययः एकोनविंशतेः पूर्वं न भवति। एकोनविंशतितः आरभ्य सर्वत्र कर्तुं शक्यः।

## अभ्यासः — 266

✍ **कोष्ठकनिर्दिष्ट-सङ्ख्यानां पूरण-प्रत्ययान्तरूपाणि लिखत—**

[कोष्ठक में निर्दिष्ट सङ्ख्याओं का पूरण प्रत्ययान्त रूप लिखें। Write the number-words ending with '*pūraṇa*'-suffix of the numbers given in the bracket.]

| | | पुं. | नपुं. | | | पुं. | नपुं. |
|---|---|---|---|---|---|---|---|
| यथा | (5) | पञ्चमः | पञ्चमम् | | | | |
| 1. | (3) | | | 11. | (58) | | |
| 2. | (4) | | | 12. | (67) | | |
| 3. | (7) | | | 13. | (82) | | |
| 4. | (11) | | | 14. | (65) | | |
| 5. | (13) | | | 15. | (62) | | |
| 6. | (8) | | | 16. | (55) | | |
| 7. | (41) | | | 17. | (46) | | |
| 8. | (45) | | | 18. | (96) | | |
| 9. | (37) | | | 19. | (6) | | |
| 10. | (26) | | | 20. | (66) | | |

## अभ्यासः — 267

✍ **अधोनिर्दिष्टेषु वाक्येषु पूरणप्रत्ययान्तरूपैः रिक्तस्थानानि पूरयत—**

[अधोनिर्दिष्ट वाक्यों में कोष्ठक निर्दिष्ट संख्याओं को पूरण-प्रत्ययान्त रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the number-words ending with *pūraṇa*-suffix as the number given in the bracket in the following sentences.]

**यथा** छात्रेषु ......**दशमः**...... चतुरः अस्ति। (10)

1. दशरथस्य पुत्रेषु लक्ष्मणः ............ । (3)
2. दशरथस्य राज्ञीषु कौसल्यायाः स्थानम् ............ । (1)
3. पाण्डुपुत्रेषु भीमः ............ । (2)
4. उपस्थितासु बालिकासु सुबोधायाः स्थानम् ............ । (8)
5. क्रीडकेषु ............ विजेता अस्ति। (7)

**स्त्रीलिङ्गे पूरणप्रत्ययान्ताः**

📖 **एतानि वाक्यानि पठत—**

[इन वाक्यों को पढ़ें। Read these sentences.]

**प्रथमा** तिथिः प्रतिपदा कथ्यते।

कृष्णस्य **द्वितीया** भार्या सत्यभामा आसीत्।

दशरथस्य **तृतीया** भार्या का आसीत् ?

**चतुर्थ्यै** विभक्त्यै एकः पाठः लेखनीयः।

**पञ्चम्याः** विभक्तेः प्रयोगः अपादानादिषु भवति।

**षष्ठ्याः** विभक्तेः अर्थः सम्बन्धः।

**सप्तम्यां** तिथौ तस्य विवाहः अस्ति।

**अष्टम्याः** कक्षायाः छात्राः केन्द्रीयपरीक्षां लिखन्ति।

**नवम्यां** तिथौ रामस्य जन्म अभवत्।

**दशम्यां** तिथौ रामस्य विजयोत्सवः आचर्यते।

## स्त्रीलिङ्गे पूरणप्रत्ययान्तरूपाणि

**एतानि रूपाणि पठत–**

[ इन रूपों को पढ़ें। Read these declensions. ]

| | | |
|---|---|---|
| प्रथमा | द्वितीया | तृतीया |
| चतुर्थी | पञ्चमी | दशमी |
| विंशतितमी | त्रिंशत्तमी | चत्वारिंशत्तमी |
| पञ्चाशत्तमी | षष्टितमी | सप्ततितमी |
| अशीतितमी | नवतितमी | शततमी |

**अवधेयम्**

- प्रथम-द्वितीय-तृतीयेभ्यः पूरणप्रत्ययान्त-पुंलिङ्गरूपेभ्यः परम् आकारः योजितः चेत् स्त्रीलिङ्गरूपं भवति।

  प्रथम + आ = प्रथमा

- अन्येषां सर्वेषां शब्दानां प्रसङ्गे पूरणप्रत्ययान्त-पुंलिङ्गरूपेभ्यः परम् ईकारः योजितः चेत् स्त्रीलिङ्गरूपं भवति।

  चतुर्थ + ई = चतुर्थी    एकादश + ई = एकादशी

  विंशतितम + ई = विंशतितमी    शततम + ई = शततमी

### अभ्यासः – 268

**कोष्ठके दत्तानां सङ्ख्यानां स्त्रीलिङ्गे पूरणप्रत्ययान्तरूपैः रिक्तस्थानानि पूरयत–**

[ कोष्ठक में प्रदत्त सङ्ख्याओं के पूरणप्रत्ययान्त स्त्रीलिङ्ग रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the number-word ending with feminine '*pūraṇa*'-suffix as the number given in the bracket. ]

यथा 1. (15) – **पञ्चदशी**    5. (41) –

2. (2) –    6. (43) –

3. (18) –    7. (63) –

4. (11) –    8. (8) –

| | | | | | |
|---|---|---|---|---|---|
| 9. | (6) | – | 15. | (85) | – |
| 10. | (55) | – | 16. | (91) | – |
| 11. | (64) | – | 17. | (100) | – |
| 12. | (33) | – | 18. | (37) | – |
| 13. | (24) | – | 19. | (5) | – |
| 14. | (72) | – | 20. | (1) | – |


## अभ्यासः — 269

**अङ्कैः सूचितानां सङ्ख्यानां पूरणप्रत्ययान्त-स्त्रीलिङ्गरूपैः रिक्तस्थानानि पूरयत—**
[ कोष्ठक प्रदत्त अङ्को से सूचित सङ्ख्याओं के पूरण-प्रत्ययान्त स्त्रीलिङ्ग रूप से रिक्तस्थान की पूर्ति करें।
**Fill in the blanks with the number-words ending with feminine '*puraṇa*'-suffix as per the numbers pointed out in the bracket. ]**

उदा. ......**पञ्चम्यां**...... मालायाम् उत्तमानि पुष्पाणि सन्ति। (5)
1. ............ बालिका अध्यापकस्य पुत्री (5)
2. ............ तिथौ दुर्गापूजा भवति। (7)
3. ............ तिथौ पुत्रस्य नामकरणं कुर्यात् (10)
4. ............ तिथौ विष्णुपूजनं भवति। (11)
5. ............ पङ्क्तौ मम माता उपविशति। (1)
6. ............ द्विचक्रिकया बोधकुमारः आगतवान्। (3)
7. ............ रात्रौ अस्माकं यानं वर्तते। (7)
8. ............ उत्पीठिकायां पुस्तकानि सन्ति। (15)
9. ............ दोलायां शिशुः स्वपिति। (18)
10. ............ घटिकायां समयः सम्यक् नास्ति। (30)
11. ............ बालिकया पुरस्कारः न लब्धः। (3)
12. ............ महिलायै प्रसादं देहि। (5)
13. ............ धेनोः क्षीरं मधुरम्। (25)
14. ............ दुहितुः पुस्तकम् एतत्। (2)
15. ............ स्रजः पुष्पाणि पतन्ति। (96)

## पूरणप्रत्ययाः

### स जयति तीर्थराजः प्रयागः



भारतस्य चतुर्षु स्थानेषु कुम्भमेलाः आयोज्यन्ते - प्रयागे, हरिद्वारे, उज्जयिन्यां, नासिके च। एतानि चत्वारि नगराणि चतसृणां प्रमुखानां नदीनां तीरेषु अवस्थितानि सन्ति। एषु **प्रथमः** तीर्थराजः प्रयागः तिसृणां पवित्र-नदीनां सङ्गमस्थले अवस्थितः। तासु तिसृषु नदीषु द्वे नद्यौ गङ्गा-यमुने च प्रयागे एव परस्परं मिलतः। **तृतीया** नदी सरस्वती विलुप्ता अस्ति। सा उपरि न दृश्यते किन्तु भूगर्भगता प्रवहति। **द्वितीयं** हरिद्वारं गङ्गानदीतटे विराजते। **तृतीया** नगरी उज्जयिनी सिप्रानद्याः तीरे वर्तते तथा **चतुर्थं** नासिकनगरं गोदावरी-नदीकूले अस्ति।

प्रत्येकस्मिन् नगरे **द्वादश**-वर्षानन्तरम् एकः पूर्ण-कुम्भयोगः आयाति, तथा **षष्ठे** वर्षे च अर्धकुम्भयोगः। एवं वर्षत्रयानन्तरं भारतवर्षे उपर्युक्तेषु चतुर्षु नगरेषु एकत्र महाकुम्भयोगः आपतति।

सूर्यः यदा मकरराशौ प्रविशति तदा प्रयागे कुम्भः भवति। प्रतिवर्षं पौषपूर्णिमातः आरभ्य एकमासं यावत् सङ्गमक्षेत्रे कुम्भमेला प्रवर्तते। बहवः भक्ताः एकमासं यावत् सङ्गमक्षेत्रे कल्पवासे तिष्ठन्ति। ते प्रतिदिनं द्वयोः पवित्रनद्योः सङ्गमस्थले स्नानं कुर्वन्ति। अस्मिन् पुण्ये अवसरे त्रीणि प्रमुखानि स्नान-दिनानि भवन्ति। मकरसङ्क्रान्तौ **प्रथमं** स्नानम्, मौनि-अमावस्यायां **द्वितीयं** स्नानं तथा वसन्तपञ्चम्यां **तृतीयं** स्नानं भवति। एषु दिनेषु स्नानं भवति तदेव कुम्भस्नानम् इति नाम्ना प्रसिद्धम् अस्ति। प्रयागस्य कुम्भमेलायां भागं ग्रहीतुं भारतवर्षस्य अनेकेभ्यः स्थानेभ्यः सामान्यजनाः, साधवः सन्तश्च आगच्छन्ति। अन्य-कुम्भेभ्यः प्रयागकुम्भस्य किमपि वैशिष्ट्यं वर्तते। अन्यानि नगराणि यदि तीर्थक्षेत्राणि भवन्ति तर्हि प्रयागः तीर्थराजः वर्तते। अत एव "प्रयागे कुम्भस्नानेन पुनर्जन्म न भवति" इति जनाः विश्वसन्ति। "स जयति तीर्थराजः प्रयागः" इति सूक्तिमाध्यमेन अपि प्रयागस्य माहात्म्यं वर्णितमस्ति।

◆◆◆

## अभ्यासः — 270

**1. पाठाधारेण रिक्तस्थानानि पूरयत—**

[ पाठ के आधार से रिक्त स्थान की पूर्ति करें। Fill in the blanks on the basis of the lesson. ]

(i) तीर्थराजः प्रयागः अस्ति।

(ii) नदी सरस्वती विलुप्ता।

(iii) हरिद्वारं नगरं गङ्गानदीतटे वर्तते।

(iv) नगरी उज्जयिनी क्षिप्रानद्याः तीरे वर्तते।

(v) स्नानं वसन्तपञ्चम्यां भवति।

**2. यथोचितं योजयत—**

[ यथोचित पदों को जोड़ें। Match the following words. ]

| | | |
|---|---|---|
| (i) | प्रथमे | नद्याः |
| (ii) | तृतीया | सूनोः |
| (iii) | नवम्याम् | सरितम् |
| (iv) | पञ्चमेन | कोष्ठिकासु |
| (v) | दशमीषु | उपायः |
| (vi) | चतुर्थः | विद्यार्थिनम् |
| (vii) | सप्तमम् | पथा |
| (viii) | द्वितीयाम् | तिथौ |
| (ix) | अष्टमस्य | दिवसे |
| (x) | षष्ठ्याः | बालिका |

## सुभाषितेषु सङ्ख्याप्रयोगाः

# सुभाषितानि

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।
एकश्चन्द्रस्तमो हन्ति न च ताराः सहस्रशः॥

सिंहादेकं बकादेकं शिक्षेच्चत्वारि कुक्कुटात्।
वायासात् पञ्च शिक्षेत षट् शुनस्त्रीणि गर्दभात्॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥

द्वाविमौ पुरुषौ राजन् स्वर्गस्योपरि तिष्ठतः।
प्रभुश्च क्षमया युक्तः दरिद्रश्च प्रदानवान्॥

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसञ्ज्ञा विधीयते॥

हरणं च परस्वानां परदाराभिमर्षणम्।
सुहृदश्च परित्यागः त्रयो दोषाः क्षयावहाः॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्॥

लोकयात्रा, भयं लज्जा दाक्षिण्यं धर्मशीलता।
पञ्च यत्र न विद्यन्ते न कुर्यात्तत्र संस्थितिम्॥

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रिता॥

कुग्रामवासः कुनरेन्द्रसेवा कुभोजनं क्रोधमुखी च भार्या।
दारिद्र्यभावाद् विमुखञ्च मित्रं षड् जीवलोके नरका भवन्ति॥

उद्यमं साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्॥

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः॥

लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्॥

मातरं पितरं चैव यस्तु कुर्यात् प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥

अष्टौ गुणा पुरुषं दीपयन्ति
प्रज्ञा च कौल्यं च दमः शमश्च।
पराक्रमश्चाबहुभाषिता च
दानं यथाशक्ति कृतज्ञता च॥

शतेषु जायते शूरः सहस्रेषु च पण्डितः।
वक्ता दशसहस्रेषु दाता जायेत वा न वा॥

◆◆◆

# सुभाषितानि

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितं पुण्यं चतुर्थे किं करिष्यति ॥

विद्या शौर्यं च दाक्ष्यं च बलं धैर्यं च पञ्चमम् ।
मित्राणि सहजान्याहुर्वर्तयन्ति हि तैर्बुधाः ॥

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥

नामधेयं दशम्यां वा द्वादश्यां वास्य कारयेत् ।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे च गुणान्विते ॥

आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्त्तते ।
आद्वाविंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥

◆◆◆

**कथायां सङ्ख्या-पूरणप्रत्ययान्त-प्रयोगाः**


## पुण्यात्मा साधुः

एकः राजा आसीत्। तस्य सप्त राज्ञ्यः आसन्। परन्तु सः निःसन्तानः आसीत्। निस्सन्तानतायाः प्रतीकारार्थं सः एकस्य साधोः शरणं गतवान्। पुत्रप्राप्तये साधुः राज्ञे द्वे फले प्रदाय अवदत्– "राजन् ! एते द्वे फले स्वीकरोतु। भवतः सप्तभ्यः राज्ञीभ्यः समानरूपेण वितरतु। एतयोः द्वयोः फलयोः सेवनेन भवतः सप्त राज्ञ्यः पुत्रवत्यः भविष्यन्ति। एवं सति भवतः एकः, द्वौ वा न, अपि तु सप्त एव पुत्राः भविष्यन्ति। परन्तु, तेषु सप्तसु पुत्रेषु प्रथमं पुत्रम् अहमेव स्वीकरिष्यामि" इति। राजा प्रस्तावेऽस्मिन् स्वसम्मतिं प्रदत्तवान्। सः चिन्तितवान् यत् सप्तसु पुत्रेषु एकं पुत्रं साधुः स्वीकरोति चेत् स्वीकरोतु। अवशिष्टाः षट् पुत्राः तु मम एव स्थास्यन्ति। एभिः षड्भिः पुत्रैः अपि मम वंशरक्षा सुतरां भवति।



साधोः आश्रमात् राजप्रासादं प्रत्यागत्य राजा साधोः निर्देशानुसारं ते द्वे फले षड्भ्यः एव राज्ञीभ्यः व्यतरत्। राजा सप्तम्यां राज्ञ्यां न स्निह्यति स्म। अत एव सः तस्यै तयोः द्वयोः अपि फलयोः एकमपि अंशं न दत्तवान्। सप्तमी राज्ञी यदा एतद् रहस्यं ज्ञातवती तदा येन केन प्रकारेण सा स्वपालितमार्जार्याः सहाय्येन तयोः फलयोः त्वचः संगृहीतवती। सा तत् त्वचं सम्यक् परिष्कृत्य श्रद्धया भागत्रयम् अकल्पयत्। सा स्वयम् एकं भागं खादितवती, द्वितीयं भागं मार्जार्यै, तृतीयं च घोटक्यै दत्तवती। यथाकालं षड्भ्यः राज्ञीभ्यः षट् पुत्राः अभवन्। सप्तम्याः राज्ञ्याः अपि द्वौ पुत्रौ अजायेताम्। तौ च द्वौ पुत्रौ तेभ्यः षड्भ्यः पुत्रेभ्यः सुन्दरौ आस्ताम्। तस्याः मार्जार्याः घोटक्याः च प्रत्येकं द्वौ द्वौ पुत्रौ अभवताम्।

कालान्तरे एकस्मिन् दिने साधुः राजप्रासादम् आगतवान्। स्ववचनानुसारेण राजा प्रथमं पुत्रं साधवे समर्पितवान्। साधुः तेन सह आश्रमं प्रति यात्राम् आरब्धवान्। अरण्यमार्गेण गमनकाले एकं द्विपथम् आगतम्। साधुः राजकुमारं पृष्टवान्– "अनयोः द्वयोः मार्गयोः एतेन मार्गेण गच्छावः चेत् षड्भिः दिनैः आश्रमं प्राप्स्यावः। परन्तु अयं मार्गः अतीव जटिलः, भयप्रदः दुर्गमश्च वर्तते। अपरेण मार्गेण गच्छावः चेत् षड्भिः मासैः आश्रमं प्राप्स्यावः। किन्तु अयं मार्गः सहजः, सुखप्रदः सुगमश्च वर्तते। तर्हि सुविचार्य वदतु द्वयोः मार्गयोः आवां केन मार्गेण गच्छाव" इति। राजकुमारः अवदत्– "अनयोः आवाभ्यां द्वितीयः मार्गः आश्रयणीयः" इति।



राजकुमारस्य भीरुतापूर्णम् उत्तरं श्रुत्वा साधुः क्रोधान्वितः अभवत्। सः पुनः राजप्रासादं प्रत्यावर्तितवान्। ततः सः अवशिष्टानां पञ्चानां राज्ञीणां पञ्च पुत्रान् एकैकशः नीत्वा तेनैव मार्गेण अगच्छत्। आगते च द्विपथे सः तान् सर्वान् तमेव एकं प्रश्नं पृष्टवान्। ते अपि पञ्च राजकुमाराः तथैव उत्तरं दत्तवन्तः यथा प्रथमः उत्तरितवान्। तेषाम् उत्तरेण क्रोधाविष्टः साधुः तान् पञ्च राजपुत्रान् प्रासादं प्रति प्रेषयित्वा स्वयं राजानम् उपगम्य आक्षिपत्– "राजन्! भवान् मह्यं स्वस्य प्रथमं पुत्रं न दत्तवान्। भवतः एते षट् पुत्राः भीरवः सन्ति। भवान् मया सह विश्वासघातम् आचरितवान्। अहं भवन्तं शपामि। मम शापवशात् भवतः राज्यं विनङ्क्ष्यति"।

साधोः क्रोधपूर्णेन वचनेन राजा भीतः अभवत्– "इदानीं मम कः पुत्रः अवशिष्यते। एकैकं षण्णां राज्ञीणां षट् पुत्रान् साधवे अहं दत्तवान्। तथापि साधुः एवम् आक्षिपन्नस्ति"। राजानं चिन्तितं दृष्ट्वा कश्चन अमात्यः अवदत्– "महाराज! सप्तम्याः राज्ञ्याः अपि द्वौ पुत्रौ स्तः। तस्याः प्रथमं पुत्रं साधवे अर्पयतु" इति। ततः राज्ञः निर्देशेन कनिष्ठायाः राज्ञ्याः प्रथमः पुत्रः घोटक्याः मार्जार्याश्च पुत्राभ्यां सह साधोः आश्रमं प्रति प्रस्थितवान्। साधुः यदा पूर्वोक्तं द्विपथं प्राप्तवान् तदा तमेव प्रश्नं पुनः पृष्टवान्।



परन्तु एतस्य राजकुमारस्य उत्तरं तु सर्वेभ्यः भिन्नम् एव आसीत्। "षड्भिः दिनैः प्राप्तव्येन मार्गेण गच्छाव" इति राजकुमारस्य वीरतापूर्णम् उत्तरं श्रुत्वा साधुः प्रसन्नः अभवत्। ततः राजकुमारः स्वकीयम् अश्वमारुह्य षण्णां दिनानां मार्गं दिनद्वयेन अतिक्रम्य साधोः आश्रमं प्राप्तवान्। तत्र राक्षसाः उपद्रवं कुर्वन्ति स्म। ते राक्षसाः आश्रमस्थान् साधून् पीडयन्ति स्म। अपि च शतम् ऋषयः तान् सेवन्ते स्म। एतत् सर्वं दृष्ट्वा व्यथितः राजकुमारः सर्वान् राक्षसान् ताडितवान्। साधून् च विमोचितवान्। ततः सः तेभ्यः अभयं प्रदाय सर्वान् यथोचित-यज्ञादिकर्मसु नियोजितवान्। ततः सः साधुः आश्रमं प्राप्तवान्। शान्तं तपोवनं विलोक्य प्रसन्नः जातः। आशीर्भिः योजयित्वा राजकुमारं च नगरं प्रेषितवान्।

◆◆◆

# षष्ठः स्तबकः

## 6.1 प्रथमः पाठः

[ शतृ-प्रत्ययान्त-रूपम् ]

**प्रथमा-प्रयोगाः (पुलिङ्गे)**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढें। Read the following sentences. ]



बालकः **पठन्** गच्छति।



छात्रः **शृण्वन्** लिखति।



ऋषिः **उपविशन्** जपति।



कपिः **खादन्** आरोहति।



नर्तकः **नृत्यन्** गायति।



नेता **स्मरन्** लिखति।

## सावधानं पठत—

[ ध्यान से पढ़ें। Read carefully. ]

छात्रः पठनसमकालं लिखति → छात्रः लिखन् पठति।

रामः लेखनसमकालं शृणोति → रामः शृण्वन् लिखति।

भीमः भ्रमणसमकालं खादति → भीमः खादन् भ्रमति।

कृष्णः खादनसमकालं पिबति → कृष्णः पिबन् खादति।

राघवः श्रवणसमकालं पठति → राघवः पठन् शृणोति।

केशवः पठनसमकालं क्रीडति → केशवः क्रीडन् पठति।

## 🕮 अधोलिखितानि रूपाणि पठत—

[ अधोलिखित रूपों को पढ़े। Read the following paradigm. ]

| लट्लकारः (प्र. पु. एक.) | | शतृप्रत्ययान्तः (पुं. प्रथमा एक.) |
|---|---|---|
| पठति | → | पठन् |
| लिखति | → | लिखन् |
| वदति | → | वदन् |
| गायति | → | गायन् |
| क्रीडति | → | क्रीडन् |
| गच्छति | → | गच्छन् |
| तिष्ठति | → | तिष्ठन् |
| मिलति | → | मिलन् |
| स्मरति | → | स्मरन् |
| खादति | → | खादन् |

☞ 'पठन्' 'लिखन्' इत्यादीनां शतृप्रत्ययान्तानां मूलरूपं भवति 'पठत्' 'लिखत्' इत्यादि। 'पठत्' इत्यत्र भागद्वयम् — पठ् + अत् इति। 'पठ्' इति धातुः। 'अत्' इति प्रत्ययः। प्रत्ययस्य नाम 'शतृ' (अत्) इति। यस्य रूपस्य अन्ते शतृ (अत्) इति प्रत्ययः भवति तत् शतृ-प्रत्ययान्तम् रूपम्। अतः 'पठत्' लिखत्' 'गच्छत्' 'पिबत्' इत्यादीनि शतृ-प्रत्ययान्तरूपाणि। पुंलिङ्गे 'पठन्, गच्छन्' इत्यादिरीत्या प्रथमा-एकवचने रूपाणि।

## अभ्यासः — 271

✍ **अधोनिर्दिष्टानां क्रियापदानां पुंलिङ्गे शत्रन्तरूपाणि लिखत–**

[ अधोलिखित क्रियापदों का पुंलिङ्ग में शतृप्रत्ययान्त रूप लिखें। Write the masculine forms ending in *śatṛ*-suffix of the following verbal forms. ]

| | | (पुं. प्र. एक.) | | | (पुं. प्र. एक.) |
|---|---|---|---|---|---|
| उदा. | पठति | पठन् | | | |
| 1. | लिखति | | 11. | गणयति | |
| 2. | गच्छति | | 12. | चरति | |
| 3. | जपति | | 13. | उपविशति | |
| 4. | पिबति | | 14. | तिष्ठति | |
| 5. | तरति | | 15. | वहति | |
| 6. | आरोहति | | 16. | ताडयति | |
| 7. | पतति | | 17. | हसति | |
| 8. | नृत्यति | | 18. | हरति | |
| 9. | पश्यति | | 19. | नमति | |
| 10. | भ्रमति | | 20. | रक्षति | |

## अभ्यासः — 272

✍ **अधोलिखितवाक्यानि शतृप्रत्ययान्तप्रयोगे परिवर्तयत–**

[ अधोलिखित वाक्यों को शतृप्रत्ययान्त प्रयोग में वदलें। Change the following sentences into the usages having *śatṛ*-suffix. ]

| | | | | |
|---|---|---|---|---|
| **उदा.** | अहं पठनसमकालं लिखामि। | → | अहं **लिखन् पठामि** | । |
| 1. | सः दर्शनसमकालं वदति। | → | | । |
| 2. | सः पानसमकालं खादति। | → | | । |
| 3. | प्रकाशः स्वपनसमकालं पठति। | → | | । |
| 4. | नागराजः लेखनसमकालं पश्यति। | → | | । |

5. कुशः यजनसमकालं जपति। → ।

6. महिषः भ्रमणसमकालं चरति। → ।

7. राकेशः अवतरणसमकालं वदति। → ।

8. सूदः पचनसमकालं चिन्तयति। → ।

9. कृष्णः गमनसमकालं स्मरति। → ।

10. छात्रः लेखनसमकालं पृच्छति। → ।

11. गुरुः दर्शनसमकालं बोधयति। → ।

12. नर्तकः नर्तनसमकालं गायति। → ।

13. बालः कूर्दनसमकालं पतति। → ।

14. पुरुषः निन्दनसमकालं ताडयति। → ।

15. सुनीलः पाठनसमकालम् आदिशति। → ।

16. जनः क्रीडनसमकालं पश्यति। → ।

17. पिता पठनसमकालम् उपविशति। → ।

18. कृषकः चलनसमकालं कर्षति। → ।

19. भटः भ्रमणसमकालं रक्षति। → ।

20. भक्तः वदनसमकालम् अर्चति। → ।

21. बालः चलनसमकालं हसति। → ।

22. कुमारः खादनसमकालं पिबति। → ।

23. रामः लेखनसमकालं स्मरति। → ।

24. अहं भ्रमणसमकालं न खादामि। → ।

## अधोलिखितानि वाक्यानि पठत—

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

बालकः गीतं **शृण्वन्** लिखति। छात्रः अर्थं **जानन्** पठति।

बालकः कन्दुकं **गृह्णन्** अस्ति। गृहस्वामी वस्तूनि **क्रीणन्** अस्ति।

**अवधेयम्**

**एतेषु वाक्येषु यानि शत्रन्तरूपाणि सन्ति तानि विशिष्टानि सन्ति। पूर्वम् आगतानि (पठति → पठन्, लिखति → लिखन्, गच्छति → गच्छन्) रूपाणि यथा सरलानि एतानि न तथा।**

### एतेषां रूपाणां ज्ञानार्थं मार्गः इत्थम्

शृणोति (एक.) → शृण्वन्ति (बहु.व.) → शृण्वन् (शत्रन्तरूपम्)

गृह्णाति (एक.) → गृह्णन्ति (बहु.व.) → गृह्णन् (शत्रन्तरूपम्)

एवं बहुवचनरूपस्मरणात् शत्रन्तरूपस्य अभिज्ञानं सरलम्। बहुवचनरूपात् 'ति' त्यज्यते चेत् (शृण्वन्ति = शृण्वन्) शत्रन्ते पुं. एकवचनस्य रूपं प्राप्यते।

## अभ्यासः — 273

### अधोनिर्दिष्टक्रियापदानां बहुवचनरूपाणि लिखित्वा पुंलिङ्गे शत्रन्तप्रथमैकवचनरूपाणि लिखत—

**[ अधोनिर्दिष्ट क्रियापदों के बहुवचन रूप लिखकर पुंलिङ्ग में शतृप्रत्ययान्त प्रथमा एकवचन रूप लिखें।** Write the plural forms of the following along with the nominative singular forms ending with the suffix *śatṛ* in masculine gender. ]

| | वर्तमाने एक. | वर्तमाने बहु. | शत्रन्तरूपम् |
|---|---|---|---|
| उदा. | जानाति | जानन्ति | जानन् |
| 1. | क्रीणाति | | |
| 2. | रोदिति | | |
| 3. | विश्वसिति | | |
| 4. | चिनोति | | |

5. करोति
6. शक्नोति
7. वृणोति
8. तनोति
9. दोग्धि
10. रुणद्धि

**अवधेयम्**

| | | | | |
|---|---|---|---|---|
| ददाति | ददत् | ✓ | ददन् | × |
| दधाति | दधत् | ✓ | दधन् | × |
| बिभेति | बिभ्यत् | ✓ | बिभ्यन् | × |

**यथा** बलिः वामनाय भूमिं **ददत्** नमस्कृतवान्।
बिडालः **बिभ्यत्** धावति।

**रूपाणि स्मरत—**
[ रूपों का स्मरण करें। Remember the paradigm. ]

| **मूलशब्दः** | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **पठत्** | पठन् | पठन्तौ | पठन्तः |
| **गच्छत्** | गच्छन् | गच्छन्तौ | गच्छन्तः |
| **लिखत्** | लिखन् | लिखन्तौ | लिखन्तः |

**एवमेव लिखन्, गच्छन्, शृण्वन्, गृह्णन् इत्यादीनि अपि रूपाणि भवन्ति।**

| | | | |
|---|---|---|---|
| **ददत्** | ददत् | ददतौ | ददतः |

**एवमेव दधत्, जुह्वत् इत्यादीनि अपि रूपाणि भवन्ति।**

## अभ्यासः — 274

✍ **पूर्वोक्तानि रूपाणि पुनः स्मरत, तदनुगुणं रिक्तस्थानानि पूरयत–**

[ पूर्वोक्त रूपों का पुनः स्मरण करें। तदनुसार रिक्तस्थानों की पूर्ति करें। Remember the paradigm again which you have already remembered and fill in the blanks accordingly. ]

| मूलशब्दः | एक. | द्वि. | बहु. |
|---|---|---|---|
| उदा. **पठत्** | पठन् | पठन्तौ | पठन्तः |
| **लिखत्** | लिखन् | लिखन्तौ | लिखन्तः |
| **वदत्** | वदन् | वदन्तौ | वदन्तः |
| 1. खादत् | | | |
| 2. पिबत् | | | |
| 3. शृण्वत् | | | |
| 4. जानत् | | | |
| 5. स्मरत् | | | |
| 6. क्रीडत् | | | |
| 7. गायत् | | | |
| 8. अटत् | | | |
| 9. स्थापयत् | | | |
| 10. तिष्ठत् | | | |
| 11. ददत् | | | |

## अभ्यासः — 275

✍ **अधोनिर्दिष्टेषु वाक्येषु विशेष्यानुगुणं शत्रन्तरूपाणि लिखत—**

[ अधोलिखित वाक्यों में विशेष्य के अनुसार शतृ-प्रत्ययान्त रूप लिखें। Write the forms ending in the suffix *śatṛ* as per the qualificands available in the following sentences. ]

**(पुं. प्र.)**

| | | | |
|---|---|---|---|
| **उदा.** | **बालकः (खाद्)** | ......**खादन्**...... | **पठति।** |
| 1. | गायकः सभां {दृश् (पश्य)} | | गायति। |
| 2. | छात्रः शिलां (क्षिप्) | | गच्छति। |
| 3. | ते अर्थं (ज्ञा) | | पठन्ति। |
| 4. | भक्तः मन्त्रं (वद्) | | अर्चति। |
| 5. | पिता पुत्रं (निन्द्) | | ताडयति। |
| 6. | मुनिः देवं {ध्यै (ध्याय्)} | | उपविशति। |
| 7. | ते क्रोधं (कृ) | | उत्तिष्ठन्ति। |
| 8. | अध्यापकः (पाठ्) | | प्रश्नं पृच्छति। |
| 9. | ग्रन्थकारौ (चिन्त्) | | पुस्तकं लिखतः। |
| 10. | अतिथिः वार्तालापं (कृ) | | चायं पिबति। |
| 11. | नर्तकौ (नृत्) | | सभां पश्यतः। |
| 12. | यात्रिकाः (दृश्) | | यानेन गच्छन्ति। |
| 13. | कर्मकरौ (गम्) | | वार्तालापं कुरुतः। |
| 14. | त्वं (ज्ञा) | | अपि न वदसि। |
| 15. | अहं (पठ्) | | एव ह्यः सुप्तवान्। |
| 16. | सभ्याः करतलध्वनिं (कृ) | | हर्षं प्रकटितवन्तः। |
| 17. | वयं (चिन्त्) | | प्रकोष्ठे उपविष्टवन्तः। |
| 18. | यूयं (हस्) | | मा गच्छथ। |
| 19. | आवां कार्यं (कृ) | | कथां श्रुतवन्तौ। |
| 20. | सः (उत् + ष्ठा) | | विरोधं प्रकटितवान्। |
| 21. | ते (धाव्) | | इतस्ततः पश्यन्ति। |

## अभ्यासः — 276

**यथोदाहरणम् अधोलिखितानि वाक्यानि बहुवचने परिवर्तयत–**

[ उदाहरण के अनुसार अधोलिखित वाक्यों को बहुवचन में वदलें। Change the following sentences into plural as shown in the example. ]

| | | | |
|---|---|---|---|
| उदा. | **जनः पिबन् न खादति।** | → | **जनाः पिबन्तः न खादन्ति** । |
| 1. | बालः गच्छन् पठति। | → | । |
| 2. | वृद्धः पश्यन् चलति। | → | । |
| 3. | गुरुः स्मरन् बोधयति। | → | । |
| 4. | कविः चिन्तयन् लिखति। | → | । |
| 5. | भक्तः मन्त्रं वदन् पूजयति। | → | । |
| 6. | सेवकः खादन् पिबति। | → | । |
| 7. | छात्रः पृच्छन् लिखति। | → | । |
| 8. | शिक्षकः लिखन् वदति। | → | । |
| 9. | तरुणः नृत्यन् गायति। | → | । |
| 10. | बालः पठन् निद्राति। | → | । |
| 11. | पण्डितः वदन् न खादति। | → | । |
| 12. | रुग्णः चिन्तयन् स्वपिति। | → | । |
| 13. | गायकः पश्यन् गायति। | → | । |
| 14. | नाविकः गायन् चालयति। | → | । |
| 15. | लेखकः स्मरन् लिखति। | → | । |
| 16. | आरक्षकः ताडयन् निन्दति। | → | । |
| 17. | आचार्यः पाठयन् उपविशति। | → | । |
| 18. | छात्रः जानन् अपि न वदति। | → | । |
| 19. | किशोरः धावन् गच्छति। | → | । |
| 20. | युवकः गच्छन् वदति। | → | । |
| 21. | नर्तकः नृत्यन् उपविशति। | → | । |
| 22. | चालकः पृच्छन् गच्छति। | → | । |
| 23. | चोरः धावन् प्रविशति। | → | । |
| 24. | अर्चकः जपन् पूजयति। | → | । |
| 25. | अहं हसन् न वदामि। | → | । |

## प्रथमा-प्रयोगाः (स्त्रीलिङ्गे)

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढें। Read the following sentences. ]



नटी **गायन्ती** नृत्यति।



बालिका **खादन्ती** क्रीडति।



राधा **हसन्ती** मालां रचयति।



महिला गीतं **शृण्वन्ती** पचति।



पार्वती **जपन्ती** शिवम् अर्चति।



इन्दिरा **वदन्ती** जनान् बोधयति।

## अधोलिखितानि वाक्यानि पठत–

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

छात्रा **पठन्ती** लिखति ।

नटी **गायन्ती** नृत्यति ।

राधा **हसन्ती** गच्छति ।

माता **जपन्ती** पूजयति ।

धेनुः **पश्यन्ती** चरति ।

रेखा **खादन्ती** भ्रमति ।

☞ **स्थूलाक्षरैः लिखितानि पदानि शत्रन्त-स्त्रीलिङ्गे प्रथमैकवचने सन्ति।**

**अवधेयम्**

'पठन्ती, गायन्ती, हसन्ती' इत्यादीनि शत्रन्तस्त्रीलिङ्ग-रूपाणि ईकारान्त-स्त्रीलिङ्गवत् भवन्ति। **यथा**

| **मूलशब्दः** | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| **नदी** | नदी | नद्यौ | नद्यः |
| **पठन्ती** | पठन्ती | पठन्त्यौ | पठन्त्यः |

## अधोलिखितानि रूपाणि स्मरत–

[ अधोलिखित रूपों का स्मरण करें। Remember the following declension. ]

| **एक.** | **द्वि.** | **बहु.** |
|---|---|---|
| लिखन्ती | लिखन्त्यौ | लिखन्त्यः |
| गच्छन्ती | गच्छन्त्यौ | गच्छन्त्यः |
| भ्रमन्ती | भ्रमन्त्यौ | भ्रमन्त्यः |
| स्मरन्ती | स्मरन्त्यौ | स्मरन्त्यः |
| गायन्ती | गायन्त्यौ | गायन्त्यः |

## अभ्यासः — 277

✍ **अधोलिखितानि क्रियापदानि शत्रन्त-स्त्रीलिङ्ग-रूपेषु परिवर्तयत—**

[ अधोलिखित क्रियापदों को शत्रन्त स्त्रीलिङ्ग रूप में बदलें। Convert the following verbal forms into the words ending in *śatṛ*-suffix in feminine. ]

| | | | | | | |
|---|---|---|---|---|---|---|
| उदा. | **पठति** | – ...**पठन्ती**... | | 15. | अटति | – |
| 1. | गायति | – | | 16. | चरति | – |
| 2. | लिखति | – | | 17. | गच्छति | – |
| 3. | पतति | – | | 18. | वदति | – |
| 4. | खादति | – | | 19. | पृच्छति | – |
| 5. | क्रीडति | – | | 20. | पश्यति | – |
| 6. | स्मरति | – | | 21. | तर्जयति | – |
| 7. | नयति | – | | 22. | क्षालयति | – |
| 8. | निन्दति | – | | 23. | प्रेषयति | – |
| 9. | मिलति | – | | 24. | सूचयति | – |
| 10. | कर्षति | – | | 25. | कर्तयति | – |
| 11. | तरति | – | | 26. | मार्जयति | – |
| 12. | चलति | – | | 27. | पिबति | – |
| 13. | रटति | – | | 28. | तिष्ठति | – |
| 14. | भवति | – | | 29. | उपविशति | – |

## अभ्यासः — 278

✍ **यथोदाहरणं रिक्तस्थानं पूरयत—**

[ यथोदाहरण रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | | |
|---|---|---|---|---|
| **बालिका पठति,** | **खादति अपि** | = | **बालिका खादन्ती पठति।** |
| **(बालिका पठनसमकालं खादति)** | | | |

| | | | | |
|---|---|---|---|---|
| **यथा** | नायिका नृत्यति, | गायति अपि। | = | नायिका **गायन्ती** नृत्यति । |
| 1. | छात्रा पठति, | लिखति अपि। | = | । |
| 2. | बाला क्रीडति, | वदति अपि। | = | । |
| 3. | वृद्धा खादति, | पिबति अपि। | = | । |
| 4. | स्वामिनी सूचयति, | तर्जयति अपि। | = | । |
| 5. | सेविका मार्जयति, | प्रक्षालयति अपि। | = | । |
| 6. | राधा गच्छति, | पठति अपि। | = | । |
| 7. | सुधा लिखति, | गायति अपि। | = | । |
| 8. | सा पश्यति, | हसति अपि। | = | । |
| 9. | एषा निन्दति, | गच्छति अपि। | = | । |
| 10. | गौरी शाकं क्षालयति, | पचति अपि। | = | । |
| 11. | नर्तकी गायति, | स्मरति अपि। | = | । |
| 12. | माला पृच्छति, | लिखति अपि। | = | । |
| 13. | तारा भ्रमति, | खादति अपि। | = | । |
| 14. | सुमित्रा चुटति, | हसति अपि। | = | । |
| 15. | सा गायति, | वयति अपि। | = | । |
| 16. | धेनुः पश्यति, | चरति अपि। | = | । |

17. माता पूजयति, जपति अपि। = ।

18. एषा ददाति, गणयति अपि। = ।

19. भिक्षुकी याचति, अटति अपि। = ।

20. शिक्षिका बोधयति, चिन्तयति अपि। = ।

21. बाला हरति, हसति अपि। = ।

22. भक्ता वदति, नमति अपि। = ।

23. लता उपविशति, पठति अपि। = ।

24. चालिका चालयति, पश्यति अपि। = ।

25. छात्रा खादति, पठति अपि = ।

26. कुसुमा वदति, उपदिशति अपि = ।

27. बाला हसति, पतति अपि = ।

28. सा तर्जयति, स्पृशति अपि = ।

29. रमा जले तरति, क्रन्दति अपि = ।

30. शीला पठति, अवतरति अपि = ।

31. माला लिखति, चिन्तयति अपि = ............................................. ।

32. छात्रा पृच्छति, स्मरति अपि = ।

33. लता खादति, पचति अपि = ।

34. राधा पिबति, वदति अपि = ।

35. सहोदरा पतति, भ्रमति अपि = ।

36. बाला धावति, हसति अपि = ।

37. वनिता सीव्यति, निन्दति अपि = ।

38. सा रक्षति, भ्रमति अपि = ।

39. ममता वदति, अर्चति अपि = ।

## ✍ अधोलिखितानि वाक्यानि पठत—

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

बाला **पठन्ती** लिखति

बाला **गायन्ती** नृत्यति

बाला **वदन्ती** पृच्छति

बाला **क्रीडन्ती** हसति

बाला **जानती** अपि न वदति।

बाला कार्यं **कुर्वती** तिष्ठति।

बाला गीतं **शृण्वती** नृत्यति।

बाला पुस्तकं **क्रीणती** वदति।

### अवधेयम्

☞ **अत्र स्थूलाक्षरैः दत्तानि रूपाणि अपि स्त्रीलिङ्गे शतृप्रत्ययान्तानि सन्ति।**

***नियमाः*** ⇨ 'ति' प्रत्ययतः पूर्वं ह्रस्वः अकारः अस्ति चेत् शतृप्रत्ययान्ते स्त्रीलिङ्गे नकारः (नुम्) करणीयः। भ्वादि-दिवादि-चुरादिगणपठिताः धातवः अत्र अन्तर्भवन्ति।

⇨ अन्यः कोऽपि स्वरः अस्ति चेत् (आ, इ, उ, ओ इत्यादयः) नकारः (नुम्) न करणीयः।

***विशेषः*** ⇨ क्वचित् 'ति' इत्यस्मात् पूर्वं ह्रस्वे अकारे सति अपि नकारसहितं नकाररहितं वा रूपम् भवति। यथा तुदन्ती/तुदती, लिखन्ती/लिखती इत्यादि।

⇨ 'ति' तः पूर्वं दीर्घे आकारे सति अपि नकारसहितं नकाररहितम् उभयं रूपं भवति। यथा– भान्ती/भाती, यान्ती/याती इत्यादि।

**पठ [ति]** —'ति'-प्रत्ययतः पूर्वं ह्रस्वः अकारः अस्ति→ **[नकारः करणीयः]** → **पठन्ती**

**करो [ति]** —'ति'-प्रत्ययतः पूर्वं ह्रस्वः अकारः न अस्ति→ **[नकारः न करणीयः]** → **कुर्वती**

## अभ्यासः — 279

✍ **अधोनिर्दिष्टक्रियापदानां शत्रन्तस्त्रीलिङ्गरूपाणि सूचितक्रमम् अनुसरन्तः लिखत–**

[ अधोनिर्दिष्ट क्रियापदों का शत्रन्त स्त्रीलिङ्ग रूप दिये गए क्रम के अनुसार लिखें। Write the feminine forms ending in *śatṛ*-suffix as the order followed in the example. ]

| तिप्रत्ययान्तं रूपम् (वर्तमाने प्र.पु. एकवचने) | वर्त. बहु. | शतृ पुं. | 'ति'-तः पूर्वम् ह्रस्वः अकारः अस्ति (√) / नास्ति (×) | नकारः करणीयः (√)/ न करणीयः (×) | शतृ स्त्री. लिङ्गरूपम् |
|---|---|---|---|---|---|
| उदा. (पठ्) पठति | पठन्ति | पठन् | अस्ति | करणीयः | पठन्ती |
| 1. लिखति | | | | | |
| 2. शृणोति | | | | | |
| 3. जानाति | | | | | |
| 4. गच्छति | | | | | |
| 5. करोति | | | | | |
| 6. रोदिति | | | | | |
| 7. हसति | | | | | |
| 8. तिष्ठति | | | | | |
| 9. बध्नाति | | | | | |
| 10. गृह्णाति | | | | | |
| 11. पृच्छति | | | | | |
| 12. चिनोति | | | | | |
| 13. शक्नोति | | | | | |

## अभ्यासः – 280

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत–**

[ यथोदाहरण रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | | | |
|---|---|---|---|---|---|
| **यथा** | माता गायति, | पुष्पाणि **चिनोति** अपि। | → | माता **गायन्ती** पुष्पाणि चिनोति। | । |
| 1. | छात्रा गीतं शृणोति, | पठति अपि। | → | | । |
| 2. | लता उत्तरं जानाति, | वदति अपि। | → | | । |
| 3. | मालती गायति, | स्नाति अपि। | → | | । |
| 4. | राधिका गृह्णाति, | चलति अपि। | → | | । |
| 5. | सुषमा शृणोति, | पृच्छति अपि। | → | | । |
| 6. | विदिता रोदिति, | गच्छति अपि। | → | | । |
| 7. | सेविका भ्रमति, | कार्यं करोति अपि। | → | | । |
| 8. | गोपी कृष्णं स्मरति, | क्षीरं दोग्धि अपि। | → | | । |
| 9. | बालिका गीतं गायति, | प्रीणाति अपि। | → | | । |
| 10. | तारा निद्राति, | पठति अपि। | → | | । |
| 11. | बाला रोदिति, | अश्नाति अपि। | → | | । |
| 12. | नटी मेखलां बध्नाति, | नृत्यति अपि। | → | | । |
| 13. | ज्योतिः धनं ददाति, | वदति अपि। | → | | । |
| 14. | सुनयना कार्यं करोति, | पठति अपि। | → | | । |

## अभ्यासः — 281

✍ **उदाहरणानुगुणं शत्रन्तस्त्रीलिङ्गे द्विवचन-बहुवचनरूपाणि लिखत—**

[ उदाहरण के अनुसार शतृप्रत्ययान्त स्त्रीलिङ् में द्विवचन एवं बहुवचन रूप लिखें। Write the dual as well as plural feminine forms ending in *śatṛ*-suffix as shown in the example. ]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| उदा. | पठन्ती | पठन्त्यौ | पठन्त्यः |
| 1. | वदन्ती | | |
| 2. | पचन्ती | | |
| 3. | मिलन्ती | | |
| 4. | खादन्ती | | |
| 5. | पिबन्ती | | |
| 6. | स्मरन्ती | | |
| 7. | चरन्ती | | |
| 8. | लिखन्ती | | |
| 9. | शृण्वती | | |
| 10. | जानती | | |
| 11. | बध्नती | | |
| 12. | कुर्वती | | |
| 13. | शक्नुवती | | |
| 14. | गच्छन्ती | | |
| 15. | स्नाती | | |

## अभ्यासः — 282

✍ **यथोदाहरणं रिक्तस्थानानि पूरयत–**

[उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example.]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| उदा. | **बाला पिबन्ती भ्रमति।** | **बाले पिबन्त्यौ भ्रमतः।** | **बालाः पिबन्त्यः भ्रमन्ति।** |
| 1. | छात्रा पठन्ती लिखति। | । | । |
| 2. | गायिका शृण्वती गायति। | । | । |
| 3. | । | नायिके वदन्त्यौ गच्छतः। | । |
| 4. | चिकित्सिका पृच्छन्ती सेवां करोति। | । | । |
| 5. | । | । | तरुण्यः गायन्त्यः गच्छन्ति। |
| 6. | । | छात्रे हसन्त्यौ वदतः। | । |
| 7. | । | । | ताः जानत्यः अपि वदन्ति। |
| 8. | एषा रुदती पठति। | । | । |
| 9. | । | । | सख्यः रटन्त्यः शृण्वन्ति। |
| 10. | सा क्रीणती गच्छति। | । | । |
| 11. | । | । | भगिन्यः ताडयन्त्यः वदन्ति। |
| 12. | । | । | मातरः अर्चन्त्यः श्लोकं वदन्ति। |
| 13. | । | धेनू चरन्त्यौ गच्छतः। | । |
| 14. | । | । | महिलाः रटन्त्यः पचन्ति। |
| 15. | वृद्धा स्मरन्ती वदति। | । | । |

| | | | |
|---|---|---|---|
| 16. | । | । | अजाः चरन्त्यः पश्यन्ति। |
| 17. | । | बाले लिखन्त्यौ पठतः। | । |
| 18. | एषा प्रक्षालयन्ती खादति। | । | । |
| 19. | । | गृहिण्यौ पचन्त्यौ खादतः। | । |
| 20. | महिला जल्पन्ती कार्यं करोति। | । | । |
| 21. | । | । | सख्यः क्रीडन्त्यः पठन्ति। |
| 22. | । | नट्यौ नृत्यन्त्यौ वदतः। | । |
| 23. | । | छात्रे कार्यं कुर्वत्यौ उपविशतः। | । |
| 24. | भगिनी उपविशन्ती गायति। | । | । |

## अभ्यासः — 283

✍ **अधोनिर्दिष्ट-वाक्यानि उचित-शत्रन्तरूपैः पूरयत—**

[ अधोनिर्दिष्ट वाक्यों को उचित शत्रन्त रूपों से पूरा करें। Complete the following sentences with appropriate forms ending in *śatṛ*-suffix. ]


| | | | | |
|---|---|---|---|---|
| **उदा.** | बालिका | (गै) | **गायन्ती** | पाकं करोति। |
| 1. | सा | (लिख्) | | वाक्यं चिन्तयति। |
| 2. | एषा | (श्रु) | | वाक्यं लिखति। |
| 3. | माता | (पा) | | गीतं शृणोति। |
| 4. | गृहिणी पुत्रं | (स्मृ) | | चायं पिबति। |
| 5. | वृद्धा पत्रिकां | (पठ्) | | बाल्यं स्मरति। |
| 6. | बालिका अर्थं | (ज्ञा) | | पाठं लिखति। |

| | | | |
|---|---|---|---|
| 7. | सेविका कार्यं | (कृ) | कार्यगौरवं ज्ञातवती । |
| 8. | माला इतस्ततः | (दृश् = पश्य्) | कार्यं करोति । |
| 9. | नर्तकी | (नृत्) | सभां पश्यति । |
| 10. | उमा गीतं | (गै) | नृत्यति । |
| 11. | गोपिका कृष्णं | (ध्यै) | मार्गे गच्छति । |
| 12. | माला मार्गे | (गम्) | सखीं दृष्टवती । |
| 13. | बालिका दूरदर्शनं | (दृश् = पश्य्) | भोजनं करोति । |
| 14. | विक्रेत्री वस्तूनि | (यच्छ्) | वार्तालापं करोति । |
| 15. | अहं (स्त्री) | (चिन्त्) | वाक्यानि लिखामि । |
| 16. | त्वं धर्मं | (ज्ञा) | अधर्मम् आचरितवती । |
| 17. | वयं | (जल्प्) | नगरं गतवत्यः । |
| 18. | ताः | (धाव्) | यानसमीपं गतवत्यः । |
| 19. | सर्वाः आदेशं | (पाल्) | उत्थितवत्यः । |
| 20. | पार्वती शिवं | (जप) | तपः कृतवती । |
| 21. | सीता | (रुद्) | रामम् अनुसृतवती । |
| 22. | कौसल्या | (वि-लप्) | प्रासादे स्थितवती । |
| 23. | गृहिणी | (परि-वेष्) | अनुरोधं कृतवती । |
| 24. | यूयं | (क्री) | मूल्यं विचारितवत्यः । |
| 25. | त्वं पुष्पाणि | (अव-चि) | उद्याने सञ्चारं कृतवती । |


## प्रथमा-प्रयोगाः (नपुंसकलिङ्गे)

**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढें। Read the following sentences. ]




यानं **गच्छत्** अस्ति।



पर्णं **पतत्** अस्ति।




**पुष्पं विकसत् अस्ति।**



चक्रं **भ्रमत्** अस्ति।



जलं **वहत्** अस्ति।



नक्षत्रं **राजत्** अस्ति।

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

यानं **गच्छत्** अस्ति।

पर्णं **पतत्** अस्ति।

पुष्पं **विकसत्** अस्ति।

जलं **वहत्** अस्ति।

चक्रं **भ्रमत्** अस्ति।

मित्रं **शृण्वत्** अस्ति।

नक्षत्रं **राजत्** अस्ति।

शिबिरं **प्रचलत्** अस्ति।

शरीरं **नश्यत्** अस्ति।

नटानां कुलं **नृत्यत्** अस्ति।

**उपरि निर्दिष्टेषु वाक्येषु 'गच्छत्' 'पतत्' 'विकसत्' इत्यादीनि शत्रन्तनपुंसकरूपाणि प्रथमाविभक्तौ एकवचने सन्ति।**

एतानि प्रायः पुंलिङ्गरूपवत् भवन्ति। पुंलिङ्गे 'गच्छन्' 'पठन्' इति अन्ते नकारः श्रूयते। नपुंसके तु 'गच्छत्' 'पठत्' इति तकारः श्रूयते। पुंलिङ्गे नपुंसके च प्रथमा-द्वितीयाविभक्त्योः रूपेषु भेदः भवति। अन्यासु विभक्तिषु पुंलिङ्गवदेव रूपाणि भवन्ति।

**अधोनिर्दिष्टानि शत्रन्तरूपाणि सावधानं पठत–**

[ अधोलिखित शत्रन्त रूपों को ध्यान से पढ़ें। Read carefully the following forms ending in *śatṛ*-suffix. ]

| लटि रूपम् | शत्रन्तं रूपम् नपुंसके |
|---|---|
| गच्छति | गच्छत् |
| पठति | पठत् |
| लिखति | लिखत् |
| जानाति | जानत् |
| वहति | वहत् |

## अभ्यासः — 284

✍ **उदाहरणानुगुणं पूरयत—**

[ उदाहरण के अनुसार पूरा करें। Complete as shown in the example. ]

**यथा-** **करोति** → ........**कुर्वत्**........

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1. | शृणोति | → | | 11. | शुष्यति | → | |
| 2. | पतति | → | | 12. | गणयति | → | |
| 3. | जनयति | → | | 13. | तुष्यति | → | |
| 4. | आचरति | → | | 14. | पिबति | → | |
| 5. | स्फुरति | → | | 15. | नृत्यति | → | |
| 6. | विकसति | → | | 16. | चालयति | → | |
| 7. | तिष्ठति | → | | 17. | रमयति | → | |
| 8. | वदति | → | | 18. | भजति | → | |
| 9. | रक्षति | → | | 19. | दर्शयति | → | |
| 10. | जिघ्रति | → | | 20. | हरति | → | |

## अभ्यासः — 285

✍ **अधोनिर्दिष्टवाक्येषु तिङन्तपदानि शत्रन्तरूपेषु परिवर्त्य वाक्यानि पुनः लिखत—**

[ अधोनिर्दिष्ट वाक्यों में तिङन्त पदों को शत्रन्त रूप में परिवर्तन कर वाक्यों को पुनः लिखें। Rewrite the sentences by converting the verbal forms into the forms ending in *śatṛ*-suffix. ]

| | | | |
|---|---|---|---|
| **यथा** | मार्गे वाहनं **गच्छति**। | → | मार्गे वाहनं ........**गच्छत्**........ अस्ति। |
| 1. | नलात् जलं निर्गच्छति। | → | । |
| 2. | मम युतकं नश्यति। | → | । |
| 3. | भवतः अध्ययनं कथं प्रचलति ? | → | । |
| 4. | वनं नश्यति। | → | । |
| 5. | यन्त्रम् उच्चैः शब्दं करोति। | → | । |
| 6. | वृक्षात् पर्णं पतति। | → | । |

**अधोनिर्दिष्टानि शत्रन्तनपुंसकरूपाणि अवधानेन पठत—**

[ अधोनिर्दिष्ट शत्रन्त नपुंसक रूपों को ध्यान से पढ़ें। Read carefully the forms ending in *śatṛ*-suffix in neuter gender. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| पठत् | पठती | पठन्ति |
| चलत् | चलती | चलन्ति |
| भवत् | भवती | भवन्ति |
| तुदत् | तुदती | तुदन्ति |
| पतत् | पतती | पतन्ति |
| कुर्वत् | कुर्वती | कुर्वन्ति |
| गच्छत् | गच्छती | गच्छन्ति |
| रुदत् . | रुदती | रुदन्ति |

**शत्रन्तनपुंसकरूपाणां वाक्येषु प्रयोगं पश्यत—**

[ शतृ-प्रत्ययान्त नपुंसक रूपों का वाक्यों में प्रयोग देखें। Observe the usages of *śatṛ*-suffix in neuter gender in the following sentences. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| मम मित्रं **पठत्** अस्ति। | मम मित्रे **पठती** स्तः। | मम मित्राणि **पठन्ति** सन्ति। |
| पर्णं **पतत्** अस्ति। | पर्णे **पतती** स्तः। | पर्णानि **पतन्ति** सन्ति। |

## अभ्यासः — 286

**उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks on the basis of the examples. ]

उदा. एक. द्वि. बहु.

यानं ........**चलत्**........ अस्ति।

याने ........**चलती**........ स्तः।

यानानि ........**चलन्ति**........ सन्ति।

1. उद्याने पुष्पं विकसत् अस्ति।

उद्याने पुष्पे स्तः।

उद्याने पुष्पाणि सन्ति।

2. पुराणं वस्त्रं नश्यत् अस्ति।

पुराणे वस्त्रे स्तः।

पुराणानि वस्त्राणि सन्ति।

3. दूरदर्शनं चित्रं प्रदर्शयत् अस्ति।

दूरदर्शने चित्रं स्तः।

दूरदर्शनानि चित्राणि सन्ति।

4. नयनं स्फुरत् अस्ति।

नयने स्तः।

नयनानि सन्ति।

5. नेत्रात् अश्रु गलत् अस्ति।

नेत्राभ्यां अश्रुणी स्तः।

नेत्रेभ्यः अश्रूणि सन्ति।

6. मुखं लसत् अस्ति।

मुखे स्तः।

मुखानि सन्ति।

7. श्रवणेन्द्रियं शृण्वत् अस्ति।

श्रवणेन्द्रिये स्तः।

श्रवणेन्द्रियाणि सन्ति।

8. मम मनः गतं वृत्तान्तं स्मरत् अस्ति।

आवयोः मनसी गतं वृतान्तं स्तः।

अस्माकं मनांसि गतं वृत्तान्तं सन्ति।

## अभ्यासः – 287

✍ **प्रथमस्य तिङन्तरूपस्य स्थाने शत्रन्तरूपं प्रयुज्य वाक्यं लिखत–**

[प्रथम तिङन्त रूप के स्थान में शतृप्रत्ययान्त रूप प्रयोग कर वाक्य लिखें। Write the sentence by using the forms ending in *śatṛ*-suffix in place of the first verbal form. ]

**यथा** जलं स्रवति, शब्दं करोति। ........**जलं स्रवत् शब्दं करोति**........ ।

1. बसयानम् अग्रे गच्छति, धूमं विसृजति। ।
2. चक्रं शब्दं करोति, वेगेन भ्रमति। .................................................. ।
3. नयनं स्फुरति, शुभं सूचयति। ।
4. मित्रम् आगच्छति, 'हरिः ओम्' कथयति। .................................................. ।
5. कपिदलं पश्यति, फलानि खादति। ।
6. विमानं जनान् नयति। आकाशे गच्छति। ।
7. पुष्पं विकसति, गन्धं प्रसारयति। ।
8. कमलं सूर्यं पश्यति, विकासं प्राप्नोति। ।
9. वस्त्रं नश्यति, छिन्नं भवति। ।
10. चर्म शुष्यति, कृष्णवर्णतां प्राप्नोति। ।

# षष्ठः स्तबकः

## 6.2 द्वितीयः पाठः

### [ शतृ-प्रत्ययान्त-रूपम् ]

**द्वितीया-प्रयोगाः**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**




रमेशः पठति।



सुरेशः तं पश्यति।

=



सुरेशः **पठन्तं रमेशं** पश्यति।



चोरः धावति।



आरक्षकः तम् अनुधावति।

=



आरक्षकः **धावन्तं चोरम्** अनुधावति।

**स्त्री.**




लता गच्छति।




माला ताम् अनुसरति।


=



माला **गच्छन्तीं लताम्** अनुसरति।




बालिका पिबति।




माता तां शाययति।

=




माता **पिबन्तीं बालिकां** शाययति।

**नपुं.**




यानं गच्छति।



रामः यानम् आरोहति।

=



रामः **गच्छत् यानम्** आरोहति।

**त्रिषु लिङ्गेषु द्वितीयान्त-रूपाणि**

**अधोलिखितानि रूपाणि स्मरत—**

[ अधोलिखित रूपों का स्मरण करें। Remember the following declension. ]

**पुं.**

| **मूलशब्दः** | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| पठत् | पठन्तम् | पठन्तौ | पठतः |
| लिखत् | लिखन्तम् | लिखन्तौ | लिखतः |
| गच्छत् | गच्छन्तम् | गच्छन्तौ | गच्छतः |
| पिबत् | पिबन्तम् | पिबन्तौ | पिबतः |
| धावत् | धावन्तम् | धावन्तौ | धावतः |
| पश्यत् | पश्यन्तम् | पश्यन्तौ | पश्यतः |

**स्त्री.**

| | | | |
|---|---|---|---|
| पठत् | पठन्तीम् | पठन्त्यौ | पठन्तीः |
| लिखत् | लिखन्तीम् | लिखन्त्यौ | लिखन्तीः |
| गच्छत् | गच्छन्तीम् | गच्छन्त्यौ | गच्छन्तीः |
| पिबत् | पिबन्तीम् | पिबन्त्यौ | पिबन्तीः |
| धावत् | धावन्तीम् | धावन्त्यौ | धावन्तीः |
| पश्यत् | पश्यन्तीम् | पश्यन्त्यौ | पश्यन्तीः |

**नपुं.**

| | | | |
|---|---|---|---|
| पठत् | पठत् | पठती | पठन्ति |
| लिखत् | लिखत् | लिखती | लिखन्ति |
| गच्छत् | गच्छत् | गच्छती | गच्छन्ति |
| पिबत् | पिबत् | पिबती | पिबन्ति |
| धावत् | धावत् | धावती | धावन्ति |
| पश्यत् | पश्यत् | पश्यती | पश्यन्ति |

⇒ **प्रथमायां द्वितीयायां च नपुंसके समान-रूपाणि एव भवन्ति।**

## अभ्यासः — 288

✍ **उदाहरणानुसारं रिक्तस्थानं पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example. ]

**पुं.**

I.

| | | | |
|---|---|---|---|
| ईश्वरः | (नमत्) ......**नमन्तं**...... | भक्तं | रक्षति । |
| | (ध्यायत्) | मुनिं | प्रेरयति । |
| | (जपत्) | बालकं | प्रसादयति । |
| | (वदत्) | अर्जुनं | बोधयति । |
| | (स्मरत्) | सज्जनम् | अनुगृह्णाति । |

II.

| | | | |
|---|---|---|---|
| शिक्षकः | (पठत्) | छात्रं | प्रेरयति । |
| | (भ्रमत्) | बालकं | तर्जयति । |
| | (चिन्तयत्) | शिष्यं | पृच्छति । |
| | (वितरत्) | माणवकं | प्रसादयति । |
| | (क्रीडत्) | छात्रं | वारयति । |

III.

| | | | |
|---|---|---|---|
| आरक्षकः | (पीडयत्) | चोरं | गृह्णाति । |
| | (आगच्छत्) | यात्रिकं | स्थगयति । |
| | (भषत्) | शुनकं | ताडयति । |
| | (ज्वलत्) | कुटीरं | निर्वापयति । |
| | (तिष्ठत्) | नागरिकम् | अपसारयति । |

**स्त्री.**

IV.

| | | | |
|---|---|---|---|
| **शिक्षिका** | (ताडयत्) ताडयन्तीं | बालिकां | तर्जयति । |
| | (लिखत्) | राधां | पृच्छति । |
| | (सूचयत्) | छात्राम् | अनुसरति । |
| | (नृत्यत्) | नर्तकीम् | आह्वयति । |
| | (वदत्) | सेविकाम् | उपदिशति । |

V.

| | | | |
|---|---|---|---|
| **माता** | (पठत्) | पुत्रीं | निर्दिशति । |
| | (चलत्) | भगिनीं | प्रेरयति । |
| | (पतत्) | बालिकां | रक्षति । |
| | (भ्रमत्) | महिलां | बोधयति । |
| | (धावत्) | मयूरीं | पश्यति । |

**नपुं.**

VI.

| | | | |
|---|---|---|---|
| **शिशुः** | (चलत्) | यानं | पश्यति । |
| | (पतत्) | पत्रं | नयति । |
| | (तिष्ठत्) | वाहनं | स्पृशति । |
| | (विकसत्) | पुष्पं | त्रोटयते । |
| | (भ्रमत्) | चक्रं | पश्यति । |

## अभ्यासः — 289

**यथोदाहरणं रिक्तस्थानं पूरयत–**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| एक. | द्वि. | बहु. |
|---|---|---|
| **यथा** शिक्षकः **पठन्तं छात्रम्** आह्वयति । | | |
| | शिक्षकः **पठन्तौ छात्रौ** आह्वयति । | |
| | | शिक्षकः **पठतः छात्रान्** आह्वयति । |
| 1. सज्जनः पतन्तं जनं गृह्णाति । | | |
| | । | |
| | | । |
| 2. । | | |
| | रामः खादन्तौ मर्कटौ पश्यति । | |
| | | । |
| 3. । | | |
| | । | |
| | | ईश्वरः ध्यायतः भक्तान् रक्षति । |
| 4. धनिकः कर्षन्तं कृषिकं प्रेरयति । | | |
| | । | |
| | | । |
| 5. । | | |
| | । | |
| | | चोरः भषतः शुनकान् ताडयति । |
| 6. । | | |
| | पशुपालकः चरन्तौ वृषभौ अपनयति । | |
| | | |

7. माता चुम्बन्तं बालम् आलिङ्गति ।

।

।

8. ।

।

नटः उपविशतः ब्राह्मणान् नमति ।

9. ........................................................ ।

अपसिद्धान्तं खण्डयन्तौ शास्त्रकारौ वदतः ।

।

10. वृद्धः भारं वहन्तं युवकम् अनुसरति ।

।

।

## अभ्यासः — 290

**यथोदाहरणं रिक्तस्थानं पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

**एक.** **द्वि.** **बहु.**

**यथा** वृद्धा **पचन्तीं सेविकाम्** उपदिशति ।

वृद्धा **पचन्त्यौ सेविके** उपदिशति ।

वृद्धा **पचन्तीः सेविकाः** उपदिशति ।

1. ।

।

माता ध्यायन्तीः बालिकाः पश्यति ।

2. सेवकः तिष्ठन्तीं राज्ञीं प्रणमति ।

।

3. ।

नायकः नृत्यन्त्यौ नर्तक्यौ अपश्यत् ।

।

4. ।

।

छात्रः पाठयन्तीः शिक्षिकाः अनुसरति ।

5. अध्यक्षः गायन्तीं महिलाम् आह्वयति ।

।

।

## अभ्यासः — 291

✍ **यथोदाहरणं रिक्तस्थानं पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| एक. | द्वि. | बहु. |
|---|---|---|

**यथा** बालकः **पतत् पत्रम्** आनयति ।

बालकः **पतती पत्रे** आनयति ।

बालकः **पतन्ति पत्राणि** आनयति ।

1. भृत्यः अवतारयत् वस्तु नयति ।

।

।

2. ।

शिशुः चलती याने पश्यति ।

।

3. ........................................ ।

।

गोविन्दः चलन्ति व्यजनानि स्थगयति ।

4. चालकः तिष्ठत् वाहनं चालयति।

।

।

5. पुरुषः विलसत् पुष्पं त्रोटयति।

।

........................................................................ ।

## अभ्यासः — 292

### यथोदाहरणं रिक्तस्थानं पूरयत—

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | | | |
|---|---|---|---|---|---|
| **यथा** | अहं | **धावन्तम्** | अश्वम् | आरोहामि। | ( धावत् ) |
| 1. | देवः | | भक्तं | प्रसीदति। | ( ध्यायत् ) |
| 2. | बालकः | | व्यजनं | स्थगयति। | ( चलत् ) |
| 3. | माता | | पुत्रीं | प्रेरयति। | ( तिष्ठत् ) |
| 4. | गुरुः | | शिष्यां | दण्डयति। | ( प्रहरत् ) |
| 5. | कर्मकारः | | यानं | पश्यति। | ( तिष्ठत् ) |
| 6. | बालिका | | फलं | स्वीकरोति। | ( पतत् ) |
| 7. | अहं | | मातरं | पृच्छामि। | ( चिन्तयत् ) |
| 8. | शिशुः | | जलं | स्थगयति। | ( स्रवत् ) |
| 9. | माला | | सीताम् | उपदिशति। | ( हसत् ) |
| 10. | यात्री | | नगरं | गच्छति। | ( विलसत् ) |
| 11. | नाविकः | | नौकां | स्थगयति। | ( चलत् ) |
| 12. | मालाकारः | | पुष्पं | स्पृशति। | ( विकसत् ) |
| 13. | लता | | पुरुषं | स्मरति। | ( प्रेषयत् ) |
| 14. | बालः | | क्रीडकम् | अनुकरोति। | ( गच्छत् ) |
| 15. | चित्रकारः | | सूर्यं | पश्यति। | ( उद्यत् ) |
| 16. | छात्रः | | शिक्षिकां | प्रणमति। | ( उपदिशत् ) |
| 17. | पिता | | बालं | बोधयति। | ( क्रन्दत् ) |
| 18. | ग्रामनायकः | | नागरिकं | निष्कासयति। | ( वसत् ) |

# षष्ठः स्तबकः

## 6.3 तृतीयः पाठः

### [ शतृ-प्रत्ययान्त-रूपम् ]

**तृतीया-प्रयोगाः**

**कर्तरि कर्मणि भावे च प्रयोगान् पश्यत–**

[ कर्तृवाच्य, कर्मवाच्य एवं भाववाच्य के प्रयोगों को देखें। Observe the usages of active, passive and *bhāvavācya*. ]

| कर्तरि प्रयोगाः | कर्मणि / भावे प्रयोगाः |
|---|---|
| **छात्रः** ग्रन्थं पठति। | **छात्रेण** ग्रन्थः पठ्यते। |
| **उत्तमः छात्रः** ग्रन्थं पठति। | **उत्तमेन छात्रेण** ग्रन्थः पठ्यते। |
| **शिशुः** हसति। | **शिशुना** हस्यते। |
| **सुन्दरः शिशुः** हसति। | **सुन्दरेण शिशुना** हस्यते। |

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढें। Read the following sentences. ]

| | |
|---|---|
| चतुरः बालकः स्मरति। | चतुरेण बालकेन स्मर्यते। |
| प्रसिद्धः कविः लिखति। | प्रसिद्धेन कविना लिख्यते। |
| नूतना बालिका आगच्छति। | नूतनया बालिकया आगम्यते। |
| सुन्दरी महिला वदति। | सुन्दर्या महिलया उद्यते। |
| उत्तमं मित्रं नयति। | उत्तमेन मित्रेण नीयते। |

**अवधेयम्**

'चतुर, प्रसिद्ध, उत्तम' इत्यादिशब्दाः 'बालक, कवि, मित्र' इत्यादि-विशेष्याणां विशेषणत्वेन प्रयुज्यन्ते। तथैव शतृप्रत्ययान्तशब्दाः अपि वाक्ये विशेषणानि भवन्ति।

### तृतीयायां शतृप्रत्ययान्तानां प्रयोगान् सम्यक् परिशीलयत–

[ तृतीया विभक्ति में शतृप्रत्ययान्त प्रयोगों का परिशीलन करें। Analyse the usages of *śatṛ*-suffix in instrumetal case-ending. ]

| | |
|---|---|
| ***लिखन्* छात्रः** अल्पाहारं खादति। | ***लिखता* छात्रेण** अल्पाहारः खाद्यते। |
| क्रीडन् बालकः सम्भाषणं करोति। | क्रीडता बालकेन सम्भाषणं क्रियते। |
| पठन् शिष्यः चित्रं पश्यति। | पठता शिष्येण चित्रं दृश्यते। |
| स्मरन्ती वीणा वाक्यं लिखति। | स्मरन्त्या वीणया वाक्यं लिख्यते। |
| गायन्ती नटी नृत्यति। | गायन्त्या नट्या नृत्यते। |
| गच्छत् यानं शब्दं करोति। | गच्छता यानेन शब्दः क्रियते। |

## अभ्यासः – 293

### रूपाणि स्मरत तदनुसारं रिक्तस्थानानि पूरयत–

[ रूपों का स्मरण करें, तदनुसार रिक्तस्थानों की पूर्ति करें। Remember the declension and fill in the blanks accordingly. ]

**पुं.**

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| यथा | पठत् | पठता | पठद्भ्याम् | पठद्भिः |
| 1. | लिखत् | | | |
| 2. | वदत् | | | |
| 3. | गायत् | | | |
| 4. | कुर्वत् | | | |
| 5. | शृण्वत् | | | |
| 6. | यच्छत् | | | |
| 7. | जानत् | | | |
| 8. | स्मरत् | | | |
| 9. | खादत् | | | |

**स्त्री.**

| | | | | |
|---|---|---|---|---|
| **यथा** | **पठत्** | **पठन्त्या**............ | **पठन्तीभ्याम्** | **पठन्तीभिः** |
| 1. | लिखत् | | | |
| 2. | वदत् | | | |
| 3. | गायत् | | | |
| 4. | कुर्वत् | | | |
| 5. | शृण्वत् | | | |
| 6. | यच्छत् | | | |
| 7. | जानत् | | | |
| 8. | स्मरत् | | | |
| 9. | खादत् | | | |

**नपुं.**

| | | | | |
|---|---|---|---|---|
| **यथा** | **पठत्** | **पठता**............ | **पठद्भ्याम्** | **पठद्भिः**............ |
| 1. | लिखत् | | | |
| 2. | वदत् | | | |
| 3. | गायत् | | | |
| 4. | कुर्वत् | | | |
| 5. | शृण्वत् | | | |
| 6. | यच्छत् | | | |
| 7. | जानत् | | | |
| 8. | स्मरत् | | | |
| 9. | खादत् | | | |

☞ **नपुंसके तृतीयान्त-रूपाणि पुंलिङ्वत् भवन्ति।**

## अभ्यासः — 294

✍ **यथोदाहरणं विशेषणभूतस्य शतृप्रत्ययान्तस्य रूपं लिखत–**

[ उदाहरण के अनुसार विशेषणभूत शतृप्रत्ययान्त रूप लिखें। Write the qualifiers ending in *śatṛ*-suffix as shown in the example. ]

| | | | |
|---|---|---|---|
| **यथा** | **पठत्** | **पठता** | छात्रेण फलं खाद्यते। |
| 1. | लिखत् | | बालकेन चित्रं दृश्यते। |
| 2. | वदत् | | वृद्धेन नगरं गम्यते। |
| 3. | शृण्वत् | | पुरुषेण शब्दः क्रियते। |
| 4. | मिलत् | | रामेण पुस्तकं दीयते। |
| 5. | स्मरत् | | छात्रेण वाक्यं लिख्यते। |
| 6. | अर्चत् | | भक्तेन ध्यानं क्रियते। |
| 7. | खादत् | | पित्रा जलं पीयते। |
| 8. | नयत् | | सेवकेन धनं स्थाप्यते। |
| 9. | निन्दत् | | दुर्जनेन स्थीयते। |
| 10. | चलत् | | पण्डितेन सूत्रं रट्यते। |

## अभ्यासः — 295

✍ **उपयुक्तेन शतृप्रत्ययान्तरूपेण रिक्तस्थानं पूरयत–**

[ उपयुक्त शतृप्रत्ययान्त रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the correct forms ending in *śatṛ*-suffix. ]

| | | |
|---|---|---|
| 1. | पठत् | विद्यार्थिन्या अर्थः उद्यते। |
| 2. | लिखत् | रमया सुप्यते। |
| 3. | वदत् | बालिकया गृहपाठः लिख्यते। |
| 4. | गायत् | सुधया नेत्रे निमील्येते। |
| 5. | नृत्यत् | नर्तक्या मनोहरं हस्यते। |
| 6. | पश्यत् | सुशीलया गीतं गीयते। |
| 7. | यच्छत् | मात्रा फलं खाद्यते। |
| 8. | सूचयत् | स्वामिन्या पात्रं स्थाप्यते। |

## अभ्यासः — 296

**सर्वनामशब्दैः सह शतृप्रत्ययान्तस्य रूपस्य तृतीयायाम् अभ्यासः**

### ✍ कर्मणि भावे वा परिवर्त्य वाक्यानि लिखत–

[ कर्मवाच्य या भाववाच्य में परिवर्तित कर वाक्य लिखें। Make sentences either in passive voice or impersonal as the case may be. ]

**उदा.** **अहं हसन् उक्तवान्।** — **हसता मया उक्तम्** ।

**सः भ्रमन् गीताम् अपठत्।** — **भ्रमता तेन गीता अपठ्यत** ।

1. एषः लिखन् पठितवान् । ________ ।
2. ते गायन्तः नर्तितवन्तः । ________ ।
3. सा स्मरन्ती वाक्यम् अपठत् । ________ ।
4. एताः गच्छन्त्यः गीतं गायन्ति । ________ ।
5. सः तिष्ठन् मन्त्रम् अजपत् । ________ ।
6. अहं चिन्तयन् वार्तां निवेदितवान् । ________ ।
7. वयं कार्यं कुर्वत्यः पत्रिकां पठितवत्यः । ________ ।
8. तौ पठन्तौ अलिखताम् । ________ ।
9. ते खादन्त्यौ जलं पीतवत्यौ । ________ ।
10. एते प्रसादयन्तः सम्भाषणम् अकुर्वन् । ________ ।
11. सा सूचयन्ती हसितवती । ________ ।
12. ताः क्रीणत्यः आपणम् अगच्छन् । ________ ।
13. आवां स्यूतं नयन्तौ धनं न नीतवन्तौ । ________ ।
14. सः निन्दन् मार्गे भ्रमणम् अकरोत् । ________ ।
15. वदन्ती अहं पुरुषम् आहूतवती । ________ ।

## अभ्यासः — 297

✍ **यथोदाहरणं तृतीयान्तरूपैः रिक्तस्थानानि पूरयत—**

[ उदाहरण के अनुसार तृतीयान्त रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the instrumental forms as shown in the example. ]

| | | | | |
|---|---|---|---|---|
| **यथा** | | ....**भोजयन्त्या**.... | (भोजयन्ती) | मात्रा उक्तम्। |
| | | ....**पठता**.... | (पठन्) | बालकेन लिखति। |
| 1. | | | (प्रबोधयत्) | गुरुणा आदिष्टम्। |
| 2. | | | (गच्छन्ती) | महिलया हसितम्। |
| 3. | तया गीतं | | (स्मरन्ती) | सम्यक् न गीतम्। |
| 4. | रमेशेन आकाशवाणीं | | (शृण्वन्) | खादनं विस्मृतम्। |
| 5. | विद्यार्थिन्या | | (क्रीडन्ती) | उच्चैः हसितम्। |
| 6. | शाटिकां | | (पश्यन्ती) | महिलया समयः विस्मृतः। |
| 7. | चर्चा | | (कुर्वत्यः) | ताभिः शीघ्रं न गतम्। |
| 8. | तृणं | | (चरन्त्यः) | धेनुभिः वत्सः स्मृतः। |
| 9. | गीतं | | (शृण्वन्) | अनुजेन निद्रा लब्धा। |
| 10. | मरीचिकां | | (खादन्ती) | बालिकया रोदनं कृतम्। |
| 11. | | | (गच्छत्) | यानेन बालाः गताः। |
| 12. | | | (धावन्) | पुरुषेण पृष्ठभागः न दृश्यते। |
| 13. | | | (गायन्ती) | भगिन्या वाद्यं वादितम्। |
| 14. | | | (परिवेषयन्ती) | मात्रा सम्भाषणं कृतम्। |
| 15. | | | (क्रीडन्) | हरिणा गृहकार्यं नैव कृतम्। |

| | | | |
|---|---|---|---|
| 16. | वाहनं | (चालयन्ती) | युवत्या मार्गे पतितम् । |
| 17. | गीतं | (गायन्) | युवकेन नाटकमपि क्रियते । |
| 18. | | (उपविशन्) | वृद्धेन पत्रिका पठ्यते । |
| 19. | | (जल्पन्त्यः) | ताभिः गृहकार्यं न कृतम् । |
| 20. | मार्गे | (भ्रमन्तः) | युवकैः विद्यार्जनं नैव क्रियते । |
| 21. | | (जपन्) | मुनिना आशीर्वादः दत्त । |
| 22. | | (प्रवहत्) | जलेन वृक्षखण्डः नीयते । |
| 23. | हितवचनं | (बोधयन्ती) | जनन्या किञ्चित् तर्जितम् । |
| 24. | धनं | (यच्छन्) | पित्रा सम्भाषणं न कृतम् । |
| 25. | मन्दिरे | (पूजयन्त्यः) | महिलाभिः भजनं गीतम् । |
| 26. | वस्तूनि | (क्रीणन्तः) | जनैः छत्रमपि क्रीतम् । |
| 27. | पाठं | (पठन्तः) | छात्रेण गीता अपि पठिता । |
| 28. | चित्रं | (लिखन्तः) | बालकैः वर्णाः अपि योजितः । |
| 29. | अविरतं | (रुदती) | लतया अधुना हसितम् । |
| 30. | पात्राणि | (प्रक्षालयन्ती) | सेविकया जलमपि पूरितम् । |
| 31. | भजनं | (कुर्वती) | तया श्लोकः उक्तः । |
| 32. | वेदम् | (उच्चारयन्) | वैदिकेन पूजा क्रियते । |
| 33. | कार्यं | (वदन्) | अधिकारिणा धनं दत्तम् । |
| 34. | आपणं | (गच्छन्ती) | शोभया धनं न नीतम् । |

# षष्ठः स्तबकः
## 6.4 चतुर्थः पाठः
[ शतृ-प्रत्ययान्त-रूपम् ]

**चतुर्थी-प्रयोगाः**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



बालकः लिखति।



माता तस्मै दुग्धं ददाति।

=



माता **लिखते बालकाय** दुग्धं ददाति।



वृद्धः पतति।



पथिकः तस्मै दण्डं यच्छति।

=



पथिकः **पतते वृद्धाय** दण्डं यच्छति।



सूर्यः उदेति।



साधुः तस्मै अर्घ्यं ददाति।

=



साधुः **उद्यते सूर्याय** अर्घ्यं ददाति।

**स्त्री.**



भगिनी क्रन्दति।



भ्राता तस्यै वस्त्रं ददाति।

=



भ्राता **क्रन्दन्त्यै भगिन्यै** वस्त्रं ददाति।



सरस्वती वीणां वादयति।



तस्यै नमः।

=



वीणां **वादयन्त्यै सरस्वत्यै** नमः।



  = 

बाला मोदकं खादति। तस्यै मोदकं रोचते। **खादन्त्यै बालायै** मोदकं रोचते।

  = 

गङ्गा प्रवहति। पूजकः तस्यै मालाम् अर्पयति। पूजकः **प्रवहन्त्यै गङ्गायै** मालाम् अर्पयति।

**नपुं.**

  = 

वृक्षात् आम्रं पतति। बालकाः तस्मै धावन्ति। बालकाः **पतते आम्राय** धावन्ति।

## अभ्यासः — 298

✍ **यथोदाहरणं चतुर्थ्यां त्रिषु वचनेषु रूपाणि लिखत—**

[ उदाहरण के अनुसार चतुर्थी विभक्ति के तीनों वचनों में रूप लिखें। Write the declension in all the three numbers of dative case as shown in the example. ]

**पुं. / नपुं.**

| | मूलशब्दः | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| 1. | गच्छत् | – | गच्छते | गच्छद्भ्याम् | गच्छद्भ्यः |
| 2. | पठत् | – | | | |
| 3. | लिखत् | – | | | |
| 4. | नयत् | – | | | |
| 5. | पचत् | – | | | |
| 6. | नृत्यत् | – | | | |
| 7. | भ्राम्यत् | – | | | |
| 8. | मिलत् | – | | | |
| 9. | दिशत् | – | | | |
| 10. | भात् | – | | | |
| 11. | पिबत् | – | | | |
| 12. | बिभ्यत् | – | | | |
| 13. | चिन्वत् | – | | | |
| 14. | शक्नुवत् | – | | | |
| 15. | रुन्धत् | – | | | |
| 16. | क्रीणत् | – | | | |
| 17. | गणयत् | – | | | |
| 18. | रचयत् | – | | | |
| 19. | पूरयत् | – | | | |
| 20. | उद्घाटयत् | – | | | |

**स्त्री.**

| | मूलशब्दः | | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| 1. | गच्छन्ती | – | गच्छन्त्यै | गच्छन्तीभ्याम् | गच्छन्तीभ्यः |
| 2. | पठन्ती | – | | | |
| 3. | लिखन्ती | – | | | |
| 4. | नयन्ती | – | | | |
| 5. | पचन्ती | – | | | |
| 6. | नृत्यन्ती | – | | | |
| 7. | मिलन्ती | – | | | |
| 8. | दिशन्ती | – | | | |
| 9. | भान्ती | – | | | |
| 10. | पिबन्ती | – | | | |
| 11. | गणयन्ती | – | | | |
| 12. | रचयन्ती | – | | | |
| 13. | पूरयन्ती | – | | | |
| 14. | उद्घाटयन्ती | – | | | |
| 15. | तुदन्ती | – | | | |
| 16. | बिभ्यती | – | बिभ्यत्यै | बिभ्यतीभ्याम् | बिभ्यतीभ्यः |
| 17. | चिन्वती | – | | | |
| 18. | शक्नुवती | – | | | |
| 19. | प्राप्नुवती | – | | | |
| 20. | रुन्धती | – | | | |
| 21. | क्रीणती | – | | | |
| 22. | शृण्वती | – | | | |
| 23. | रुदती | – | | | |
| 24. | स्वपती | – | | | |
| 25. | जाग्रती | – | | | |

26. शासती –
27. ददती –
28. जहती –
29. भिन्दती –
30. गृह्णती –

## अभ्यासः — 299

✍ **विशेष्यानुरूपं शतृप्रत्ययान्तं विशेषणं संशोध्य रिक्तस्थाने लिखत—**

[ शतृप्रत्ययान्त विशेषण पद को विशेष्य के अनुरूप संशोधन कर रिक्तस्थान में लिखें। Correct the qualifier ending in *śatṛ*-suffix as per the qualificands and write them in the blank spaces. ]

| | विशेषणपदम् | | विशेष्यपदम् |
|---|---|---|---|
| उदा. | शासत्यै | **शासतीभ्यः** | मुख्यमन्त्रिणीभ्यः |
| 1. | शासतीभ्याम् | | मात्रे |
| 2. | गृह्णद्भ्याम् | | बालकाय |
| 3. | प्रवहते | | छात्राभ्यः |
| 4. | रचयन्तीभ्याम् | | कवयित्र्यै |
| 5. | रुदते | | मनोभ्यः |
| 6. | मोदद्भ्यः | | सेनापतिभ्यः |
| 7. | पठन्तीभ्यः | | शिक्षिकायै |
| 8. | निर्दिशद्भ्यः | | कवयित्रीभ्याम् |
| 9. | स्फुटद्भ्याम् | | पुष्पाय |

## अभ्यासः — 300

✍ **यथोचितं चतुर्थी-विभक्त्यन्तानि शत्रन्तरूपाणि विलिख्य वाक्यानि पूरयत—**

[ उचित चतुर्थी विभक्त्यन्त शतृ प्रत्ययान्त रूपों से वाक्य पूरा करें। Complete the sentences with appropriate dative forms ending in *śatṛ*-suffix. ]

| | | | |
|---|---|---|---|
| **उदा.** | (पठ्) | ......**पठते** | बालकाय माता मधुरं दत्तवती। |
| 1. | (गम्) | | छात्राय पुस्तकं देहि। |
| 2. | (लिख्) | | बालिकायै अङ्कनीं देहि। |
| 3. | (पूज्) | | महिलाभ्यः पुष्पाणि देहि। |
| 4. | (प्रार्थ) | | भक्ताय देवः वरं दत्तवान्। |
| 5. | (क्रन्द्) | | बालिकायै माता मोदकं दत्तवती। |
| 6. | पारितोषिकं (प्राप्) | | विदुष्यै और्णकं देहि। |
| 7. | (गण्) | | धनपालाय अधिकारी पेटिकां दत्तवान्। |
| 8. | पुत्राय लड्डुकं (दा) | | महिलायै पयः ददातु। |
| 9. | वृकात् (भी) | | ताभ्यां धैर्यं देहि। |
| 10. | शाकान् (क्री) | | जनन्यै पुत्री धनस्यूतं दत्तवती। |
| 11. | पारितोषिकं (गृ) | | छात्रेभ्यः अन्यत् किं दातव्यम् ? |
| 12. | धनं (चुर्) | | चोराय छुरिकां दत्तवान्। |
| 13. | वार्तां (श्रु) | | तस्मै फलं दीयताम्। |
| 14. | (मार्ज्) | | महिलायै वेतनं देहि। |
| 15. | कार्यं (कृ) | | सेवकाय खनित्रं देहि। |

## अभ्यासः — 301

✍ **यथोदाहरणम् उचितशत्रन्तप्रयोगेण वाक्यानि पूरयत—**

[ उदाहरण के अनुसार उचित शतृप्रत्ययान्त प्रयोग से वाक्यों को पूरा करें। Complete the sentences with appropriate usages ending in *śatṛ*-suffix. ]

| | | | | |
|---|---|---|---|---|
| उदा. | (पाठि) | पाठयद्भ्यः | गुरुभ्यः | नमः । |
| 1. | (स्रु) | | नलात् | जलम् आनयति । |
| 2. | (ज्वल्) | | अग्नये | स्वाहा । |
| 3. | प्रसिद्धिं (प्राप्) | | लेखिकायै सा | ईर्ष्यति । |
| 4. | मन्दिरे (विलस्) | | देव्यै एषा | पुष्पाणि अर्पयति । |
| 5. | (क्रीड्) | | बालिकायै | मोदकं रोचते । |
| 6. | शयनं (कृ) | | सेवकाय सः | क्रुध्यति । |
| 7. | वेतनं (प्राप्) | | सख्यै एषा | असूयति । |
| 8. | उपकारं (ज्ञा) | | तस्मै | नमः । |
| 9. | उपवासम् (आचर्) | | तस्मै | फलानि देहि । |
| 10. | (पठ्) | | बालकाय | पुस्तकं रोचते । |

# षष्ठः स्तबकः

## 6.5 पञ्चमः पाठः


### [ शतृ-प्रत्ययान्त-रूपम् ]

**पञ्चमी-प्रयोगाः**


**अधोलिखितानि वाक्यानि पठत—**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**



अश्वः धावति।




तस्मात् सैनिकः पतति।

=



सैनिकः **धावतः अश्वात्** पतति।




शकटः चलति।



तस्मात् कृषकः पतति।

=





कृषकः **चलतः शकटात्** पतति।

## स्त्री.




  = 

व्याघ्री गर्जति ।　तस्याः बालिका बिभेति ।　बालिका **गर्जन्त्याः व्याघ्र्याः** बिभेति ।

  = 

नदी प्रवहति ।　तस्याः महिला जलं नयति ।　महिला **प्रवहन्त्याः नद्याः** जलं नयति ।

## नपुं.

  = 

पुष्पं विकसति ।　तस्मात् भ्रमरः मधु पिबति ।　भ्रमरः **विकसतः पुष्पात्** मधु पिबति ।

**त्रिषु लिङ्गेषु शत्रन्त-पञ्चमी-रूपाणि**

## अधोलिखितानि रूपाणि स्मरत—

[ अधोलिखित रूपों का स्मरण करें। Remember the following declension. ]

**पुं.**

| **मूलशब्दः** | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| पठत् | पठतः | पठद्भ्याम् | पठद्भ्यः |
| लिखत् | लिखतः | लिखद्भ्याम् | लिखद्भ्यः |
| गच्छत् | गच्छतः | गच्छद्भ्याम् | गच्छद्भ्यः |
| पिबत् | पिबतः | पिबद्भ्याम् | पिबद्भ्यः |
| स्मरत् | स्मरतः | स्मरद्भ्याम् | स्मरद्भ्यः |
| चलत् | चलतः | चलद्भ्याम् | चलद्भ्यः |
| नयत् | नयतः | नयद्भ्याम् | नयद्भ्यः |

**स्त्री.**

| | | | |
|---|---|---|---|
| पठन्ती | पठन्त्याः | पठन्तीभ्याम् | पठन्तीभ्यः |
| पतन्ती | पतन्त्याः | पतन्तीभ्याम् | पतन्तीभ्यः |
| स्मरन्ती | स्मरन्त्याः | स्मरन्तीभ्याम् | स्मरन्तीभ्यः |
| गायन्ती | गायन्त्याः | गायन्तीभ्याम् | गायन्तीभ्यः |
| चलन्ती | चलन्त्याः | चलन्तीभ्याम् | चलन्तीभ्यः |
| पिबन्ती | पिबन्त्याः | पिबन्तीभ्याम् | पिबन्तीभ्यः |
| शृण्वती | शृण्वत्याः | शृण्वतीभ्यां | शृण्वतीभ्यः |

☞ **नपुंसके रूपाणि पुंलिङ्गवत् एव भवन्ति।** नपुंसक में पुंलिङ्ग जैसे रूप चलते हैं। The declension of neuter is similar to that of masculine.

## अभ्यासः — 302

अधोलिखितानां शत्रन्तपदानां पञ्चम्यन्त-रूपाणि लिखत–

[ अधोलिखित शतृप्रत्ययान्त पदों के पञ्चम्यन्त रूप लिखें। Write the ablative declension of the following words ending in *śatṛ*-suffix. ]

| पुं. / नपुं. | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| 1. | पठत् | पठतः | पठद्भ्याम् | पठद्भ्यः |
| 2. | धावत् | | | |
| 3. | गर्जत् | | | |
| 4. | क्रीडत् | | | |
| 5. | खादत् | | | |
| 6. | पतत् | | | |
| 7. | क्रन्दत् | | | |
| 8. | चरत् | | | |
| 9. | ददत् | | | |
| 10. | कुर्वत् | | | |
| 11. | चोरयत् | | | |
| 12. | नयत् | | | |
| 13. | क्रीणत् | | | |
| 14. | गायत् | | | |
| 15. | आप्नुवत् | | | |
| 16. | नृत्यत् | | | |
| 17. | लिखत् | | | |
| 18. | जिघ्रत् | | | |
| 19. | पिबत् | | | |
| 20. | जाग्रत् | | | |

## अभ्यासः — 303

✍ **अधोलिखितानां शत्रन्तपदानां पञ्चम्यन्त-रूपाणि लिखत—**

[ अधोलिखित शतृप्रत्ययान्त पदों के पञ्चम्यन्त रूप लिखें। Write the ablative declension of the following words ending in *śatṛ*-suffix. ]

| स्त्री. | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| 1. | अर्चन्ती | अर्चन्त्याः | अर्चन्तीभ्याम् | अर्चन्तीभ्यः |
| 2. | जयन्ती | | | |
| 3. | वहन्ती | | | |
| 4. | क्रन्दन्ती | | | |
| 5. | पचन्ती | | | |
| 6. | धरन्ती | | | |
| 7. | गायन्ती | | | |
| 8. | पश्यन्ती | | | |
| 9. | चरन्ती | | | |
| 10. | वपन्ती | | | |
| 11. | मथ्नती | | | |
| 12. | नृत्यन्ती | | | |
| 13. | सीव्यन्ती | | | |
| 14. | क्षालयन्ती | | | |
| 15. | पालयन्ती | | | |
| 16. | पीडयन्ती | | | |
| 17. | पोषयन्ती | | | |
| 18. | ताडयन्ती | | | |

19. कुप्यन्ती
20. पिबन्ती
21. स्नान्ती
22. गच्छन्ती
23. भ्रमन्ती
24. तुष्यन्ती
25. पूजयन्ती
26. रुदती ........**रुदत्याः**........ ........**रुदतीभ्यां**........ ........**रुदतीभ्यः**........
27. ददती
28. बिभ्यती
29. चिन्वती
30. वृण्वती
31. क्रीणती
32. कुर्वती
33. जाग्रती
34. स्वपती
35. जानती
36. ब्रुवती
37. शृण्वती
38. प्रीणती
39. जहती
40. अदती

## अभ्यासः — 304

✍ **'कविः चिन्तयति' 'गुरुः पाठयति' 'पिता ददाति' एतान् अंशान् मनसि निधाय यथोचितं योजयत—**

[ 'कवि सोचता है, गुरु पढ़ाता है, पिता दे रहा है', इन अंशों को मन में रखकर यथोचित जोड़ें। Match appropriately by keeping the following points in mind : the poet thinks, teacher teaches and father gives. ]

| | क | | ख |
|---|---|---|---|
| 1. | **चिन्तयतः** | (क) | कविभ्याम् |
| 2. | ददद्भ्याम् | (ख) | गुरोः |
| 3. | पाठयद्भ्यः | (ग) | **कवेः** |
| 4. | चिन्तयद्भ्याम् | (घ) | कविभ्यः |
| 5. | ददतः | (ङ) | पितृभ्यः |
| 6. | पाठयद्भ्याम् | (च) | गुरुभ्याम् |
| 7. | पाठयतः | (छ) | पितृभ्याम् |
| 8. | चिन्तयद्भ्यः | (ज) | पितुः |
| 9. | ददद्भ्यः | (झ) | गुरुभ्यः |

## अभ्यासः — 305

✍ **'क' स्तम्भ-पदानि 'ख' स्तम्भपदैः यथोचितं योजयत—**

[ 'क'-स्तम्भ पदों को 'ख'-स्तम्भ पदों से यथायोग्य जोड़ें। Match the words of *ka*-column with *kha*-column appropriately. ]

| | क | | ख |
|---|---|---|---|
| 1. | अटतः | (क) | महिलया |
| 2. | खादद्भ्यां | (ख) | छात्रेभ्यः |
| 3. | अर्चन्त्या | (ग) | सर्पात् |
| 4. | लिखद्भ्यः | (घ) | बालकाभ्यां |
| 5. | ब्रुवतीभ्यः | (ङ) | युवतीभ्याम् |
| 6. | पश्यन्तीभ्यां | (च) | महिलाभ्यः |

## अभ्यासः — 306

**मञ्जूषायां प्रदत्तेभ्यः पदेभ्यः उचितपदानि चित्वा रिक्तस्थानानि पूरयत—**

[ मञ्जूषा में प्रदत्त पदों में से उचित पद चुनकर रिक्तस्थान भरें । Fill in the blanks with the appropriate words from the box. ]

1. क्रीडतः **बालकान्**
2. पतद्भ्याम्
3. गर्जद्भ्यः
4. चोरयद्भ्यः
5. मथ्नत्याः
6. पालयन्तीभ्याम्
7. शृण्वतीभ्यः
8. क्रीणत्याः
9. चरन्तीभ्यः
10. क्रन्दद्भ्यः

| |
|---|
| सिंहेभ्यः |
| चोरेभ्यः |
| छात्राभ्यः |
| बालकान् |
| खगाभ्याम् |
| यशोदायाः |
| मातृभ्याम् |
| महिलायाः |
| शिशुभ्यः |
| गोभ्यः |

## अभ्यासः — 307

**कोष्ठके प्रदत्तेभ्यः शतृप्रत्ययान्तशब्देभ्यः उचितपदं निर्माय रिक्तस्थानानि पूरयत—**

[ कोष्ठक में प्रदत्त शतृप्रत्ययान्त शब्दों से उचित पद बनाकर रिक्तस्थान भरें। Fill in the blanks with the appropriate forms of the words given in the bracket ending in *śatṛ*-suffix. ]

1. (चरत्) **चरद्भ्यः** गोभ्यः ।
2. (गायत्) गायकात् ।
3. (पिबन्ती) अजाभ्याम् ।
4. (जाग्रत्) बालाभ्याम् ।
5. (नृत्यन्ती) नर्तक्याः ।
6. (सीव्यन्ती) महिलाभ्यः ।
7. (तुष्यन्ती) देव्याः ।
8. (प्रीणती) जननीभ्यः ।

## अभ्यासः — 308

✎ **यथोदाहरणम् उत्तरवाक्यानि पूरयत—**

[ उदाहरण के अनुसार उत्तर वाक्यों को पूरा करें। Complete the answers as shown in the example. ]

उदा. भवन्तौ कीदृशात् सिंहात् बिभ्यतः ?

आवां ........**गर्जतः**........ सिंहात् बिभीवः। (गर्जत्)

1. सा कीदृश्याः गोः दुग्धं दोग्धि ?

   सा ........ गोः दुग्धं दोग्धि। (चरन्ती)

2. सः कीदृश्याः गायिकायाः गीतं शृणोति ?

   सः ........ गायिकायाः गीतं शृणोति। (गायन्ती)

3. बालिका कीदृश्याः देव्याः आशीर्वादं प्राप्नोति ?

   बालिका ........ देव्याः आशीर्वादं प्राप्नोति। (तुष्यन्ती)

4. सा कीदृश्याः जनन्याः बिभेति ?

   सा ........ जनन्याः बिभेति। (तर्जयन्ती)

5. बालकः कीदृशात् अश्वात् पतति ?

   बालकः ........ अश्वात् पतति। (धावत्)

6. रमेशः कीदृशाभ्यां बालकाभ्यां पराजितः ?

   रमेशः ........ बालकाभ्यां पराजितः। (क्रीडत्)

7. कीदृशीभ्यः विपद्भ्यः भगवान् रक्षतु ?

   ........ विपद्भ्यः भगवान् रक्षतु। (आगच्छन्ती)

8. कीदृश्याः शिक्षिकायाः पुस्तकं गृह्णाति ?

   ........ शिक्षिकायाः पुस्तकं गृह्णाति। (हसन्ती)

9. शिक्षकः कीदृशेभ्यः छात्रेभ्यः अज्ञानं दूरीकरोति ?

शिक्षकः छात्रेभ्यः अज्ञानं दूरीकरोति। (पठत्)

10. माता कीदृशात् बालकात् पुत्रं वारयति ?

माता बालकात् पुत्रं वारयति। (दुराचरत्)

11. सेवकः कीदृश्याः नद्याः जलम् आनयति ?

सेवकः नद्याः जलम् आनयति। (वहन्ती)

12. मधुमक्षिका कीदृशेभ्यः पुष्पेभ्यः मधु पिबति ?

मधुमक्षिका पुष्पेभ्यः मधु पिबति। (विकसत्)

13. बालिका कीदृशात् छात्रात् लेखनीं गृह्णाति ?

बालिका छात्रात् लेखनीं गृह्णाति। (धावत्)

14. यात्रिकः कीदृशात् यानात् पतति ?

यात्रिकः यानात् पतति। (चलत्)

15. मुरलीधरः कीदृश्याः द्विचक्रिकायाः पतति ?

मुरलीधरः द्विचक्रिकायाः पतति। (चलन्ती)

16. कीदृशेभ्यः धनिकेभ्यः भिक्षुकाः भिक्षां गृह्णन्ति ?

धनिकेभ्यः भिक्षुकाः भिक्षां गृह्णन्ति। (ददत्)

17. छात्राः कीदृश्याः शिक्षिकायाः पुरस्कारान् गृह्णन्ति ?

छात्राः शिक्षिकायाः पुरस्कारान् गृह्णन्ति। (प्रीणती)

18. बालकः कीदृशीभ्यः महिलाभ्यः प्रसादं गृह्णाति ?

बालकः महिलाभ्यः प्रसादं गृह्णाति। (वितरन्ती)

19. यूयं कीदृशेभ्यः गायकेभ्यः गीतं शृणुथ ?

वयं गायकेभ्यः गीतं शृणुमः। (गायत्)

## अभ्यासः — 309

कोष्ठके त्रीणि रूपाणि दत्तानि सन्ति। तेषु उचितं पदं चित्वा रिक्तस्थानं पूरयत—
[हर कोष्ठक में तीन रूप दिए गये हैं। उनमें से उचित पद चुनकर रिक्तस्थान भरें। Three forms are given in each bracket. Fill in the blanks with the appropriate one.]

1. **भ्रमतः** ........ व्याघ्रात् पथिकः बिभेति। (भ्रमद्भ्याम् / भ्रमतः / भ्रमद्भ्यः)
2. ........ चोरेभ्यः जनाः त्रस्ताः। (चोरयद्भ्याम् / चोरयद्भ्यः / चोरद्भ्यः)
3. ........ शुनकात् बालकं रक्षति। (भषतः / भषद्भ्यां / भषदद्भ्यः)
4. ........ सर्वेभ्यः बालिकां रक्षति। (सर्पद्भ्यः / सर्पदद्भ्यः / सर्पतीभ्यः)
5. ........ अध्यापकात् छात्राः भीताः। (ताडयद्भ्यः / ताडद्भ्यः / ताडयतः)
6. ........ दुष्टाभ्यां सज्जनाः बिभ्यति। (निन्दतः / निन्दद्भ्यां / निन्दद्भ्यः)

## अभ्यासः — 310

मञ्जूषातः पञ्चम्यन्तपदानि चित्वा लिखत—
[मञ्जूषा से पञ्चम्यन्त पदों को चुनकर लिखें। Pick up the ablative forms from the box and write them in the space given.]

| | | | | | |
|---|---|---|---|---|---|
| कुर्वतः | हसन्तम् | चिन्तयता | गायन्त्यै | जयन्त्याः | क्षिपतः |
| जानतीभ्यः | गायन्तीभ्यां | पठन्तीषु | गृह्णतः | धावन्तीभ्यः | गच्छद्भ्यः |

## अभ्यासः — 311

मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत—
[मञ्जूषा से उचित पदों को चुनकर रिक्तस्थान भरें। Fill in the blanks with the appropriate words from the box.]

| |
|---|
| चन्द्रमसः, वणिग्भ्यः, भानोः, दातुः, रिपोः, साधोः |

1. सैनिकः **रिपोः** देशं रक्षति।
2. ........ किरणाः आगच्छन्ति।
3. ........ चन्द्रिका आगच्छति।
4. ........ वस्तूनि क्रीणाति।
5. ........ धनं स्वीकरोति।
6. ........ उपदेशं गृह्णाति।

# षष्ठः स्तबकः

## 6.6 षष्ठः पाठः

[ शतृ-प्रत्ययान्त-रूपम् ]

षष्ठी-प्रयोगाः


**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढें। Read the following sentences. ]

पुं.




बालकः पठति।



एतत् तस्य पुस्तकम्।


=



एतत् **पठतः बालकस्य** पुस्तकम्।



यतिः जपति।



एतत् तस्य पात्रम्।

=




एतत् **जपतः यतेः** पात्रम्।

## स्त्री.



बालिका क्रीडति ।



एषः तस्याः कन्दुकः ।


=



एषः **क्रीडन्त्याः बालिकायाः** कन्दुकः ।



नटी नृत्यति ।



एताः तस्याः किङ्किणिकाः ।

=




एताः **नृत्यन्त्याः नट्याः** किङ्किणिकाः ।

## नपुं.




वाहनं गच्छति ।



एतत् तस्य चक्रम् ।

=



एतत् **गच्छतः वाहनस्य** चक्रम् ।

## त्रिषु लिङ्गेषु शत्रन्त-षष्ठी-रूपाणि

**अधोलिखितानि रूपाणि स्मरत—**

[ अधोलिखित रूपों का स्मरण करें। Remember the following declension. ]

**पुं.**

| मूलशब्दः | एक. | द्वि. | बहु. |
|---|---|---|---|
| पठत् | पठतः | पठतोः | पठताम् |
| लिखत् | लिखतः | लिखतोः | लिखताम् |
| गच्छत् | गच्छतः | गच्छतोः | गच्छताम् |
| पिबत् | पिबतः | पिबतोः | पिबताम् |
| स्मरत् | स्मरतः | स्मरतोः | स्मरताम् |
| चलत् | चलतः | चलतोः | चलताम् |
| नयत् | नयतः | नयतोः | नयताम् |

**स्त्री.**

| | | | |
|---|---|---|---|
| पठन्ती | पठन्त्याः | पठन्त्योः | पठन्तीनाम् |
| पतन्ती | पतन्त्याः | पतन्त्योः | पतन्तीनाम् |
| स्मरन्ती | स्मरन्त्याः | स्मरन्त्योः | स्मरन्तीनाम् |
| गायन्ती | गायन्त्याः | गायन्त्योः | गायन्तीनाम् |
| चलन्ती | चलन्त्याः | चलन्त्योः | चलन्तीनाम् |
| पिबन्ती | पिबन्त्याः | पिबन्त्योः | पिबन्तीनाम् |
| शृण्वती | शृण्वत्याः | शृण्वत्योः | शृण्वतीनाम् |

⇨ **नपुंसके रूपाणि पुंलिङ्गवत् एव भवन्ति।**

## अभ्यासः — 312

✍ **वाक्यद्वयं योजयित्वा एकं वाक्यं लिखत—**

[ दोनों वाक्यों को जोड़कर एक वाक्य लिखें। Make single sentence by joining the two sentences given. ]

**पुं.**

**यथा** बालकः क्रीडति। तस्य गृहकार्यम् अवशिष्टम् अस्ति।

**क्रीडतः बालकस्य गृहकार्यम् अवशिष्टम् अस्ति** ।

छात्रः संस्कृतं वदति। तस्य प्रशंसा भवति।

**संस्कृतं वदतः छात्रस्य प्रशंसा भवति** ।

1. बालकः शीघ्रं गच्छति। तस्य गृहं दूरे अस्ति।

   ।

2. शिशुः क्रीडति। तस्य सौन्दर्यं पश्यतु।

   ।

3. युवकः चलति। तस्य हस्ते पुष्पगुच्छः अस्ति।

   ।

4. कविः काव्यं लिखति। तस्य प्रशंसां करोतु।

   ।

5. नागराजः कार्यं करोति। तस्य साहाय्यं करोतु।

   ।

**स्त्री.**

1. छात्रा हसति। शिक्षिका तस्याः तर्जनं करोति।

   ।

2. महिला पचति । तस्याः नाम न जानामि ।

।

3. गीता नाटकं करोति । तस्याः अभिनयः सुन्दरः ।

।

4. बाला फलं खादति । तस्याः बुभुक्षा जाता ।

।

5. सेविका वस्त्रं प्रक्षालयति । तस्याः कार्यं पश्यतु ।

।

**नपुं.**

1. यानं गच्छति । तस्य धूमं पश्यतु ।

।

2. यन्त्रं शब्दं करोति । तस्य परिशोधनं कारयतु ।

।

3. फलं वृक्षात् पतति । तस्य वर्णं पश्यतु ।

।

4. मित्रम् आह्वयति । तस्य मुखं पश्यतु ।

।

5. उपनेत्रम् अधः पतति । तस्य धूलिं मार्जयतु ।

।

## अभ्यासः — 313

✍ **कोष्ठके प्रदत्तानां क्रियापदानाम् उचितं शत्रन्तं रूपं लिखत—**


[ कोष्ठक में प्रदत्त क्रियापदों के उचित शतृप्रत्ययान्त रूप लिखें। Write the appropriate forms ending in *śatṛ* suffix of the verbal words given in the bracket. ]

| | | | |
|---|---|---|---|
| **यथा** | **क्रीडन्त्याः** | बालिकायाः माता आह्वयति। | (क्रीडति) |
| 1. | परितः | राधायाः धनस्यूतः नष्टः। | (पश्यति) |
| 2. | वस्तूनि | नारायणस्य गुणः उत्तमः। | (क्रीणाति) |
| 3. | भाषणं | जनानां पादरक्षाः बहिः सन्ति। | (शृण्वन्ति) |
| 4. | वेगेन | नद्याः जलं निर्मलम् अस्ति। | (प्रवहति) |
| 5. | शब्दं | यानस्य वर्णः पीतः। | (करोति) |
| 6. | गृहे | सदस्यानां संख्या अधिका। | (निवसति) |
| 7. | निद्रां | महिलायाः धनं चोरितवान्। | (करोति) |
| 8. | मार्गे | बालिकायाः परीक्षा अस्ति। | (गच्छति) |
| 9. | कार्यक्रमे | नर्तक्योः नूपुराणि नष्टानि। | (नृत्यति) |
| 10. | रमेशः | मित्रस्य कोषात् लेखनीं स्वीकृतवान्। | (हसति) |
| 11. | सभायां | गायकयोः गीतं मधुरम्। | (गायति) |
| 12. | साहित्यं | शिक्षिकायाः पाठनं सुन्दरम्। | (पाठयति) |
| 13. | मन्त्रालये कार्यं | सचिवस्य कार्योत्साहः अस्ति। | (करोति) |
| 14. | कार्यं | कृषिकाणां परिश्रमेण फलम् अपि अधिकम्। | (करोति) |
| 15. | कुत्र | शिशोः माता गतवती ? | (दीव्यति) |

✍ **अत्र कानिचन चित्राणि सन्ति। तानि कस्य/कस्याः, कयोः, केषाम्/कासाम् इति यथोदाहरणं वाक्यानि लिखत--**


[ नीचे कई चित्र दिये गए हैं। वे किनके हैं उदाहरण के अनुसार वाक्यों में लिखें। Some pictures are given below. Make sentences by indicating whom they belong to. ]

**यथा**


पठतः बालकस्य चित्रम् । धावतः अश्वस्य चित्रम् । गच्छन्त्याः बालिकायाः चित्रम् ।





1. । 2. । 3. ।






4. । 5. । 6. ।

## अभ्यासः — 315

✍ **एतस्य चित्रस्य आधारेण यथोचितं सम्बन्धं प्रकल्प्य यथोदाहरणं वाक्यानि लिखत—**

[ इस चित्र के आधार पर उचित सम्बन्ध बनाते हुए, उदाहरण के अनुसार वाक्य बनाएं। Make sentences by deciding the relationship on the basis of the graph given below as shown in the example. ]




यथा 1. गोपालः गायतः प्रकाशस्य मित्रम् । 9. ।

2. । 10. ।

3. । 11. ।

4. । 12. ।

5. । 13. ।

6. । 14. ।

7. । 15. ।

8. । 16. ।

# षष्ठः स्तबकः

## 6.7 सप्तमः पाठः




### [ शतृ-प्रत्ययान्त-रूपम् ]

**सप्तमी-प्रयोगाः**




**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]

**पुं.**

  = 

रथः चलति।    तस्मिन् यात्रिकः उपविष्टः अस्ति।    **चलति रथे** यात्रिकः उपविष्टः अस्ति।

  = 

गजः तिष्ठति।    तस्मिन् राजा उपविशति।    **तिष्ठति गजे** राजा उपविशति।

**स्त्री.**



बलिका पूजयति।




तस्यां देवः कृपां प्रदर्शयति।


=



**पूजयन्त्यां बालिकायां** देवः कृपां प्रदर्शयति।




पेटिका पतति।



तस्यां वस्त्राणि सन्ति।

=



**पतन्त्यां पेटिकायां** वस्त्राणि सन्ति।

**नपुं.**



जलं प्रवहति।



तस्मिन् मकरः अस्ति।

=



**प्रवहति जले** मकरः अस्ति।

## त्रिषु लिङ्गेषु शत्रन्तसप्तमी-रूपाणि

**अधोलिखितानि रूपाणि स्मरत—**

[ अधोलिखित रूपों का स्मरण करें। Remember the following declension. ]

**पुं.**

| **मूलशब्दः** | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| तरत् | तरति | तरतोः | तरत्सु |
| गायत् | गायति | गायतोः | गायत्सु |
| क्रीडत् | क्रीडति | क्रीडतोः | क्रीडत्सु |
| धावत् | धावति | धावतोः | धावत्सु |
| अभिनयत् | अभिनयति | अभिनयतोः | अभिनयत्सु |
| पठत् | पठति | पठतोः | पठत्सु |
| लिखत् | लिखति | लिखतोः | लिखत्सु |

**स्त्री.**

| | | | |
|---|---|---|---|
| गायत् | गायन्त्यां | गायन्त्योः | गायन्तीषु |
| वदत् | वदन्त्यां | वदन्त्योः | वदन्तीषु |
| मिलत् | मिलन्त्यां | मिलन्त्योः | मिलन्तीषु |
| खादत् | खादन्त्यां | खादन्त्योः | खादन्तीषु |
| शृण्वत् | शृण्वत्यां | शृण्वत्योः | शृण्वतीषु |
| पतत् | पतन्त्यां | पतन्त्योः | पतन्तीषु |
| भ्रमत् | भ्रमन्त्यां | भ्रमन्त्योः | भ्रमन्तीषु |

⇨ **नपुंसके शतृप्रत्यये पुंलिङ्गवत् समानं रूपं प्रचलति।**

## अभ्यासः — 316

✍ **उदाहरणानुसारं रिक्तस्थानानि पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थानों की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | | | |
|---|---|---|---|
| **यथा** | **तरत्सु** | तरुणेषु अरुणः तरणपटुः अस्ति। | (तरत्) |
| | **गच्छति** | काले वयं स्वस्थाः भवामः। | (गच्छत्) |
| 1. | | शिक्षके कोलाहलः न भवतु। | (तिष्ठत्) |
| 2. | | नटेषु गोविन्दः श्रेष्ठः। | (अभिनयत्) |
| 3. | | गायकेषु हरीशः विशारदः। | (गायत्) |
| 4. | | वाक्ये अशुद्धं न भविष्यति। | (वदत्) |
| 5. | | मुनौ देवस्य कृपा अस्ति। | (ध्यायत्) |
| 6. | | छात्रेषु अयं साधुः। | (पठत्) |
| 7. | | बालकयोः शक्तिः अधिका अस्ति। | (धावत्) |
| 8. | | छात्रेषु एषा अधिका योग्या अस्ति। | (पठत्) |
| 9. | | धनिकेषु औदार्यं पश्यतु। | (यच्छत्) |

## अभ्यासः — 317

✍ **वाक्यानुगुणम् उचितपदैः रिक्तस्थानानि पूरयत—**

[ वाक्य के अनुरूप पदों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the words suiting to the sentence. ]

| | | | |
|---|---|---|---|
| **यथा** | **प्रवहन्त्यां** | नद्यां मीनाः सन्ति। | (प्रवहत्) |
| | **गायन्तीषु** | बालिकासु मीना प्रथमा अस्ति। | (गायत्) |
| 1. | | नर्तकीषु विशेषकौशलम् अस्ति। | (नृत्यत्) |
| 2. | | भक्तासु भगवान् प्रसीदति। | (पूजयत्) |
| 3. | पाठं | अस्मासु माला प्रथमा। | (पठत्) |
| 4. | अकार्यं | बालिकासु सौजन्यं नास्ति। | (कुर्वत्) |
| 5. | असत्यं | तासु मम विश्वासः नास्ति। | (कथयत्) |

## अभ्यासः — 318

✍ **यथोदाहरणम् अधोनिर्दिष्टानि रिक्तस्थानानि पूरयत–**

[ उदाहरण के अनुसार अधोनिर्दिष्ट रिक्तस्थानों की पूर्ति करें। Fill in the blanks as done in the example. ]

| एक. | द्वि. | बहु. |
|---|---|---|

**यथा** **प्रवहन्त्यां नद्यां मकराः सन्ति** ।

**प्रवहन्त्योः नद्योः मकराः सन्ति** ।

**प्रवहन्तीषु नदीषु मकराः सन्ति** ।

1. कथयन्त्यां महिलायां विश्वासः नास्ति ।

 ।

 ।

2. ।

पूजयन्त्योः भक्तयोः देवः कृपां प्रदर्शयति ।

 ।

3. ।

 ।

कार्यं कुर्वतीषु पुत्रीषु मातुः विशेषप्रीतिः ।

4. आगच्छन्त्याम् एतस्यां सद्गुणाः सन्ति ।

 ।

 ।

5. नृत्यन्त्यां नर्तक्यां विशेषकौशलम् अस्ति।

।

।

7. तिष्ठन्त्यां लतायां पुष्पाणि न सन्ति।

।

।

## अभ्यासः — 319

**उदाहरणानुसारं कोष्ठकशब्दानां सप्तम्यन्तरूपैः रिक्तस्थानं पूरयत—**

[ उदाहरण के अनुसार कोष्ठक में प्रदत्त सप्तम्यन्त रूपों से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the locative forms of the words given in the bracket as shown in the example. ]

| | | | |
|---|---|---|---|
| यथा | **प्रवहन्त्यां** | नद्यां जलप्रवाहः महान् नास्ति। | (प्रवहत्) |
| | **विकसतोः** | पद्मयोः सुगन्धः अस्ति। | (विकसत्) |
| | **नृत्यन्त्योः** | नर्तक्योः एषा सुन्दरी अस्ति। | (नृत्यत्) |
| 1. | | युवकेषु गोविन्दः समीचीनः। | (गच्छत्) |
| 2. | | लेखेषु दोषाः सन्ति। | (लिखत्) |
| 3. | | महिलासु एषा मम भगिनी। | (हसत्) |
| 4. | | जले स्वच्छता नास्ति। | (पतत्) |
| 5. | | महिलयोः उमा का अस्ति ? | (अवतरत्) |
| 6. | | पूजकेषु प्रथमः मम ग्रामीणः। | (पूजयत्) |
| 7. | | अध्यापिकासु सा संस्कृतज्ञा। | (उपविशत्) |
| 8. | | बालके मम क्रोधः अस्ति। | (भ्रमत्) |
| 9. | | याने चक्रद्वयम् अस्ति। | (गच्छत्) |
| 10. | | जनेषु सोहनः नास्तिकः एव। | (प्रणमत्) |
| 11. | | प्राणिषु हरिणः सुन्दरः। | (चरत्) |

शतृप्रत्ययान्त-प्रयोगाः
(पुं. / नपुं.)

## नित्यं विद्यामुपास्महे

**मोहनः** — अम्ब ! अहं विद्यालयं गच्छामि।

**माता** — सर्वाणि पुस्तकानि स्वीकृतवान् खलु ? त्वरां **कुर्वन्** किमपि विस्मृतवान् तु न ?

**मोहनः** — न अम्ब ! सर्वं **स्मरन्** स्यूते स्थापितवान् अस्मि।

**माता** — अद्य युष्माभिः सह रमेशः न आगच्छति। एवं ननु ?

**मोहनः** — आम्, अद्य तस्य गृहे काऽपि पूजा अस्ति। अतः सः गृहे एव **तिष्ठन्** पठिष्यति।

**माता** — अस्तु, मार्गे **गच्छन्** इतस्ततः मा पश्य। **आगच्छत्** यानं दृष्ट्वा सावधानं चल। पृष्ठभागतः **आगच्छतां** यानानां विषये अवधानवान् भव। सर्वदा रथ्यायां चलन् जागरूको भव। रथ्यायाः पार्श्वे पादचारि-मार्गे एव चल। **चलत्** लोकयानम् आरोढुं प्रयासं मा कुरु। तथैव **चलतः लोकयानात्** अपि मा अवतर।



**मोहनः** — अस्तु अम्ब !

**माता** — कक्ष्यायां **पठन्** अन्यैः सह सम्भाषणं मा कुरु। अध्यापकः यदा **पाठयन्** भवति तदा श्रद्धया शृणु। कक्ष्यायां कोलाहलं **कुर्वन्** अध्यापकानां कोपपात्रं मा भवेः। पाठं **शृण्वन्** टिप्पणीं लिख।

**मोहनः** — भवतु अम्ब !

**माता** — कुत्रचित् **क्रीडन्** विलम्बं मा कुरु। **प्रत्यागच्छन्** रथ्यायां मा क्रीड। **धावन्** च मा पत।

**मोहनः** — पश्यतु अम्ब ! धीरजादयः अद्य अत्रैव आगताः। वयं वार्तालापं **कुर्वन्तः** पद्भ्यां गच्छामः। लोकयानं **पश्यन्तः** अपि न आरोक्ष्यामः।

**माता** — **जल्पन्तः** मन्दं **गच्छन्तः** विलम्बं मा कुरुत। धीरजः सदा **क्रीडन्** भवति इति शृणोमि। तस्य सङ्गात् **अपठन्** त्वम् अपि अल्पान् अङ्कान् मा प्राप्नुहि।

**मोहनः** — सर्वे इदानीम् उपस्थिताः। अतः अहं गच्छामि अम्ब !

**माता** — भो. मोहन ! राजेश ! युवां कक्ष्यायाम् अध्यापकस्य आदेशानुसारं **व्यवहरन्तौ**, **पठन्तौ**, **लिखन्तौ** अभ्यासान् **कुर्वन्तौ** च अध्ययनं कुरुतम्। यूयं सर्वे अधिकान् अङ्कान् **प्राप्नुवन्तः** कीर्तिशालिनः भवत।

◆◆◆

## अभ्यासः — 320

1. **पाठाधारेण उत्तराणि लिखत—**

[ पाठ के आधार पर उत्तर लिखें। Answer on the basis of the present lesson. ]

(i) रमेशः किमर्थं गृहे तिष्ठन् पठति ?

।

(ii) मोहनः कीदृशानां यानानां विषये अवधानवान् भवेत् ?

।

(iii) मोहनः कीदृशात् लोकयानात् न अवतरेत् ?

।

(iv) धीरजादयः कक्ष्यायां कथम् अध्ययनं कुर्युः ?

।

(v) धीरजादयः कीदृशाः सन्तः कीर्तिशालिनः भवेयुः ?

।

2. **अधोनिर्दिष्टानां शत्रन्तरूपाणां धातुं बहुवचनं च निर्दिशत—**

[ अधोनिर्दिष्ट शतृप्रत्ययान्त रूपों के धातु एवं बहुवचन का निर्देश करें। Point out the root and the plural forms of the following words ending in *śatṛ*-suffix. ]

| | | | धातुः | बहु. |
|---|---|---|---|---|
| उदा. | स्मरन् | – | स्मृ | स्मरन्तः |
| (i) | तिष्ठन् | – | | |
| (ii) | गच्छन् | – | | |
| (iii) | चलन् | – | | |
| (iv) | कुर्वन् | – | | |
| (v) | शृण्वन् | – | | |
| (vi) | क्रीडन् | – | | |

(vii) धावन् –

(viii) जल्पन् –

(ix) पठन् –

(x) आप्नुवन् –

**3. अधोनिर्दिष्ट-शत्रन्त-शब्दानां नपुंसकरूपाणि प्रथमाविभक्तौ लिखत–**

[ अधोनिर्दिष्ट शतृप्रत्ययान्त शब्दों के नपुंसक रूप प्रथमाविभक्ति में लिखें। Write the nominative forms in neuter gender of the following words ending in *śatṛ*-suffix. ]

| | | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| उदा. | तिष्ठन् | तिष्ठत् | तिष्ठती | तिष्ठन्ति |
| (i) | गच्छन् | | | |
| (ii) | चलन् | | | |
| (iii) | पतन् | | | |
| (iv) | विकसन् | | | |
| (v) | कुर्वन् | | | |
| (vi) | भ्रमन् | | | |
| (vii) | अवरतन् | | | |
| (viii) | प्रविशन् | | | |

**4. उचितानि शत्रन्तरूपाणि विशेष्यानुगुणं रिक्तस्थाने लिखत–**

[ विशेष्य के अनुसार उचित शतृप्रत्ययान्त रूप रिक्तस्थान में लिखें। Write the appropriate forms ending in the *śatṛ*-suffix conducive to the qualificand . ]

(i) .......... बालकाः कोलाहलं कुर्वन्ति। (गम्)

(ii) .......... छात्राः धावन्ति। (दृश्)

(iii) अङ्कान् .......... त्वं कीर्तिमान् भव। (प्र-आप्)

(iv) सः क्रीडाङ्गणे .......... पतति। (धाव्)

(v) .......... तम् आह्वय। (आ-गम्)

| | | |
|---|---|---|
| (vi) | तेन सह मा गच्छ। | (आ-गम्) |
| (vii) | तस्मै पुस्तकं देहि। | (पठ्) |
| (viii) | बालेषु एषः अत्युत्तमः। | (लिख्) |
| (ix) | तैः सह त्वमपि क्रीड। | (क्रीड्) |

**5. उचितानि शत्रन्तनपुंसकरूपाणि रिक्तस्थाने लिखत–**

[ उचित शतृप्रत्ययान्त नपुंसक रूप रिक्तस्थान में लिखें। Write the appropriate neuter forms ending in *śatṛ*-suffix in the given space. ]

| | | |
|---|---|---|
| (i) | यानम् अनुसृत्य जनाः धावन्ति। | (गम्) |
| (ii) | विमानं समीपतः दृष्ट्वा बालकः विस्मितः। | (चल्) |
| (iii) | चक्राणि कार्यं सम्पादयन्ति। | (भ्रम्) |
| (iv) | आकाशात् विमानं कम्पते। | (अव-तॄ) |
| (v) | पुष्पाणि सुगन्धं प्रसारयन्ति। | (वि-कस्) |
| (vi) | मित्राणि मह्यं न रोचन्ते। | (जल्प्) |
| (vii) | पुस्तकानि दृष्ट्वा ग्रन्थपालः खिन्नः। | (नश्) |

**6. एतं क्रमं यूयं जानीथ एव। अतः अधोनिर्दिष्टानाम् एकवचनरूपाणां बहुवचनरूपं विलिख्य त्रिषु वचनेषु शत्रन्तरूपाणि लिखत–**

[ इन क्रमों को आप जानते हैं। इसलिए अधोनिर्दिष्ट एकवचन रूपों के बहुवचन रूप लिखकर तीनों वचनों में शतृप्रत्ययान्त रूप लिखें। You know the following order. Therefore, write the plural forms of the following singular forms along with the declension of the words ending in *śatṛ*-suffix in all the three numbers. ]

| एक. | बहु. | शात्रन्तरूपम् (पु.) |
|---|---|---|
| पठति | पठन्ति | पठन् |

| | | बहु. | शत्रन्त पुं. एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| उदा. | पठति | **पठन्ति** | **पठन्** | **पठन्तौ** | **पठन्तः** |
| (i) | करोति | | | | |

(ii) शृणोति

(iii) जानाति

(iv) गृह्णाति

(v) शक्नोति

(vi) क्रीणाति

(vii) याति

(viii) रोदिति

(ix) विश्वसिति

(x) ददाति

**7. मञ्जूषानिर्दिष्टेषु रूपेषु शत्रन्तानि अन्यानि च पृथक्कुरुत—**

[ मञ्जूषा में निर्दिष्ट रूपों में से शतृप्रत्ययान्त रूप एवं अन्य रूपों को अलग करें। Separate the words ending in *śatṛ*-suffix from rest of the words given in the box. ]

| | | | | |
|---|---|---|---|---|
| शक्नुवन्, | शक्तवान्, | आगच्छन्, | धीमान्, | श्रीमान्, |
| जानन्, | कुर्वन्, | क्रीतवान्, | गच्छन्, | श्रुतवान् |

| **शत्रन्तानि** | **अन्यानि** |
|---|---|
| (i) | (i) |
| (ii) | (ii) |
| (iii) | (iii) |
| (iv) | (iv) |
| (v) | (v) |

**8. कर्मणि प्रयोगे वाक्यानि लिखत—**

[ कर्मवाच्य प्रयुक्त वाक्य लिखें। Write the sentences of passive voice. ]

**उदा.** गच्छन् शिक्षकः छात्रम् अवदत्।

**गच्छता शिक्षकेण छात्रः उक्तः**............... ।

(i) सः जलं पिबन् आकाशम् अपश्यत्।

............... ।

(ii) जल्पन् सः समयं विस्मृतवान्।

........................................।

(iii) बिलात् आगच्छन् सर्पः जिह्वां प्रसारितवान्।

........................................।

(iv) बालकाः क्रीडन्तः कोलाहलं कृतवन्तः।

........................................।

(v) चित्रं पश्यन्तः जनाः आनन्दम् अनुभूतवन्तः।

........................................।

(vi) गीतं शृण्वन्तः प्रेक्षकाः करतालिकां कृतवन्तः।

........................................।

**9. यथोदाहरणं शत्रन्तरूपैः वाक्यं पूरयत—**

[**उदाहरण के अनुसार शतृप्रत्ययान्त रूपों से वाक्य पूरा करें।** Complete the sentences with the words ending in *śatṛ*-suffix as shown in the example. ]

**उदा.** यच्छन् धनिकः उदारः।

**यच्छतः** **धनिकस्य** औदार्यं पश्य।

(i) प्रहरन् स्वामी निष्करुणः।

........................ ........................ निष्करुणता निन्दनीया।

(ii) विकसत् पुष्पं सुन्दरम्।

........................ ........................ सौन्दर्यम् अपूर्वम्।

(iii) क्रीणन्तः जनाः चतुराः।

........................ ........................ चातुर्यं श्लाघनीयम्।

(iv) कथयन् भवान् प्राज्ञः।

........................ ........................ प्राज्ञत्वं किम् अहं न जानामि ?

(v) चिन्तयन्तः पण्डिताः गम्भीराः।

........................ ........................ गाम्भीर्यं पश्य।

(vi) आज्ञां पालयन्तः छात्राः विधेयाः।

........................ ........................ विधेयताम् अध्यापकः प्राशंसत्।

**शतृप्रत्ययान्त-प्रयोगाः (स्त्री.)**

## समुद्रतीरे सायंकालः

अहम् आभा अस्मि। पुरीनगरे स्व-पितृभ्यां सह **निवसन्ती** अहं नवोदय-विद्यालये षष्ठकक्ष्यायां **पठन्ती** अस्मि। मम पिता आरक्षिपदे कार्यं कुर्वन्नस्ति। सः प्रायः स्वकार्येषु व्यापृतः एव तिष्ठति। अतः अहं मात्रा सह यदा तदा सायंकालिक-भ्रमणार्थं **गच्छन्ती** आसम्।



एकदा अहं मम सखी च स्वमात्रा सह समुद्र-तटं भ्रमितुं गतवत्यौ आस्व। माता समुद्रं **पश्यन्ती** एकत्र बालुकायाम् उपाविशत्। **उपविशन्त्या** तया समुद्रे **तरन्त्यः प्रत्यागच्छन्त्यः** नौकाः अवलोकिताः। अहं स्वसख्या सह तत्र **भ्रमन्तीभिः** धीवर-कन्याभिः सह अक्रीडम्। आवां कदाचित् बालुकायां विचरतः कर्कटशिशून् ग्रहीतुं तेषां पश्चात् अन्वधावाव। **धावन्त्यौ** कदाचित् आवां समुद्रजलम् अपि **स्पृशन्त्यौ** आस्व। कर्कटशिशूनां पश्चात् **धावन्तीं**, समुद्रजलं च **स्पृशन्तीं** मां मम सखीं च माता कोपवचनैः निवारयति स्म। **निवारयन्त्याः** मातुः वचनम् यदा आवां न अशृणुव तदा **कुप्यन्ती** सा गृहं प्रत्यावर्तितुम् अवाञ्छत्। गृह-प्रत्यावर्तनम् **इच्छन्तीं** तां दृष्ट्वा आवां तादृशम् आचरणं त्यक्तवत्यौ। अधिकं खेलितुम् अनुज्ञां **याचन्त्योः** आवयोः अनुरोधं स्वीकृत्य सा तत्र पुनः स्थितवती। समुद्रस्य रमणीयां शोभां द्रष्टुं तत्र **उपविशन्तीभिः अटन्तीभिश्च** महिलाभिः सह वार्तालापं **कुर्वती** सा प्रत्यागमनसमयम् अपि व्यस्मरत्। **आगच्छन्तीं** तमिस्रां च दृष्ट्वा आवां तां समयं स्मारितवत्यौ। गृहं प्रति प्रत्यावर्तनसमये वयं मार्गे इतस्ततः **अटन्तीम्** एकां वैदेशिकीं महिलाम् अपश्याम। सा पर्यटकगृहस्य मार्गं विस्मृतवती आसीत्। तस्यै उचितं मार्गं **प्रदर्शयन्त्यः** वयं स्वगृहं प्रत्यागतवत्यः।

◆◆◆

## अभ्यासः — 321

1. **पाठं पठित्वा उत्तरं लिखत–**

[ पाठ पढ़कर उत्तर लिखें। Answer on the basis of the lesson ]

(i) आभा कुत्र निवसति ?

।

(ii) सा समुद्रतीरं काभ्यां सह गतवती ?

।

(iii) आभायाः पिता कुत्र कार्यं करोति ?

।

(iv) सा तत्र कीदृशीभिः धीवरकन्याभिः सह अक्रीडत् ?

।

(v) आभायाः माता कीदृशीभिः महिलाभिः सह वार्तालापं कुर्वती प्रत्यागमनसमयं व्यस्मरत् ?

।

2. **पाठाधारेण 'सत्यम्' ( ✓ ) 'असत्यं' ( × ) वा चिह्नीकुरुत –**

[ पाठ के आधार पर सत्य ( ✓ ) अथवा असत्य ( × ) चिह्नित करें। Mark whether true ( ✓ ) or false ( × ) on the basis of the lesson. ]

(i) आभा समुद्रतीरं मात्रा सह गतवती। ☐

(ii) आभा समुद्रतीरे कर्कटशिशून् ग्रहीतुम् अन्वधावत्। ☐

(iii) आभायाः सखी समुद्रतीरं न गतवती। ☐

(iv) आभायाः पिता अपि समुद्रतीरं गतवान्। ☐

(v) एका वैदेशिकी महिला मार्गं विस्मृतवती। ☐

**3. शत्रन्त-स्त्रीलिङ्गरूपाणि लिखत–**

[ शतृप्रत्ययान्त स्त्रीलिङ्गरूप लिखें। Write the feminine declension ending in *śatṛ*-suffix. ]

| | | | |
|---|---|---|---|
| उदा. | गच्छन् | – | गच्छन्ती |
| (i) | स्मरता | – | |
| (ii) | कुर्वतः | – | |
| (iii) | पिबत्सु | – | |
| (iv) | लिखते | – | |
| (v) | पठद्भ्याम् | – | |

**4. मूलधातुं निर्दिशत–**

[ मूल धातु का निर्देश करें। Point out the root. ]

| | | | |
|---|---|---|---|
| उदा. | धावत्या | – | धाव् |
| (i) | चलन्तीम् | – | |
| (ii) | वदन्तीभ्याम् | – | |
| (iii) | स्पृशन्ती | – | |
| (iv) | पश्यन्त्याः | – | |

**5. पुंलिङ्गरूपं स्त्रीलिङ्गे, स्त्रीलिङ्गरूपं च पुंलिङ्गे परिवर्तयत–**

[ पुंलिङ्ग रूप को स्त्रीलिङ्ग में तथा स्त्रीलिङ्ग रूप को पुंलिङ्ग में वदलें। Change the masculine form into feminine and the vice versa. ]

| | | | |
|---|---|---|---|
| उदा. | खेलन्तीभिः | – | खेलद्भिः |
| (i) | क्रीडतः | – | |
| (ii) | रुदन्त्याः | – | |
| (iii) | स्वपन्तीषु | – | |
| (iv) | आगच्छद्भ्याम् | – | |
| (v) | भ्रमन् | – | |

**6. योजयत—**

[ जोडें। Match. ]

| | | | |
|---|---|---|---|
| (i) | रुदन्तीं | (क) | वृद्धाभ्याम् |
| (ii) | हसन्त्या | (ख) | छात्रान् |
| (iii) | भ्रमद्भ्यां | (ग) | बालिकाम् |
| (iv) | पठतः | (घ) | महिलया |
| (v) | क्रीडता | (ङ) | शिक्षिकायै |
| (vi) | लिखन्त्यै | (च) | शिशुना |

**7. रिक्तस्थानं पूरयत—**

[ खालि स्थान भरें। Fill in the blanks. ]

| | | | |
|---|---|---|---|
| उदा. | (उपविश्) | उपविशन्तीं | महिलाम् आह्वय। |
| (i) | (पठ्) | | छात्रया पुस्तकम् आनीतम्। |
| (ii) | (पा-पिब्) | | धेनुं पश्य। |
| (iii) | (हस्) | | मात्रा पुत्रः आलिङ्गितः। |
| (iv) | (चर्) | | अजासु तृतीया कृषकस्य। |

**8. मञ्जूषानिर्दिष्टानि शत्रन्तरूपाणि विभक्तिशः लिखत—**

[ मञ्जूषा में निर्दिष्ट शतृप्रत्ययान्त रूपों को विभक्ति के अनुसार लिखें। Write the words given in the box ending in the *śatṛ*-suffix as per the case-ending. ]

| |
|---|
| गच्छन्ती, पश्यन्ती, उपविशन्त्या, भ्रमन्तीभिः, धावन्तीम्, स्पृशन्तीम्, निवारयन्त्याः, इच्छन्तीम्, याचन्त्योः, अटन्तीभिः, उपविशन्तीभिः, कुर्वती, आगच्छन्तीम्, प्रदर्शयन्त्यः, धावन्तीनाम्, उपविशन्त्याः |

| प्रथमा | द्वितीया | तृतीया | षष्ठी |
|---|---|---|---|
| (i) | (i) | (i) | (i) |
| (ii) | (ii) | (ii) | (ii) |

| | | | |
|---|---|---|---|
| (iii) | (iii) | (iii) | (iii) |
| (iv) | (iv) | (iv) | (iv) |

**9. कोष्ठकस्थानि शुद्धरूपाणि रिक्तस्थाने लिखत–**

[ रिक्तस्थान में कोष्ठक से शुद्ध रूप लिखें। Write the correct forms from the bracket in the given space. ]

| | | | |
|---|---|---|---|
| (i) | कार्यं ______ सा श्रान्ता। | | (कुर्वन्ती/कुर्वती) |
| (ii) | गीतं ______ मया समयः न स्मृतः। | | (शृण्वत्या/शृण्वन्त्या) |
| (iii) | ______ तां बालिकां सान्त्वयतु। | | (रुदतीम्/रुदन्तीम्) |
| (iv) | सस्यं ______ बालिकां निवारय। | | (छिन्दन्तीम्/छिन्दतीम्) |
| (v) | ______ महिलायाः निन्दनेन अलम्। | | (क्रीणत्याः/क्रीणन्त्याः) |
| (vi) | कार्यं कर्तुम् ______ साहाय्यं कुरु। | | (अशक्नुवत्याः/अशक्नुवन्त्याः) |
| (vii) | कन्दुकं ______ तया सह क्रीड। | | (गृह्णन्त्याः/गृह्णत्याः) |

# षष्ठः स्तबकः

## 6.8 अष्टमः पाठः

### [ शानच्-प्रत्ययान्त-रूपम् ]

**त्रिषु लिङ्गेषु प्रथमा-प्रयोगाः**

**अधोलिखितानि वाक्यानि पठत–**

[ अधोलिखित वाक्यों को पढ़ें। Read the following sentences. ]


**पुं.**



गुरुं **सेवमानः** शिष्यः।




बलिं **याचमानः** वामनः।




भगवन्तं **वन्दमानः** भक्तः।



नागरिकान् **भाषमाणः** नेता।



आकाशे **डयमानाः** पक्षिणः।



नदीं **गाहमानाः** महिषाः।

**स्त्री.**



विष्णुं **सेवमाना** लक्ष्मी ।



**स्मयमाना** नायिका ।




शिवं **वन्दमाना** पार्वती ।



**शयाना** वृद्धा ।

**नपुं.**



सरसि **शोभमानं** कमलम् ।



पर्वतात् **वहमानं** जलम् ।

☞ **एतेषु वाक्येषु शानच् (आन) प्रत्ययः अस्ति। वर्तमानकालार्थे एषः प्रत्ययः भवति।**

⇨ यदि धातुः परस्मैपदी भवति तर्हि तस्य वर्तमानार्थे शतृ-प्रत्ययः।

⇨ यदि धातुः आत्मनेपदी भवति तर्हि तस्य वर्तमानार्थे शानच्-प्रत्ययः।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| **उदा.** | पठ् | – | परस्मैपदी | – | पठ् | + | अत् (शतृ-प्रत्ययः) | = | पठन् |
| | लिख् | – | परस्मैपदी | – | लिख् | + | अत् (शतृ-प्रत्ययः) | = | लिखन् |
| | वन्द् | – | आत्मनेपदी | – | वन्द | + | अमान (शानच्-प्रत्ययः) | = | वन्दमानः |
| | सेव् | – | आत्मनेपदी | – | सेव् | + | अमान (शानच्-प्रत्ययः) | = | सेवमानः |

⇨ **'पठन्, लिखन्, वन्दमानः, सेवमानः' इत्येतानि पुंलिङ्गे प्रथमैकवचन रूपाणि भवन्ति।**

**स्मरत–**
[ स्मरण करें। Remember. ]

**धातुः**

| परस्मैपदी | आत्मनेपदी |
|---|---|
| ( परस्मैपदिभ्यः शतृ ) | ( आत्मनेपदिभ्यः शानच् ) |
| पठ् + अत् = पठन् | वन्द् + अमान = वन्दमानः |

***एतदत्र स्मरत***

परस्मैपदिभ्यः 'शतृ' एव, न 'शानच्'। अतः 'पठमानः' इति रूपम् असाधु।
आत्मनेपदिभ्यः 'शानच्' एव, न 'शतृ'। अतः 'वन्दन्' इति रूपम् असाधु।
उभयपदिभ्यः उभयं भवति यथा– याचन्, याचमानः।

☞ **शानजन्तरूपाय नियमः**

⇨ **आत्मनेपदिनां धातूनाम् एव शानजन्तं रूपं भवति।**

तत्र लट्लकारस्य प्रथमपुरुषस्य द्विवचनस्य अन्ते यदि *'एते'* इति स्वरूपं भवेत्, तदा तस्य स्थाने (शानच्) → *'अमान'* इति संयोजनं भवति यथा– *एधेते* → *एधमानः*।

⇨ **पुंलिङ्गे रामवत्, स्त्रीलिङ्गे रमावत्, नपुंसके फलवत् इत्येवं त्रिषु वचनेषु रूपाणि भवन्ति।**

☞ **अन्यरूपनिदर्शनम्**

| **धातुः** | **लटि प्र.पु.-द्वि.** | **शानचि** | **पुं.** | **स्त्री.** | **नपुं.** |
|---|---|---|---|---|---|
| एध् | एधेते | एध्+अमान | एधमानः | एधमाना | एधमानम् |
| वन्द् | वन्देते | वन्द्+अमान | वन्दमानः | वन्दमाना | वन्दमानम् |
| वेप् | वेपेते | वेप्+अमान | वेपमानः | वेपमाना | वेपमानम् |
| पूरि | पूरयेते | पूरय्+अमान | पूरयमाणः | पूरयमाणा | पूरयमाणम् |
| जन् (जाय्) | जायेते | जाय्+अमान | जायमानः | जायमाना | जायमानम् |

☞ **विवरणम्**

आत्मनेपदी धातुः – एध्

लटि प्रथमपुरुषस्य द्विवचने – एधेते = एध् + एते

↓

एध् + अमान = एधमान

↓

| **लिङ्गे** | | **योगः** | **एक.** | **द्वि.** | **बहु.** | | **सदृशशब्दः** |
|---|---|---|---|---|---|---|---|
| पुँल्लिङ्गे | → | ः | एधमानः | एधमानौ | एधमानाः | → | राम |
| स्त्रीलिङ्गे | → | ा | एधमाना | एधमाने | एधमानाः | → | रमा |
| नपुंसके | → | म् | एधमानम् | एधमाने | एधमानानि | → | फल |

## अभ्यासः – 322

✍ **यथोदाहरणं रिक्तस्थानं पूरयत–**

[ उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example. ]

उदा.

| | | | | | |
|---|---|---|---|---|---|
| 1. | मुद् (मोद्) | | 4. | | (स्त्री. बहु.) |
| 2. | शिक्ष् | | 6. | | (पुं. एक.) |
| 3. | वृत् (वर्त) | | 9. | | (नपुं. द्वि.) |
| 4. | याच् | | 7. | | (पुं. बहु.) |
| 5. | स्पर्ध् | | 3. | | (नपुं. एक.) |
| 6. | कामि (कामय्) | + अमान = | 10. | | (स्त्री. एक.) |
| 7. | जन् (जाय्) | | 2. | | (पुं. द्वि.) |
| 8. | मन् (मन्य्) | | 5. | | (नपुं. एक.) |
| 9. | मृ (म्रिय्) | | 8. | | (नपुं. द्वि.) |
| 10. | उद्घाटि (उद्घाटय्) | | 1. | **मोदमानः** | (पुं. एक.) |

## अभ्यासः – 323

✍ **उदाहरणम् आश्रित्य यथानिर्देशं रूपाणि लिखत–**

[ उदाहरण के आधार पर यथानिर्देश रूपों को लिखें। Write the declension as per the instructions as shown in the example. ]

| | **धातुः** | **प्रत्ययः** | **रूपम्** | **निर्देशः** |
|---|---|---|---|---|
| उदा. | वन्द् | शानच् | **वन्दमानाभ्याम्** | तृतीयाद्विवचने स्त्रियाम् |
| 1. | शोभ् | " | | सप्तम्याः एकवचने पुंलिङ्गे |
| 2. | कम्प् | " | | चतुर्थ्याः एकवचने स्त्रियाम् |
| 3. | यत् | " | | पञ्चम्याः एकवचने पुंलिङ्गे |
| 4. | लभ् | " | | षष्ठ्याः बहुवचने स्त्रियाम् |
| 5. | वृध् (वर्ध) | " | | प्रथमाद्विवचने नपुंसके |
| 6. | सह् | " | | तृतीयाबहुवचने स्त्रीलिङ्गे |
| 7. | खिद् (खिद्य्) | " | | सप्तम्याः द्विवचने स्त्रियाम् |
| 8. | रचि (रचय्) | " | | प्रथमाद्विवचने पुंलिङ्गे |
| 9. | प्र-अर्थि (प्रार्थय) | " | | षष्ठ्याः एकवचने स्त्रियाम् |

☞ यत्र लट्लकारे प्रथमपुरुषस्य द्विवचनस्य अन्ते *'आते'* इति स्वरूपं भवति, तत्र तस्य स्थाने शानच् → *आन* इति संयोजनं भवति।

⇨ **त्रिषु लिङ्गेषु त्रिषु वचनेषु तिसृषु विभक्तिषु च सदृशं रूपं पूर्ववत् जानीत।**

☞ **विवरणम्**

आत्मनेपदी धातुः – शी (शय्)

लटि प्रथमपुरुषस्य द्विवचने – शय् + आते = शयाते

शय् + आन = शयानः

☞ **अन्यरूपनिदर्शनम्**

| | धातुः | लटि | शानचि | पुं. | स्त्री. | नपुं. |
|---|---|---|---|---|---|---|
| | शी | शेते | शय् + आन | शयानः | शयाना | शयानम् |
| | अधि-इ | अधीते | अधीय् + आन | अधीयानः | अधीयाना | अधीयानम् |
| | भुज् | भुङ्क्ते | भुञ्ज् + आन | भुञ्जानः | भुञ्जाना | भुञ्जानम् |
| | मन् | मनुते | मनु + आन | मन्वानः | मन्वाना | मन्वानम् |
| | कृ | कुरुते | कुरु + आन | कुर्वाणः | कुर्वाणा | कुर्वाणम् |
| ***अपवादः*** | आस् | आस्ते | आस् + आन (ईन) | आसीनः | आसीना | आसीनम् |

## अभ्यासः — 324

✍ **यथोदाहरणं रिक्तस्थानं पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example. ]

| | धातुः | | शानजन्तरूपम् | | धातुः | | शानजन्तरूपम् |
|---|---|---|---|---|---|---|---|
| 1. | अधि-इ (अधीय्) | → | अधीयानः | 6. | मन् (मन्व्) | → | |
| 2. | आ-शास् | → | | 7. | ब्रू (ब्रुव्) | → | |
| 3. | आ-चक्ष् | → | | 8. | दुह् | → | |
| 4. | कृ ( कुर्व् ) | → | | 9. | स्तु (स्तुव्) | → | |
| 5. | भुज् (भुञ्ज्) | → | | 10. | दा (दद्) | → | |


## अभ्यासः — 325

✍ **यथोदाहरणं रिक्तस्थानं पूरयत—**

[ उदाहरण के अनुसार रिक्तस्थान की पूर्ति करें। Fill in the blanks as shown in the example. ]

**धातुः** **शानजन्तरूपम्**

1. रुध् (रुन्ध्)
2. चि (चिन्व्)
3. सु (सुन्व्)
4. वृ (वृण्व्)
5. क्री (क्रीण्)
6. ग्रह् (गृह्ण्)
7. ज्ञा (जान्)
8. तन् (तन्व्)
9. भिद् (भिन्द्)
10. छिद् (छिन्द्)



## अभ्यासः – 326

☞ **मञ्जूषा-निर्दिष्टधातूनां 'क'-कोष्ठके अथवा 'ख'-कोष्ठके यथानिर्देशं शानजन्त-रूपाणि लिखत–**

[ मञ्जूषा में निर्दिष्ट धातुओं के शानजन्त रूप यथानिर्देश 'क'-कोष्ठक अथवा 'ख'-कोष्ठक में लिखें। Write the forms ending in *śānac*-suffix of the verbs given in the box either in *ka*-group or *kha*-group as per the instruction. ]

| | | | |
|---|---|---|---|
| 1. पू (पुन्) | 2. ईक्ष् | 3. बध् (बध्न्) | 4. कामि (कामय्) |
| 5. प्री (प्रीण्) | 6. रम् | 7. याच् | 8. बोधि (बोधय्) |
| 9. श्रु (शृण्व्) | 10. तन् (तन्व्) | | |

| क | अमान पुं. |
|---|---|

| ख | आन स्त्री. |
|---|---|

## अभ्यासः – 327

✍ **उपयुक्तेन शानजन्तेन रूपेण रिक्तस्थानं पूरयत–**

[ उचित शानच्प्रत्ययान्त रूप से रिक्तस्थान की पूर्ति करें। Fill in the blanks with the appropriate forms ending in *śānac*-suffix. ]

1. विद्वांसं शिष्यं विलोक्य गुरुः ________ अस्ति। (मुद्-मोदेते)
2. भवतां भक्तिः प्रतिदिनम् ________ भवतु। (एध्-एधेते)
3. श्लोकं ________ छात्राय कोशः अपेक्ष्यते। (शिक्ष्-शिक्षेते)
4. सरसि ________ कमलानि विलोकयत। (भास्-भासेते)
5. ________ पायसेन तृप्तिः भवति। (रुच्-रोचेते)

| | | | |
|---|---|---|---|
| 6. | शैत्यात् | बालकाय झटिति अग्निप्रज्वालनं कुरु। | (कम्प्-कम्पेते) |
| 7. | "रामः गच्छति" इत्यत्र | कः कालः अस्ति। | (वृत्-वर्तेते) |
| 8. | | शास्त्रज्ञः एव वस्तुतः शास्त्रज्ञः भवति। | (ऊह-ऊहेते) |
| 9. | | पक्षिणः सन्ति। | (डी-डयेते) (शुभ्-शोभेते) |
| 10. | | सति अपि फलस्य अप्राप्तौ चिन्ता मास्तु। | (यत्-यतेते) |

## अभ्यासः — 328

**शानजन्तरूपस्थानं क्रियापदं दृष्ट्वा पूरयत—**

[ क्रियापद को देखकर शानच्-प्रत्ययान्त स्थान की पूर्ति करें। Complete the sentence with the words ending in *śānac*-suffix as per the verbal forms. ]

| | शानजन्तम् | | क्रियापदम् |
|---|---|---|---|
| उदा. | तन्वानाय | नमः | { तन्–तन्वाते } |
| 1. | | स्मर | { अधिशी–अधिशयाते } |
| 2. | | आगच्छति | { अधि + इ–अधीयाते } |
| 3. | | अस्ति | { चि–चिन्वाते } |
| 4. | | प्रतिभाति | { ज्ञा–जानाते } |
| 5. | | सन्ति | { आ शास्–आशासाते } |
| 6. | | भ्रमति | { चि–चिन्वाते } |
| 7. | | प्रजाः सन्ति | { मन्–मन्वाते } |
| 8. | | न दुर्गतिं गच्छति | { कृ–कुर्वाते } |
| 9. | | प्रसीदति | { भुज्–भुञ्जाते } |

## अभ्यासः — 329

✍ **निर्देशानुरूपं वाक्यं निर्मात–**

[ निर्देश के अनुसार वाकय निर्माण करें। Make sentence as per the instruction. ]

| | | | |
|---|---|---|---|
| 1. | वरं | भक्तः तपः करोति। | {कामि (कामय्)} |
| 2. | एवम् | सः दोषं कृतवान्। | {आचक्ष्} |
| 3. | घटं | बालकः खेदं प्राप्तवान्। | {भिद् (भिन्द्} |
| 4. | नायकं देवं | जनाः तं पूजयति। | {मन् (मन्य्)} |
| 5. | सः वस्तूनि | मित्रम् अपश्यत्। | {क्री (क्रीण्)} |
| 6. | विद्यालये | छात्रः सन्तोषम् अनुभूतवान्। | {स्पर्ध्} |
| 7. | दोषं | अध्यापकः छात्रं प्रेषितवान्। | {क्षम्} |
| 8. | धर्मविषये | वेदान्ती जनान् तोषितवान्। | {भाष्} |
| 9. | पेटिकायां | धनं दृष्ट्वा कृपणः सन्तुष्टः। | {विद् (विद्य्)} |
| 10. | परिसरम् | सः तूष्णीम् अतिष्ठत्। | {(अव) लोक्} |

**अवधेयम्**

त्रिषु लिङ्गेषु त्रिषु वचनेषु अन्यासु विभक्तिषु अपि शानच्-प्रत्यायन्त-रूपाणां सदृशशब्दरूपानुसारेण प्रयोगः भवति।

शानच-प्रत्ययान्त-प्रयोगाः
(त्रिषु लिङ्गेषु)

## सीतास्वयंवरः

मिथिलायां सीतायाः विवाहं **कामयमानेन** राज्ञा जनकेन स्वयंवर-सभा आयोजिता। तदर्थं बहुभ्यः देशेभ्यः राजानः आमन्त्रिताः आसन्। स्वयंवर-मण्डपे **विद्यमानं** शिवधनुः निर्णायिकां भूमिकां निर्वक्ष्यति इति घोषणा **जायमाना** आसीत्। 'यः शिवधनुषि बाणम् आरोपयिष्यति तस्मै सीता प्रदास्यते' इति उद्घोषकः **भाषमाणः** अभवत्। सीतास्वयंवरं द्रष्टुं विश्वामित्रेण सह उपस्थितौ रामलक्ष्मणौ अपि स्वयंवरसभायां **शोभमानौ** आस्ताम्। विहार-प्रान्ते **प्रवहमानां** गङ्गानदीं तीर्त्वा ते तत्र प्राप्तवन्तः आसन्।



एकैकशः राजानः स्वभाग्यं परीक्षितुम् उद्युक्ताः। अनेके तु धनुषः उत्थापने **यतमानाः** असफलाः भवन्ति स्म। केचन आरम्भात् एव भीताः सन्तः **कम्पमानाभ्यां** हस्ताभ्यां धनुः उत्थापयन्ति स्म। असाफल्यं **भजमानाः** ते उपहासपात्रतां व्रजन्ति स्म। सीतां **कामयमानः** रावणः अपि स्वयंवरे भागं ग्रहीतुम् आगतवान् आसीत्। **कम्पमानेन** शिरसा सः धनुः उत्थापयन् भूमौ अपतत्। तद् दृष्ट्वा सभायां **वर्तमानाः** सभासदः उच्चैः अहसन्। अनेन प्रसङ्गेन **मोदमाना** सीता अपि स्वसखीं किञ्चिद् **भाषमाणा** अहसत्। यदा तदर्थम् उपस्थिताः सर्वे राजानः अस्मिन् कर्मणि असफलाः अभवन् तदा विश्वामित्रः तत्र **विद्यमानं** सोत्साहं रामं धनुषि बाणसन्धानं कर्तुं प्रेरितवान्। रामः विश्वामित्रस्य आज्ञां **मन्यमानः** **मोदमानेन** मनसा मुनिवरं विश्वामित्रं जनकं च प्रणम्य धनुषः समीपं गतवान्। सः यदा धनुः उन्नीय बाणं संयोजितवान् तदा धनुः खण्डद्वये विभक्तम् अभवत्। तद् दृष्ट्वा सभायां **विद्यमानाः** सर्वे 'जयतु, जयतु' इति उक्तवन्तः। सीता तु रामस्य सौन्दर्यं दृष्ट्वा पूर्वमेव व्यामुग्धा जाता आसीत्। रामस्य जयं दृष्ट्वा **मोदमाना** सा रामं प्रीत्या दृष्टवती। प्रसन्नः जनकः सखीभिः सह **भाषमाणया** सीतया सह रामस्य समीपं गतवान्। लक्ष्मणेन सह विश्वामित्रः अपि तत् स्थानं प्राप्तवान्। सीता रामस्य वरणं कृतवती। ततः गुरुजनानाम् आशिषं **याचमानौ** तौ नव-दम्पती सर्वान् नमस्कृतवन्तौ।

## अभ्यासः - 330

1. **पाठात् उत्तरं लिखत–**

[ पाठ से उत्तर लिखें। Write the answer from the lesson. ]

(i) केन स्वयंवर-सभा आयोजिता ?

।

(ii) कीदृशी घोषणा जायमाना आसीत् ?

।

(iii) किं भजमानाः राजानः उपहासपात्रतां व्रजन्ति स्म ?

।

(iv) के 'जयतु, जयतु' इति उक्तवन्तः ?

।

(v) किं याचमानौ दम्पती सर्वान् नमस्कृतवन्तौ ?

।

2. **उदाहरणानुसारं शानच्-प्रत्ययान्त स्त्रीलिङ्गरूपाणि लिखत–**

[ उदाहरण के अनुसार शानच्प्रत्ययान्त स्त्रीलिङ्ग रूप लिखें। Write the feminine forms ending in *śānac*-suffix as shown in the example. ]

उदा. शोभ् – **शोभमाना**

(i) भज् –

(ii) यत् –

(iii) मुद् –

(iv) भाष् –

(v) कम्प् –

**3. उदाहरणानुगुणं शानच्-प्रत्ययान्त-पुंलिङ्गरूपाणि लिखत—**

[ उदाहरण के अनुसार शानच्-प्रत्ययान्त पुंलिङ्गरूप लिखें। Write the masculine forms ending in *śānac*-suffix as shown in the example. ]

| | | | |
|---|---|---|---|
| उदा. | वप् | – | **वपमानस्य** |
| (i) | ध्वंस् | – | |
| (ii) | लभ् | – | |
| (iii) | रम् | – | |
| (iv) | यज् | – | |
| (v) | बाध् | – | |

**4. उचित-पदैः योजयत—**

[ उचित पद से जोड़े। Match with the appropriate words. ]

| | **(क)** | | **(ख)** |
|---|---|---|---|
| (i) | प्रवहमानायै | (क) | राज्ञे |
| (ii) | यजमानाय | (ख) | बालकम् |
| (iii) | मोदमानं | (ग) | नद्यै |
| (iv) | वर्तमानायाः | (घ) | बालिकया |
| (v) | वर्धमानया | (ङ) | समस्यायाः |

**5. रिक्तस्थानं पूरयत—**

[ खालिस्थान भरें। Fill in the blanks. ]

| | | | |
|---|---|---|---|
| उदा. | (भाष्) | **भाषमाणस्य** | अध्यापकस्य। |
| (i) | (कम्प्) | | लतायाम्। |
| (ii) | (ध्वंस्) | | भवनम्। |
| (iii) | (यत्) | | बालकेन। |
| (iv) | (वृत्) | | वार्ता-पत्रे। |

6. **एषां मूलधातुं निर्दिशत–**

[ इन के मूलधातुओं का निर्देश करें। Point out the roots of the following. ]

| | | | | | |
|---|---|---|---|---|---|
| उदा. (i) | लभमानम् | ( ............) | (ii) | भजमानायै | ( ..... ) |
| (iii) | बोधमानात् | ( ) | (iv) | शोभमानेन | ( ) |
| (v) | विद्यमानस्य | ( ......... ............) | (vi) | वर्धमानौ | ( ) |

7. **मञ्जूषायां प्रदत्तानि पुंलिङ्गरूपाणि स्त्रीलिङ्गरूपाणि च पृथक्कृत्य योग्ये स्थाने लिखत–**

[ मञ्जूषा में प्रदत्त पुंलिङ्गरूप एवं स्त्रीलिङ्ग रूपों को अलग कर उचित स्थान में लिखें। Separate the masculine as well as feminine forms and write them in appropriate space. ]

| |
|---|
| कामयमानेन, जायमाना, भाषमाणः, शोभमानौ, प्रवहमानाम्, यतमानाः, कम्पमानाभ्याम्, मोदमाना, भाषमाणया, स्पर्धमानायै |

| **पुंलिङ्गे** | **स्त्रीलिङ्गे** |
|---|---|
| (i) | (i) |
| (ii) | (ii) |
| (iii) | (iii) |
| (iv) | (iv) |
| (v) | (v) |

8. **वाक्यद्वयं योजयित्वा अखण्डं वाक्यं लिखत–**

[ वाक्य द्वय को जोड़कर अखण्ड वाक्य लिखें। Joine the two sentences and write a single one. ]

उदा. धनुः मण्डपे विद्यते। तत् राजानः उन्नेष्यन्ति।

...**मण्डपे विद्यमानं धनुः राजानः उन्नेष्यन्ति**... ।

(i) बिहारप्रदेशे गङ्गा प्रवहति। तां रामलक्ष्मणौ तीर्णवन्तौ।

।

(ii) राजानः यतन्ते। ते असफलाः भवन्ति।

।

(iii) ते असाफल्यं भजन्ते। उपहासपात्रतां यान्ति।

।

(iv) रामः उत्सहते। विश्वामित्रः तं प्रेरयति।

।

(v) रामः सभायां विराजते। तं सीता वृतवती।

।

(vi) सीता भाषते। तया सह जनकः आगतः।

.......................................................................................................... ।

9. **क्रियापदं दृष्ट्वा यथोचितं शत्रन्तं शानजन्तं वा रूपं (पुं-स्त्री. एकवचने) लिखत–**

[ क्रियापद को देखकर शतृप्रत्ययान्त अथवा शानच्प्रत्ययान्त (पुं. स्त्री. एकवचन) रूप लिखें। Write the masculine and feminine declension in singular either ending in *śatṛ* or *śānac* on the basis of the verbal forms given. ]

| **स्मरत्** ति → शतृप्रत्ययः ते → शानच्प्रत्ययः |
|---|

| | | **पुं. एक.** | **स्त्री.एक.** |
|---|---|---|---|
| **उदा.** | वदति | **वदन्** | **वदन्ती** |
| | याचते | **याचमानः** | **याचमाना** |
| (i) | धावति | | |
| (ii) | शृणोति | | |
| (iii) | पचते | | |
| (iv) | कुरुते | | |
| (v) | गच्छति | | |
| (vi) | वर्तते | | |
| (vii) | पठति | | |
| (viii) | मोदते | | |

(ix) लिखति

(x) जायते

(xi) प्रकाशते

(xii) शोभते

(xiii) शङ्कते

(xiv) क्रीडति

(xv) नयति

(xvi) प्रार्थयते

(xvii) वर्धते

(xviii) एधते

(xix) पश्यति

(xx) भाषते

सुभाषितेषु शतृ-शानच्-प्रत्ययान्तरूपाणां प्रयोगाः

# सुभाषितानि

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्छ्वसन् ॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रिता ॥

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ।
न विचारपरं चेतो यस्यासौ मृत एव सः ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ॥

◆◆◆

**कथायां शतृ-शानच्-प्रत्ययान्त-प्रयोगाः**

## सत्सङ्गतिः कथय किं न करोति पुंसाम्

अनादिकालात् प्रचलन्त्याम् अस्माकं परम्परायां बहवः वैदिकाः ऋषयः अभवन्। न केवलं वैदिककाले किन्तु इदानीम् अपि अनेके ऋषयः कठोरं तपः समाचरन्तः दृश्यन्ते। महर्षिः वसिष्ठः महर्षिः विश्वामित्रः च वैदिक-कालीनौ ऋषी आस्ताम्। उचिते वयसि यथोचितं व्रतं पालयन्तौ तौ महान्तौ तपस्विनौ अभवताम्। योग्याद् गुरोः स्वाध्यायम् अधीयानौ तौ ज्ञानिनौ सञ्जातौ। एवं तयोः उभयोः पार्श्वे तु ज्ञानस्य भण्डार एव आसीत्।

अनयोः महर्षिः विश्वामित्रः जात्या क्षत्रियः, स्वभावेन क्रोधी अपि आसीत्। परन्तु उग्राणि तपांसि समाचरता तेन ब्रह्मर्षिषु स्थानं प्राप्तम्। "ओम् भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्" इति प्रसिद्धं गायत्री-मन्त्रं समाजाय प्रयच्छता तेन अचिरात् प्रसिद्धिः लब्धा। जपतः जनान् अभीष्टफलं प्रददती गायत्री लोके कामधेनुरूपेण प्रसिद्धिं प्राप्तवती। मुक्तिं कामयमानैः जनैः गायत्री-मन्त्रस्य शक्त्या भास्वतः सूर्यदेवात् सद्बुद्धिः प्रार्थ्यते।



महर्षिः वसिष्ठः च जात्या ब्राह्मणः आसीत्। किन्तु सः कश्चन ब्रह्मर्षिः एव आसीत्। सततं निर्गुणं ब्रह्म उपासीनः सः महतीं सिद्धिं प्राप्तवान्। ज्ञानेन प्रज्वल्यमानस्य तस्य ब्राह्मतेजसः समक्षं विश्वामित्रस्य शरीरे प्रवहमानं क्षात्रबलं निष्प्रभं भवति स्म। वसिष्ठेन मृत्युं वशीकुर्वतः महामृत्युञ्जयमन्त्रस्य रचना कृता। इमं मन्त्रम् आस्थापूर्वकं जपत्सु उपासकेषु दीर्घायुः स्वतः सिद्ध्यति इत्येवंरूपः विश्वासः जनेषु प्रचलन् अस्ति। ऋग्वेदे वर्तमानस्य अस्य मन्त्रस्य स्वरूपम् एवं वर्तते– "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धान्मृत्योर्मुक्षीय मामृतात्।"

एकदा सत्सङ्ग-तपश्चरणयोः मध्ये कतरः श्रेष्ठः इति विषये विवादः अभवत्। वसिष्ठः सत्सङ्गस्य पक्षे आसीत्। विश्वामित्रस्य तु स्वतपस्यायाम् अभिमानः आसीत्। परस्परं विवदमानयोः एतयोः विवादे असमाहिते च तौ क्षीरसागरे वर्तमानस्य भगवतः शेषनागस्य सविधे निर्णयार्थम् अगच्छताम्। शेषनागः तु

मातरं पृथिवीं स्वशिरसा धारयन् अस्ति। अतः एताभ्यां प्रस्तुतं पक्षं शृण्वता तेन कश्चन प्रस्तावः समुपस्थापितः– ''भवतोः कश्चन मुहूर्तं मम शिरसि विद्यमानां पृथिवीं स्वशिरसि स्थापयतु, यावत् अहं किञ्चित् लघूभूय भवतोः समस्यायाः समाधानं कर्तुं प्रभवेयम्'' इति।

एवं प्रतिपादयतः शेषस्य वचनं शृण्वन् एव विश्वामित्रः अग्रे आगतवान्। सः वर्षाणां दशभिः सहस्रैः सञ्चितानां स्वतपसां बलेन पृथिवीं धारयितुं प्रयत्तवान्। परन्तु वारं वारं प्रयत्नं कुर्वन् अपि सः तथा कर्तुं कथमपि समर्थः न अभवत्। ततः वसिष्ठः अपि सत्सङ्गबलेन तथा कर्तुम् आत्मानं नियोजितवान्। सः किन्तु एतस्मिन् कर्मणि अनायासेन सफलः अभवत्।



ततः कियत्कालं यावत् विचारयन् शेषनागः मौनम् आकलय्य अतिष्ठत्। मौनम् अवलम्बमानस्य भगवतः शेषस्य व्यवहारेण विस्मितौ तौ आग्रहं कृतवन्तौ - 'भगवन्! आवयोः मध्ये प्रवर्तमानायाः समस्यायाः निर्णयं कुर्वाणेन भवता न किमपि समाधानं विहितम्'। शेषनागः सस्मितम् अवदत्– ''वत्सौ! निर्णयः तु स्वतः एव अभवत्। मया पुनः किं करणीयम्'' इति। शेषस्य एतद् रहस्यमयम् उत्तरं शृण्वद्भ्यां ताभ्याम् आश्चर्यं प्रकटीकृतम्। तद् दृष्ट्वा हसता शेषेन स्पष्टं प्रतिपादितम्– ''तर्हि शृणुतम्। अनयोः मध्ये सत्सङ्गः एव श्रेयान्। यतो हि सत्सङ्गबलेनैव वसिष्ठः किञ्चित्कालं यावत् पृथिवीं धारयितुं समर्थः अभवत्। वस्तुतः उत्तमैः सज्जनैः सह निवसन् तथा उत्तमोत्तम-पुस्तकानाम् अध्ययनेन मानवः जीवनस्य प्रत्येकस्मिन् क्षेत्रे सफलतां प्राप्तुं शक्नुयात्।'' एवं वदता शेषेन वसिष्ठस्य शिरसि वर्तमाना धरित्री पुनः गृहीता। चिरात् प्रवर्तमानायाः उपर्युक्तायाः समस्यायाः सहजं समाधानं लब्ध्वा वसिष्ठ-विश्वामित्रौ स्वं स्वं स्थानं प्रतिनिवृत्तौ।

◆◆◆

# Teach Yourself Samskrit




संस्कृतस्वाध्यायः

राष्ट्रिय संस्कृत संस्थानम्
मानितविश्वविद्यालयः
नव देहली